PRĀCYAVĀṆI
Text Series Vol. XVII
Samskrita—Dūta—Kāvya—Samgraha
Vol. VII

श्रीकृष्ण-सार्वभौम-कृतम्

पदाङ्क-दूतम्

THE PADĀṄKA—DUTA

by **Srikrisṇa Sārvabhauma of Bengal**

Critically edited for the first time with the Editor's own Commentary called Bhāsvati, Bengali translation, indices, etc.

By

Dr. Jatindra Bimal Chaudhuri, Ph.D. (London), Kavyatirtha,
Secretary, Sanskrit, Siksha Parisat, Govt. of West Bengal; formerly, Principal, Sanskrit College, Calcutta and Head of the Department of Sanskrit, Presidency College, Calcutta; author of the Series (1) Contributions of Women to Sanskrit Literature, (2) Contributions of Muslims to Sanskrit Literature, (3) Muslim Patronage to Sanskrit Learning, (4) Sanskrit Kosa-Kavya-Saṃgraha, etc.

CALCUTTA—1955.

Rexin Rs. 4/-

Published by

Dr. J. B. Chaudhuri, Pracyavani Mandir
(Institute of Oriental Learning)
3, Federation Street, Calcutta-9.

Available at :—

Pracyavani Mandir,
3, Federation Street, Calcutta-9
Das Gupta & Co.
54/3, College Street, Calcutta.
Chuckerbertty Chatterjee & Co.
15, Bankim Chatterjee Street, Calcutta.
Sanskrit Pustak Bhandar,
38/2, Cornwallis Street, Calcutta.
Oriental Book Agency,
15, Shukrawar, Poona.
Poona Oriental Book House,
Sadashiv Peth, Poona.
B. N. Sur & Co.,
Gole Market, New Delhi.
Mehar Chand Munshi Ram,
P. Box No. 1165, Nai Sarak, Delhi-6
Motilal Banarasidas
P. Box No. 75, Banaran City.

Printed by

U. M. Biswas, M.A. (COM.), B.L.
I. N. A. Press, 173, Ramesh Dutta Street. Calcutta ;
and
Sri D. P. Mitra at the Elm Press, 63, Beadon Street, Calcutta.

PREFACE

I have very great pleasure in presenting the lovers of Sanskrit Learning once again one of the best gems of Sanskrit Lyrical Literature, a messenger-poem composed after the Meghhaduta of Kalidas, viz. the Padāṅka-dūta of Śrī Kṛṣṇa Sārvabhauma who flourished in Bengal about 250 years ago, as Vol. 17 of our Pracyavani Sanskrit Series and Vol. 7 of our Samskrita-Duta-Kavya Samgraha.

The present volume contains, besides the Sanskrit Text, a new commentary in Sanskrit by myself called Bhāsvatī. There are a few commentaries on the work, viz. that of Rāmahari, Jayarāma Tarkapancānana and Rādhāmohan Gosvāmin Bhaṭṭācārya. As none of these commentaries appeared to me satisfactory, I made bold to compose a new commentary for incorporating my own interpretations of the excellent verses of the Padāṅka-dūta. I crave indulgence from the scholarly world for this.

As all possible details about the subject-matter have been given in the contents verse by verse and also in the Introduction, a separate appendix on English Translation with notes has been dispensed with.

I am grateful to the Authorities of different MSS. Libraries for permitting me to use their MSS. for the preparation of this critical edition.

Pracyavani,
3, Federation Street,
Calcutta—9.
June, 1956.

J. B. Chaudhuri

CONTENTS

25. Ten peacock dances with joy at the sight of a new patch of cloud which, at the same time, has a reverberating sound. But the Gopa damsel refutes this well-established fact by saying that in her own case, the fact stands reversed ; it is all pangs for her even from the first sight of S'ri Krṣṇa. 59—62

26. After traversing a couple of miles, the messenger should wash his feet in the water of the river Yamunā and then, take rest underneath the tree. It does not stand to reason that the particular Foot-print that brings all emancipation from worldly sufferings, could ever be without feet. 62—64

27. Or the foot-print had better ride on Gopa damsel's heart and gallop off. The water-charged cloud would create shade and the Sun too would refrain from pouring any rain-water on the foot-print in the interest of the beautiful Lotus-mark on the Foot-print. 64—67

28. Because the foot-print is to ride as stated above, and not to go on foot, there remains now no plea for him for not going to Mathurā on account of the constant shedding of tears by the inhabitants of Vraja, not dried up in spite of heated pangs of separation from S'rī Krṣṇa. 67—69

29. This shedding of tears has not contributed to the volume of water in the Yamunā, rather she has grown thin on account of separation from S'ri Krṣṇa. In any case, the foot print would face no difficulty in reaching Mathurā from Vṛndāvana, because both these places are situated on the same side of the said river. 69—71

34. Women are never able to withdraw their love from their beloved under any circumstances. That is why the Gopa damsel entreats the Foot-print to go to Mathurā on her behalf. Rati lamented over the sad demise of Madana by the fire emitted from the eyes of S'iva even though Madana tortured her constantly with the five flower-shafts in his possession. 81—83

35. As Madana desires to extract each of the five vital breaths of the Gopa damsels by ecch of his five shafts, he is behaving even now as such i.e., he is constantly schorching them with his shafts. 83—84

36. S'iva, the dispenser of Justice, did the right thing in burning Cupid. For saving the worlds from violent poison, he once took it himseif; when Cupid began to torture the world with similar poison, what else could he do than burning him to death ? 85—86

37. The Kālakūṭa poison could do the same harm to Brahmā and others as this flower-shaft does—this S'iva could realise by coming into the slightest contact with Cupid. So he put an end to this surmise by killing Madana all at once. 86—90

38. The pangs of separation are daily increasing and consequently, it is a great calamity now to reside in Vṛndāvana. Further, if the Yamanā goes on swelling up with the tears of Gopa women how would it be possible for them to reside in the bowers that would be innundated very soon. 90—92

then the existence of the eye itself cannot be proved. And therefore, Inference is to be accepted as a valid source of knowledge. 100—103

44. Had it not been for our bodies that are torn asunder by the flower-shafts of Cupid, then the existence of these shafts would have remained as baseless or false. What has been said before with regard to Kṛṣṇa's assurances about his return to Vṛndāvana would have simply added to the instances of the validity of the assertions of Bauddhas that Perception is the only valid source of knowledge, if it were not for the Inference that the message sent would lnduce him to return to Vṛndāvana. 103—106

45. Only the fools say that the world has had an ephemeral existence. How is it that the pangs of seperation from Kṛṣṇa are constantly pestering the Gopīs ? Nor is sound destructible or inconstant; because S'rī Kṛṣṇa's words "I shall return from Mathurā soon" are still fresh to Gopīs. Really speaking, it is Kṛṣṇa's love for them that is fleeting; of course, not for others, as his love for Kubjā is substantially constant.

S'ri Kṛṣṇa S'arman, deeply devoted to S'ri Kṛṣṇa, composed this poem Kṛṣṇa-padānka-dūta in 1645 S'aka year at the instance of king Raghurāma Rāya.

Variant readings pp. 111—112.

Padanka-duta

Introduction

Description of MSS

A. MS. No. 3374 of the Asiatic Society of Bengal.

Substance : Country-made paper. Size $15 \times 3\frac{1}{2}$ inches. Folio 6. Lines to a page. Script Bengali. Date 1777 S'aka year i.e., 1835 A.D. Condition : good. Writing : legible.

B. MS. No. 5130 of the Asiatic Society of Bengal.

Substance : Country-made paper. Size 16×4 inches. Folios 6. Lines 9 to a page. Data 1701 S'aka i.e., 1779 A.D. Condition : not bad. Handwriting : bad. Script : Bengali, Full of mistakes.

C. MS. No. 768 of Vangiya Sahitya Parishat, Upper Circular Road, Calcutta.

The Text together with the commentary of Rādhāmohana Gosvāmin. Size 14×5 inches. Lines 2 with 49 letters to a line. Folios 17. Condition : torn. Script : Bengali. Substance : Country-made paper.

Folio 1 torn. End :

दुःखातिशयमावेदयितुं पत्नीषु पुराङ्गनासु क्षणिकप्रेमनिरासमाह तच्चेति। तच्च क्षणिकप्रेम च गोपाङ्गनास्वेव न तु पुंस्त्रीष्विति भावः॥

D. MS. No. 456 of Vangiya Sahitya Parishat.

Text only without commentary. Substance : country-made paper. Size : 14×3 inches. Lines 6. Folios 7. Letters 45—51 to a line. Condition : old.

E. MS. No. 237 of the Vangiya Sahitya Parishat.

Substance : Country-made paper. Script : Bengali. Size 11 × 6 inches. Folios 7. Lines 7—8 with 31—35 letters to a line. Condition : bad.

The Ms. begins as follows : मूर्च्छा एव प्राणप्रियतमा सखी तया सङ्गता । End : प्रियतमकृतं तच्च प्रेम गोपाङ्गनासु वर्तते इति शेष इत्यर्थः ॥

F. MS. No, 27 of the Vangiya Sahitya Parishat.

Substance : Country-made paper. Script : Bengali. Size 14 × 3½ inches. Folios 14 with 3 lines to a folio ; letters 46 to a line. Script : Bengali. Condition : good.

Begiug : अथ ॐ पुरा किल त्रैलोक्यनाथश्रीकृष्णे अक्रुरेण मथुरां नीते काचिद् गोपी कृष्णविरहेण व्यथिता ।

End : एतेन तज्जातत्वेनातिशयप्रीतिहेतुर्भवितेति व्यञ्जिम् ॥

G. MS. of the Prācyavāṇī.

The MS. of the Padānkadūta was collected by me from Mymensinha District through the help of Sj. J. M. Bose, nephew of late A. M. Bcse. The MS. still remains uncatalogued.

H. Printed Edition.

As printed in Jīvānanda Vidyāsāgara's Kāvya-Saṃgraha.

MS. of Kṛṣṇa-padāmṛta by Kṛṣṇanātha Sārvabhauma in the collection of the Prācya-vāṇī.

Substance : Country-made yellow paper. Fol. 29. Lines 5—6 to a page. Extent 2192 Ślokas. Character : Bengali. The work was composed, as the last verse of the MS. shows, in the S'aka year 1633 or in 1711—12 A.D. i.e. twelve years earlier than the Padānka-dūta.

Introduction

Sri Krsnanatha Sarvabhauma and his patrons

Śrī Kr̥ṣṇanātha Sārvabhauma was a great Naiyāyika Paṇdita of his own time in India, particularly, in Bengal. He adorned the court of Mahārāj Kr̥ṣṇacandra of Nadia and also of his predeceesor Rājā Rāmajīvana. The ruler of this family donated extensive landed property to the Pandits of Navadwip and hardly was any Pandit left who did not enjoy such donated land. Bhavānanda Majumdar helped Mānasiṃha during his raid of jessore and final conquest of Mahārāj Pratāpāditya and as a reward, got from Emperor Jahangir in H. 1015 i.e., 1606 A. D. 14 Parganahs 'Mahatpur, Lepa, Sultanpur etc., as well as the title Mazumdar. Bhavānanda founded his capital in village Matiāri. He was succeeded by his son Gopāla. Gopāla had three sons—Narendra, Rāmeśvara and Rāghava. The youngest was chosen the heir apparent by his father on account of his inherent good qualities. Rāghava became the ruler in 1618 A. D. He was a very able ruler and got from Emperor Shah Jehan Raipur and several other Parganahs as gift. It is Rāghava who transferred his capital from Matiāri to Reni (i e., Kr̥ṣṇanagar) situated in between Navadvip, Santipur and Ulā. Rāghava excavated a trench all around Kr̥ṣṇanagara and also constructed a High Road from Kr̥ṣṇanagara to Navadvīp via Santipur and Ulā (Viranagar). In 1669 A. D., he constructed the temple of Rāghaves'vara S'iva on the bank of a big tank that he had himself excavated in Dighnagar. [1]

---

1. The following verse is still found engraved on the temple :

शाके सोम-नवेषु-चन्द्रगणिते पुण्यैकरत्नाकरो
धीरश्रीयुतराघवो द्विजमणिर्भूमीभुजामग्रणीः ।

Unfortunately this noble-minded benevolent ruler expired after 51 years of glorious reign, but he left many other noble projects he had undertaken for the upliftment of his kingdom incomplete. [1]

The date of composition of the poem has been given by the poet himself as 1645 Śaka year, i. e. 1723—24 A. D. But the reference to two different names viz., that of Raghurām Roy and of Rāmajivana in the last line of the last verse of the poem gives rise to some difficulty in determining the name of the patron of the poet in whose court this poem Padāṅka-Dūta might have been composed.*

The period of Raghurām Roy's reign lies between 1637 and 1650 Śaka year. And as such there is no chronological

---

निर्माय स्फुरदूर्मिनिर्मलजलप्रद्योतिनीं दीर्घिकां
तत्तीरे कृतरम्यवेश्मनि शिवं देवं समस्थापयत् ॥

1. It is stated in the Kṣitiśavaṃśavalī—carita, chap. vi :

अथ कियद्दिनानन्तरं नवद्वीपे निरुपमगणेशमूर्तिं संस्थाप्य महेश्वरलिङ्गं स्थापयितुमेकमिष्टकादिमयं मन्दिरं समारब्धवान् । एवं क्रमेणैकाधिकपञ्चाशाद्वत्सरान् सुरपतिरिव पृथिवीं शशास, मन्दिरे चार्धावशिष्टे त्यक्तप्राणः परमगतिमवाप ।

*The last verse of the poem is as follows :

शाके सायकवेदषोडशमिते (१६४५) श्रीकृष्णशर्मार्पय-
न्नानन्दप्रदनन्दनन्दनपदद्वन्द्वारविन्दं
चक्रे कृष्णपदाङ्कदूतमखिलं प्रीतिप्रदं शृन्वतां
धीरश्रीरघुरामरायनृपतेराज्ञां गृहीत्वादरात् ॥" इति

difficulty in placing our poet as the Court-poet of King Raghurām Roy of Kṛṣṇanagar—Navadwīp[1].

One King Rāmjīvana was the father of King Raghurām Roy who died in 1637 S'aka year. If we identify King Rāmjīvana, patron of Kṛṣṇanātha Sārvabhauma, with the father of Raghurām Roy, the date of the composition of the work becomes contradictory to facts, because the above-mentioned Rāmajīvana died 8 years before the composition of the Padānka-Dūta.

Again, this confusion becomes still more confounded when we find that in Natore, Rajsahi, there flourished a local Chief called Rājā Rāmajīvana. Naturally, one would suspect that the poet could refer to this Rāmajīvana as the King at whose instance he composed the Padāṅka-Dūta. But as it is well established that Kṛṣṇanātha Sārvabhauma was one of the celebrated luminaries of Navadwīp, it is only supposed that his real patron was King Rāmajīvana, father of Raghurām Roy of Kṛṣṇanagar-Navadwīp and not of Rāmajīvana of Natore, Rajshahi. Probably, King Rāmajīvana of Navadwīp inspired the poet to his undertaking the composition which he completed in its excellent form a few years after his death during the reign of his celebrated son King Raghurām Roy.

Alternative reading of the second half of the last verse is as follows :

चक्रे कृष्णपदाङ्कदूतरचनं विद्वन्मनोरञ्जनं
श्रीलश्रीयुत-रामजीवनमहाराजाधिराजाहतः ॥ इति

(1) See Kṣitīśavaṃśāvalī, ed. by W. Pertsch, Berlin, 1852.

In any case, Jayarāma Pañcānana Bhaṭṭacārya definitely states that the work Padānka-duta waa composed at the instance of King Raghurāma Rāya—अथ रघुरामरायनिदेशितः श्रीकृष्णसार्वभौमनामा कश्चित् कविः श्रीकृष्णपदाङ्कदूतकाव्यग्रन्थं चिकीर्षुः ... ...

Other Works of Srikrisna Sarvabhauma

Śrīkṛṣṇa Sārvabhauma appears to have been long-lived. Rājā Ramakṛṣṇa Rāya, grand father of Raghurama Rāya at whose instance he composed the Pādanka-dūta, donated him landed property in 1110 Bengali Year *i.e.* 1703 A. D. He, in his own turn, donated the same land to his pupil Rāmajīvana Pañcānana in 1123 Bengali Year *i.e.* 1716-17 A. D.

(Nadia Collectorate Taydād No. 16633).

1. श्रीकृष्णसार्वभौमकृतं कृष्णपदामृतम्[1]

This work is composed in 253 Verses of various metres, and as the name implies, is devoted to the Eulogy of Lord Śri Kṛṣṇa- The one great point of difference between this work and the later poetic work of the same author *i e.* the Padankadūta is that this work does not bank upon the Nyāya-paribhaṣā at all for its vocabulary. The work begins at follows :—

माङ्गल्यानां प्रधानं यमभयतमसां शारदं शर्वरीशं
पीयूषाणां निधानं मुनिगणमनसामेकविश्रामधाम ।
संसाराब्धिं तितीर्षोस्तरणिमतिधनं नारदादेर्महर्षे-
र्लक्ष्मीवक्षोऽरविन्दं स्मर हरिचरणद्वन्द्वमानन्दकन्दम् ॥

1. R. L. Mitra's Notices MS. No. 1125.

The end is :—

निर्मितं भूरियत्नेन श्रीलश्रीकृष्णशर्मणा ।
तरणाय भवव्याधेः ··· कृष्ण-पदामृतम् ॥
शाके वह्नि-हुताश-षड्विधुमिते (१६३३) श्रीकृष्णशर्मापेय-
न्नानन्दप्रदनन्दनन्दनपदद्वन्द्वारविन्दं हृदि ।
चक्रे कृष्णपदामृतं त्रिभुवनत्राणाय दानादिभिः
ख्यात-श्रीयुत-रामजीवनमहाराजधिराजादृतः ॥

2. श्रीकृष्णसार्वभौमकृता मुकुन्दपदमाधुरी

This work is composed in Kārikās with prose elucidations of the same. 2nd. Āsvāda begins as follows :—

इदानीं परमात्मानं निरूपयति—
व्रजस्त्रीस्तनशैलेन्द्र-स्फुरच्चरणपङ्कजः ।
नित्यज्ञानविशिष्टो यः परमात्मा स उच्यते ॥

ननु तथापि नात्मनो ज्ञानरूपतानिराकरणं धर्मधर्मिणोरभेदादित्यत आह—
भिन्नो हि धर्मिणो धर्मो नो चेदेवं कथं तदा ।
नो गृह्णाति रसं चक्षू रूपं वा रसनेन्द्रियम् ॥

3. श्रीकृष्णसार्वभौमकृतः सिद्धान्तचिन्तामणिः

The work begins as follows :—

भुजगेन्द्रफणारत्नरञ्जितश्रीपदाम्बुजम् ।
यशोदानन्दनं वन्दे सच्चिदानन्दविग्रहम् ॥

ननु भगवद्विग्रहस्य चिदानन्दरूपत्वे कथं चक्षुषा ग्रहणं कथं वा नित्यत्वं, पदार्थमात्रस्यैव क्षणिकत्वात् यशोदानन्दनत्वेन जन्यत्वाच्च इत्यत आह :—

कालः षडिन्द्रियग्राह्यो ज्ञानञ्च स्थिरमस्थिरम् ।
सत्ता च त्रिविधा प्रोक्तमिति वेदान्तकोविदः ।

The work refers to King Raghu Rāma Rāya in the following Verse :

पद्भ्यामेव फणागणस्य विषयव्याधेश्च चिन्तामणेः
सान्द्रानन्दमयस्य देवकसुताजन्मप्रवादस्य च ।
नित्यत्वं जगदीश्वरस्य वपुषः श्रीकृष्णनाम्ना मया
धीर-श्रीरघुरामरायनृपतेराज्ञावशाद्वर्णितम् ॥

The Subject-matter and merit of the work Padanka-duta

The Padānka-Dūta of Kṛṣṇanātha Sārvabhauma is a Messenger Poem of the same pattern as the Megha-Dūta of Kālidāsa. In this daintily finished short poem consisting of only 46 verses, the poet describes Rādhā's pangs of separation from S'rīkṛṣṇa during his residence at Mathurā in the company of Kubjā.

The messenger in the work is the footprint of S'rī Kṛṣṇa as found on the bank of the river Yamunā. Certain Cowherdess i e. Rādhā herself sends her implorations to S'rī Kṛṣṇa for his return to Brindaban failing which she would be destined to die of the pangs of separation from him.

The damsel sending the message warns the messenger about the manner in which he would convey the message to Lord Kṛṣṇa as well as the choice of words which should at once touch the core of his heart.

The main interest of the work lies in the appropriate use of the Nyāya Paribhāṣā for imparting poetic thoughts. The poet also at times refers to his predecessors only to obvert their opinions, e.g., his reference to Rūpa Gosvāmin's statement that the river Yamunā got swollen up on account of the constant shedding of the tears of the Gopīs which contributed

to the volume of water in the Yamunā only to opine that the fact must have been really otherwise.

Rūpa Gosvāmin's Haṃsa-Dūta :

शीर्णा गोकुलमण्डली पशुकुलं शष्पाय न स्पन्दते
मूकाः कोकिलपंक्तयः शिखिकुलं न व्याकुलं नृत्यति ।
सर्वे त्वद्विरहानलेन विकला गोविन्द दैन्यं गताः
किन्त्वेका यमुना कुरङ्गनयना नेत्राम्बुभिर्वर्धते ॥ इति

Kṛṣṇanātha Sārvabhauma's Padānka-Dūta :

क्षीणैवास्ते तरणितनया वस्तुतस्त्वद्वियोगे
का वा पीना भवति वचनं कस्यचिन्नेति युक्तम् ।
गोपस्त्रीणां नयनसलिलैर्वर्धते सा विशीर्णा
अन्ये नन्दव्रजपुरजना नूनमित्यर्थकं यत् ॥

The poem is also interspersed with occasional novel thoughts, e.g., verse No. 35 in which the poet in his own characteristic way states that each of the five shafts of Cupid would be responsible for taking away consecutively the five breaths—Prāṇa-Vāyus of each of the Cowherdesses.

As is usual with the poets of high order Kṛṣṇanātha also makes many universal statements that is not limited to any particular time or clime, e. g.

'बालक्रीड़ां रचयति मुहुर्यत्र तत्रानुरागः' (१८)
'स्त्रीभिः प्रेम प्रियतमगतं नैव शक्यं विहातुम्' (३४)

Again, he is also skilful in the use of alliterations, e. g. V.11 :

कूजद्भृङ्गैरमलकमलै राकुले गोकुले वा ॥

पदाङ्कदूत-श्लोक-सूची

पदाङ्कदूत-श्लोक-सूची

श्रीकृष्णसार्वभौमविरचितम्

पदाङ्कदूतकाव्यम्

—:०:—

गोपी भर्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी निश्वसन्ती विशालम् ।
तत्रैवास्ते मुररिपुरिति भ्रान्तिदूतीसहाया
त्यक्त्वा गेहं झटिति यमुनामञ्जुकुञ्जं जगाम ॥१॥

[अन्वयः । भर्तुः विरहविधुरा इन्दीवराक्षी काचित् गोपी उन्मत्ता इव स्खलितकवरी विशालं निश्वसन्ती तत्रैव मुररिपुः आस्ते इति भ्रान्तिदूती-सहाया [सती] झटिति गेहं त्यक्त्वा यमुनामञ्जुकुञ्जं जगाम ॥१॥]

श्रीयतीन्द्रविमलचतुर्धुरीणकृता भास्वती नाम पदाङ्कदूतटीका

—:०:—

सद्यःपाति वपुर्वयोऽपि विगलत्प्रायं सुहृद्बान्धवाः
स्वार्थान्वेषणपेशलाः कलय भोः कल्याणमामुष्मिकम् ।
चेतस्त्वं चल कालकालियशिरःसन्दोहमन्दोच्चलद्-
राधावल्लभपादपल्लवमिलच्छोभर्द्धि गोवर्धनम् ॥

अजितचरितपूतं दूतकाव्यं यदेतद्
व्यलिखदखिलहृद्यं **सार्वभौमः स कृष्णः** ।

स्वमतिविभवसारां तत्र टीकामुदारां
रचयति **विमलान्तः श्रीयतीन्द्रः** पदाङ्के ॥

अथ तत्रभवान् श्रीकृष्णसार्वभौमनामा कश्चन कविः—

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥"

इत्यादिसामान्यानुशासनात् काव्यमात्रस्य श्रेयःसाधनतां पश्यन् तत्रापि—

"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम् ॥"

इत्यादिविशेषशास्त्रेण साधुकाव्यस्यैव सर्वपुरुषार्थसम्पादनसामर्थ्यमाकलय्य साधुजनाराधित-राधामाधवचरितपूतं पदाङ्कदूतं नाम खण्डकाव्यं चिकीर्षुः

"आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ।"

इति सामान्यलक्षणप्राप्तं नमस्क्रियाद्यन्यतमं वस्तुनिर्देशं करोति—गोपीति । वस्त्वत्र ग्रन्थनायको गोपीभर्तृरूपः श्रीकृष्णः । केचिदाहुः—मङ्गलाचरणमेवैतत्, तथापि भगवत्प्रसङ्गस्यैव मङ्गलाचरणत्वादितरमङ्गलाचरणस्यानपेक्षिततया मङ्गलान्तरमकृत्वैव वर्णयितुमाह—गोपीति । जयरामस्तु—कायिकं मानसं वा स्वेष्टदेवतानमस्कारस्वरूपं मङ्गलाचरणं वर्णयति गोपीत्यादीत्याह ।

भर्तुः प्रियस्य श्रीकृष्णस्य विरहविधुरा विच्छेददुःखिता श्रीकृष्णस्य मथुरागमनानन्तरमिति शेषः, इन्दीवराक्षी नीलकमलसदृशनयना काचित् गोपी राधेत्यर्थः, इत्यन्वयः । एवञ्च विधुरत्वस्य सिद्धवन्निर्देशाद् विरहस्य चिरोपारूढत्वप्रतीतिः, न तु इन्दीवराक्षी काचिद् गोपी विरहविधुरा सतीत्यन्वयः ; तथात्वे विधुरत्वस्य विधेयत्वेन विरहस्य आकस्मिकताप्रतीत्यापत्त्या "भ्रान्तिदूतीसहाये"त्यत्र भ्रान्तेः, वक्ष्यमाणश्लोके "मूर्च्छाप्राणप्रियतमसखी"त्यत्र मूर्च्छाया-

श्चोपादानमसमञ्जसं स्यात् । भ्रान्तिमूर्छयोर्विरहजनिताष्टम-नवमदशास्वरूपयोः सद्यः संघटिते विरहे असम्भवात् । इन्दीवराक्षीत्यनेन नेत्रप्राशस्त्यकथनात् कृष्ण-दर्शनयोग्यता सूचिता । जलजताप्रतीत्या च चक्षुषोर्जलव्याप्तत्वं तेन च अनारतं क्रन्दनमपि ध्वनितम् । उन्मत्ता इव उन्मादरोगग्रस्ता इव, यद्वा भर्तुः प्रवासविरहे जायमानासु—

"चिन्ता च जागरोद्वेगौ तानवं मलिनाङ्गता ।
प्रलापो व्याधिरुन्मादो मोहो मृत्युर्दशा दश ॥"

इत्युज्ज्वलनीलमणयुक्तदशदशासु उन्मदाख्याष्टमदशाग्रस्तेत्यर्थः । न चैवम् ।

"सर्वावस्थासु सर्वत्र तन्मनस्कतया सदा ।
अतस्मिंस्तदिति भ्रान्तिरुन्मादः परिकीर्त्यते ।
अत्रेष्टद्वेषनिश्वासनिमेषविरहादयः ॥"

इत्याद्युक्तदिशा भ्रान्तिनिश्वासादिकार्यदर्शनात् तस्या उन्माददशाया वास्तवत्वात्, इवशब्दो व्यर्थ इति वाच्यम्, रोगपरत्वेऽपि एतत्पर्यनुयोगस्य यथापूर्वं प्रतिष्ठितत्वात् । तथाहि—उन्माददशाया इव उन्मादरोगस्यापि भ्रान्ति-निश्वास-कवरीस्खालित्यादिकार्यतया श्रीराधा प्रकृत्या नोन्मादरोगग्रस्तेति केन भिषजा भवतां निर्णयो दत्त इति अस्माभिरपि प्रष्टुं शक्यते । तस्मात्

"यत्रोभयोः समो दोषः परिहारोऽपि तादृशः ।
नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥"

इत्युक्तदिशा परस्परपुरोभागित्वं परिहाय साधारणं किञ्चित् समाधानम् एष्टव्यम् । तच्चेत्थम्—राधायाः क्षणिकभ्रान्तिदर्शनेऽपि सर्वावस्थासु सर्वत्र सर्वदा तन्मनस्कतया भ्रान्तेरनुपलम्भात् प्रकृतोन्माददशा नेदानीमपि जातेति स्वीकृत्य इवशब्दसार्थक्यम उपपादनीयम् । एवं रोगपक्षेऽपि, श्वासकवरी-

अत्रैव वृन्दावन एवेत्यर्थः। अथैवं स्थानान्तरं परित्यज्य तस्या यमुनाकुञ्जगमने को हेतुरिति चेत् कृष्णस्य यमुनाप्रियत्वात् तत्रैव गमनसम्भावनेति गृह्यताम्। ईदृशे व्यतिकरे पूर्वमपि श्रीमत्या श्रीकृष्णः कालिन्दीविपिने एव आविष्कृत इति अद्यापि तत्रैव प्राग् गमनस्य स्वाभाविकत्वात्। यद्वा सर्वनाममात्रस्यैव बुद्धिस्थ-परामर्शितावादिमते अत्रैव यमुनाकुञ्ज एवेत्येवार्थः।

भ्रान्तिदूतीसहायेति भ्रान्तिश्चासौ दूती चेति भ्रान्तिदूती सैव सहायो यस्याः सेति विग्रहः। सहाय इति सह अयते इति व्युत्पत्त्या पचाद्यचि अजह-ल्लिङ्गः शब्दः, अत एव समानाधिकरणस्त्रीलिङ्गपरपदत्वाभावात् "स्त्रियाः पुंवद्भाषित" (६।३।३४) इत्यादिना दूतीशब्दस्य न पुंवत्त्वम्। मुग्धबोध-मतानुसारिणस्तु सहायशब्दस्य शोणादिषु पाठम् अङ्गीकृत्य "पाच्छोणादी"-त्यादिना ईपो विकल्पपक्षे आपम् इच्छन्ति ; एवञ्च तुल्याधिकरणस्त्रीलिङ्गपर-पदत्वात् समासे सति दूतीपदे प्राप्तं पुंवत्त्वम् अन्यथा वारयितुम् अशक्नुवानाः सहायेति भिन्नं पदम् आहुः, तथा च भ्रान्तिदूती सहाया कुञ्जप्रापिका आसी-दिति गोप्याः सहायमात्रकथनं न तु तस्या विशेषणम् इति। तन्न समीचीनम्। एवञ्चेदं भिन्नवाक्यं स्यात्, ततश्चानयोर्वाक्ययोः प्रत्यासत्त्यभावेन

"रमणे चरणप्रान्ते प्रणतिप्रवणेऽधुना।
वदामि सखि ते तत्त्वं कदाचिन्नोचिताः क्रुधः॥"

इत्यादाविव वाक्यान्तरे वाक्यान्तरानुप्रवेशरूप'गर्भितता'ख्यो दोषः प्रसज्यते। ततश्च 'एकं सन्धित्सतोऽपरं प्रच्यवते' इत्यस्मै वा,

मृत्कुम्भवालुकारन्ध्रपिधानघटनार्थिना।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया॥

स्खालित्यादिकतिपयलिङ्गदर्शनेऽपि प्रलापादिसर्वलिङ्गसमाहाराभावात् सा न प्रकृतोन्मादरोगग्रस्तेति परिकल्प्य इवशब्दो योजनीयः इति। स्खलितकवरी विस्रस्तकेशपाशा, तथा विशालं दीर्घं निश्वसन्ती निश्वासं मुञ्चन्ती ; अत्र स्खलितकवरीकत्वं च दीर्घनिश्वासश्च भ्रान्तिदूतीसहायत्वञ्चेति त्रीण्येव उन्मत्त-लिङ्गानि, तैरेव साधारणधर्मैः उन्मत्तेवेत्युपमानिर्वाहः। केचित्तु लज्जाभयादि-राहित्यरूपं साधर्म्यं विवक्षितमाहुः। उन्मत्तानां ज्ञानमात्रस्य प्रतिक्षणनवीनतया, राधिकायास्तु भ्रान्तेरपि कुञ्जगमनरूपकार्यपर्यवसन्नत्वेन ततो भेदात् उन्मत्ते-वेत्युक्तं न तु वस्तुगत्योन्मत्तेति केचित्। तत्रैव यमुनामञ्जुकुञ्ज एव। मुररिपुः श्रीकृष्णः आस्ते इति-भ्रान्तिदूतीसहाया इत्याकारकया भ्रान्तिरूपदूत्या सहिता ; प्रणयिन्याः सङ्केतस्थानगमने दूत्या अत्यावश्यकता रसशास्त्रप्रसिद्धा। अयं भावः यथा दूत्यैव नायिका सङ्केतस्थानं प्रति नीयते तथा तादृश्या भ्रान्त्या एव श्रीराधा यमुनामञ्जुकुञ्जं प्रति प्रस्थापिता, कृष्णस्य तत्रावस्थानकल्पनां विना तदानीं तस्यास्तत्र गमने कारणान्तराभावात्। झटिति शीघ्रं, यदैव यमुनाकुञ्जे कृष्णसान्निध्यं कल्पितं तदैवेत्यर्थः। गेहं त्यक्त्वा, यमुनामञ्जुकुञ्जं यमुनातीरवर्ति मनोहरं लतादिभिराच्छादितं स्थानं, जगाम। यमुनेत्यनेन मञ्जु इति विशेषणेन च कृष्णवासयोग्यता कुञ्जस्य ध्वनिता।

अत्र भर्तुरिति श्रीकृष्णस्य, तत्रैवास्ते मुररिपुरित्युक्तत्वात्। गोपीभर्तुरित्येक-पदपाठे गोपीनाम् अभीष्टसम्पादनरूपभरणकर्तुः श्रीकृष्णस्येत्यर्थः। काचिदिति प्रसिद्धा राधेत्यर्थः,

> "यथा राधा प्रिया विष्णोस्तस्याः कृष्णस्तथा प्रियः।
> सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा॥"

इत्यादिवचनात् तस्या एव प्रसिद्धत्वात्। "अत्रैवास्ते मुररिपु"रिति पाठे

इत्यस्मै वा आभणकाय करावलम्बो दत्तो भवेदिति द्रष्टव्यम् ।

त्यक्त्वा गेहम् इति । अत्र कुञ्जगमनस्य अन्यथा अनुपपत्त्या आक्षिप्तस्यापि गेहत्यागस्य शब्देनोपादानात् कुञ्जगमनवत् तस्यापि प्राधान्यं विवक्षितमिति प्रतीयते तेन च कृष्णविरहात् गेहमपि तस्या दुःसहमासीदिति, कृष्णान्वेषण-पराणां देहे इव गेहेऽपि आसक्तिः परित्यज्येति च सूचिते ।

निश्वसन्ती विशालम् इति । अत्र श्वसधातोरादादिकत्वेन शपो लुकि अदन्तत्वाभावात् "आच्छीनद्योर्नुम्" (৭।১।৮০) इत्यनेन वैकल्पिको नुम् न प्राप्नोतीति निश्वसतीति स्यात् । ततश्च निःश्वसन्त्याः पुरद्वारेण व्याकरणे प्रवेशो नास्तीति, पत्रद्वारम् अन्वेष्टव्यम् । तच्चेत्थम्—नितरां श्वसः श्वासरोगो यस्येति निश्वसः, निश्वस इव आचरतीति आचारक्विबन्तात् निश्वसेति नाम-धातोः शतृप्रत्यये अवर्णान्तत्वात् यथोक्तसूत्रेण नुमि निश्वसन्तीति सिध्यति इति । गतः प्रथमः श्लोकः ॥१॥

বঙ্গানুবাদ। [অক্রূর শ্রীকৃষ্ণকে মথুরায় লইয়া গেলে] প্রিয়তমের (শ্রীকৃষ্ণের) বিরহকাতরা নীলকমলসদৃশনেত্রা কোন গোপরমণী (রাধা) উন্মত্তার ন্যায় আলুলায়িতকেশী হইয়া দীর্ঘশ্বাস ত্যাগ করিতে করিতে সেখানেই (যমুনাকুঞ্জেই) শ্রীকৃষ্ণ আছেন এইরূপ ভ্রান্তিরূপা দূতীকে সহায় করিয়া তৎক্ষণাৎ গৃহত্যাগ পূর্বক যমুনাতীরস্থ মনোহর কুঞ্জে গমন করিলেন ॥১॥

अप्राप्यैषा व्रजपतिसुतं तत्र कालं कियन्तं
मूर्छाप्राणप्रियतमसखीसङ्गता सङ्गमय्य ।
तस्योपान्ते कुलिश-कमल-स्यन्दनाङ्कादियुक्तं
पद्माकारं मुरहरपदश्चारु चिह्नं ददर्श ॥२॥

[अन्वयः । एषा तत्र व्रजपतिसुतम् अप्राप्य मूर्छाप्राणप्रियतमसखीसङ्गता

[सती] कियन्तं कालं सङ्गमय्य तस्य उपान्ते कुलिश-कमल-स्यन्दनाङ्गादियुक्तं पद्माकारं मुरहरपदः चारु चिह्नं ददर्श ॥२॥]

टीका। एषा गोपी तत्र कुञ्जे व्रजपतिसुतं व्रजराजस्य नन्दस्य नन्दनं श्रीकृष्णम् अप्राप्य मूर्च्छा-प्राणप्रियतमसखीसङ्गता मूर्च्छारूपा या प्राणप्रियतमा सखी तया सङ्गता मिलिता तां सङ्गता प्राप्तेति वा, सती कियन्तं कालं सङ्गमय्य गमयित्वा तस्य कुञ्जस्य उपान्ते प्रान्तसमीपदेशे कुलिशकमलस्यन्दनाङ्गादियुक्तं कुलिशं वज्रं कमलं पद्मं स्यन्दनाङ्गं रथावयवः चक्रं ध्वजचक्रे वा, आदिना अङ्कुशपरिग्रहः, तैर्युक्तम्। तथा पद्माकारं पद्ममिव आरक्तकोमलम् आह्लाद-कञ्च। मुरहरपदः श्रीकृष्णस्य चरणस्य चारु मनोहरं चिह्नं ददर्श। अत्र अनन्यसाधारणत्वात् अन्यत्र अन्यदा दृष्टचरत्वाच्च चिह्ने मुरहरपदीयत्वाभिमान इति ज्ञेयम्।

अत्राशंसितदर्शनस्य मुररिपोरलाभ एव हठान्मूर्च्छागमहेतुः। केचिदेवं ब्रुवते—अत्र व्रजपतिसुतेत्यनेन राजपुत्रः श्रीकृष्णः कण्टकादिसङ्कुलदुर्गमवन-मार्गभ्रमणखिन्नः किं क्वचिदास्ते? किं वा राजपुत्रतया ग्राम्या अस्मान् पर्यत्यजत्? आहोस्वित्, सुकुमारराजकुमारतया पामरीभिर्विहारार्थपथे निरुद्ध आस्ते? इत्यादिबहुतरवितर्कव्याकुला राधा हठान्मुमूर्च्छेति। यद्यपि मूर्च्छा प्राणहारिण्यपि क्वचिद् भवति तथापि प्रकृते विरहवेदनाविस्मारकतया समुप-कारिणी सञ्जातेति तस्याः प्रियसखीसाम्यम्। न च जिहासितं विरहवेदनमिव एष्टव्यां कृष्णस्फूर्तिमपि तिरस्कुर्वती मूर्च्छा कथं राधायाः प्रियसखीपदमधिकर्तुं शक्नुयादिति वाच्यम्, "कृष्णस्फूर्तिविशेषस्तु न कदाप्यत्र लीयते" इति रसामृतसिन्धुवचनात् कृष्णस्फूर्ति-विरहवेदनयोर्भेदावगमेन विरोधस्य परिहृत-त्वात्। अन्यथा स्वाश्रयं स्थायिभावात्मकं श्रीकृष्णस्फूर्तिविशेषं विना व्यभिचारि-

भावात्मकमूर्च्छाया असम्भव एव स्यात्। सिन्धौ 'अत्रे'ति मूर्च्छादशायाम् इत्यर्थः। एतेन "ननु ज्ञातं मूर्च्छाकारणं मूर्च्छाभङ्गस्तु किंनिमित्तकः" इत्यपि प्रश्नः प्रायेण दत्तोत्तर एव। तथा च मूर्च्छादशायाम् अपि अविलीनया बलवत्या कृष्ण-प्राप्त्युत्कण्ठया गलहस्तिता मूर्च्छा झटित्यपाक्रामदिति।

अप्राप्यैवेति पाठे—अप्राप्त्यव्यवहितोत्तरक्षणे इत्यर्थः। तथा च यमुना-कुञ्जं गत्वा तत्र श्रीकृष्णमनासाद्य तदात्व एव मुमूर्च्छ न तु भ्रान्त्यन्तरदूतीसमेता स्थानान्तरगमनव्यवसायिनी बभूवेति भावः।

तस्योपान्त इति। अत्रोपान्तपदोपादानात् चतुर्थश्लोके वक्ष्यमाणा गोपी-कृता चरणचिह्नस्य दौत्यकरणेच्छोत्प्रेक्षा प्रगुणीकृतेति द्रष्टव्यम्। तथा च यथा बहिर्जिगमिषुर्जनो गृहप्रान्तवर्ती भवति तथा पदचिह्नमपि दौत्याय जिगमिषु इव कुञ्जप्रान्तमवालम्बतेति भावः।

स्यन्दनाङ्कादीति। स्यन्दनाङ्कं रथावयवः, चक्रध्वजाविति केचित्; चक्र-मित्यपरे। न चान्तिमपक्षे ध्वजस्यासंग्रहान्न्यूनतापत्तिरिति वाच्यम् अङ्कुशादीना-मिव तस्यापि आदिपदग्राह्यतायां बाधकाभावात्, कवेः सकलचरणचिह्नसंग्रह-प्रतिज्ञाया अश्रवणाच्च। अन्यथा यव-जम्बूफलादिचिह्नानामपि कण्ठोक्तेरापत्तिः प्रसज्येत। एतानि च चिह्नानि भगवतो दक्षिणस्य चरणस्येति स्कान्दवचनेभ्यो विज्ञायते। एवञ्च ज्योतिषे यातुः पुरुषस्य आदौ वामेतरचरणप्रक्षेपनियमात् चरणचिह्नस्य यियासुत्वम् अग्रिमश्लोकोक्तं विशदीकृतमिति हृदयम्। तथा दक्षिणेति शब्दच्छलात् परचित्ताराधकत्वरूपार्थप्रतीत्या राधिकेप्सितं दौत्यं तेनावश्यमङ्गीकार्यमिति च प्रतीयते। न च चरणचिह्नस्य लिङ्गानुमिततृतीय-प्रकृतिकत्वात् पुरुषानुशिष्टनियमस्य तत्र कथं प्राप्तिरिति वाच्यम् एवंविधस्थले पुरुषपदेन स्त्रीमात्रव्युदासस्य शास्त्रकृदभिप्रेतत्वव्याख्याने दोषाभावादिति।

श्रीकृष्णचरणस्य कुलिशादिचिह्नमाह स्कान्दे—

दक्षिणस्य पदाङ्गुष्ठमूले चक्रं विभर्त्यजः।
मध्यमाङ्गुलिमूले च धत्ते कमलमच्युतः॥
पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम्।
कनिष्ठामूलतो वज्रं भक्तपापातिभेदनम्॥
पार्ष्णिमध्येऽङ्कुशं भक्तचित्तद्रवणकारिणम्।

इति। बाहुल्यभयादन्यानि लक्षणान्युपेक्षितानीति ॥२॥

অনুবাদ। রাধিকা সেই কুঞ্জে ব্রজরাজ [নন্দের] পুত্রকে না পাইয়া প্রাণপ্রিয়তমা সখীরূপা মূর্চ্ছার সহিত কিছুকাল অতিবাহিত করিয়া (অর্থাৎ কৃষ্ণকে না পাইয়া কিছুকাল মূর্ছিত থাকার পর) কুঞ্জের প্রান্তভাগে বজ্র, কমল ও রথাঙ্গ (ধ্বজ ও চক্র) প্রভৃতি [চিহ্ন]যুক্ত পদ্মের ন্যায় মনোহর শ্রীকৃষ্ণের মনোজ্ঞ চরণচিহ্ন দেখিতে পাইলেন ॥২॥

तस्मिन्नुद्यन्नव-जलधरध्वानमाकर्ण्य भूयः
कन्दर्पेण व्यथितहृदयोन्मत्ततुल्या ययाचे।
प्रज्ञाहीनं वचनरहितं निश्चलं श्रोत्रहीनं
दौत्यं कर्तुं मुरहरपदो लक्षणं पक्ष्मलाक्षी ॥३॥

[अन्वयः। पक्ष्मलाक्षी [सा] तस्मिन् उद्यन्नव-जलधरध्वानम् आकर्ण्य कन्दर्पेण भूयः व्यथितहृदया [अत एव] उन्मत्ततुल्या [सती] प्रज्ञाहीनं वचनरहितं निश्चलं श्रोत्रहीनं मुरहरपदः लक्षणं दौत्यं कर्तुं ययाचे ॥३॥]

टीका। तस्मिन्नित्यादि। तस्मिन् तदानीं चिह्नदर्शनकाले इत्यर्थः, तत्र कुञ्जे वा, उद्यन्नवजलधरध्वानम् उद्यतः उद्गच्छतः नवजलधरस्य जलभरितवार्षिकमेघस्य ध्वानं गर्जितम् आकर्ण्य कन्दर्पेण कामेन व्यथितहृदया पीडितचित्ता पक्ष्मलाक्षी

प्रशस्तपद्मयुक्तनेत्रशालिनी सा भूयः पुनरपि, उन्मत्ततुल्या सती दौत्यं दूतकर्म वार्ताप्रेरणादि कर्तुं प्रज्ञाहीनम् अबोधं वचनरहितं वाक्शक्तिहीनं निश्चलं चलितुमसमर्थं श्रोत्रहीनं कर्णरहितं शब्दग्रहणासमर्थमिति यावत्, मुरहरपदः लक्षणं श्रीकृष्णस्य चरणचिह्नं ययाचे प्रार्थितवतीत्यर्थः ।

उद्यदिति । अत्र शतृप्रत्ययप्रकृतिभूतलट्प्रत्ययेन वर्तमानकालताप्रत्यायनात् नवेति विशेषणाच्च मेघोदयस्य आकस्मिकता तथा नवविशेषणाद् ध्वानस्यापि गम्भीरता प्रकटिता, तेन च तस्योद्दीपकताबाहुल्यं सूचितम् । अनेन वर्षाकालो लभ्यते, वर्षास्वेव मेघस्य नावीन्यसम्भवात् । भूय इति पुनरपीत्यर्थः, एतच्च उन्मत्ततुल्येत्यत्र अन्वेति । अत्रेदं विचिन्तनीयम्—प्रथमपद्ये उन्मत्तेवेति यदुक्तं तद् बाहुल्येन केशाद्यसंयमनिबन्धनं न तु बुद्धिविकृतिहेतुकम् अपि । यत् पुनर्भ्रान्तिदूतीसहायेति उन्मादलिङ्गतया भ्रान्तेरुपादानं तत् साधारणभ्रमाभिप्रायकं योऽस्मदादीनां स्थिरबुद्धीनामपि कदाचिद् भवति । उन्मत्तीयभ्रान्तिपरत्वे तु तदानीं कुञ्जगमनरूपं कार्यं न स्यात् । एवञ्च कादाचित्कभ्रमेण कुञ्जमागत्य सा कृष्णमन्विष्यापि यदा न प्राप्तवती प्रत्युत नवजलधरध्वानश्रवणेन कन्दर्पायत्तचित्ता जाता तदानीं पुनरपि उन्मत्ततुल्या बभूवेति भावः ।

यद्वा भूयः अधिकं यथा स्यात्तथा उन्मत्ततुल्या, 'स्तोकनम्रे'त्यादिवद् द्रव्यविशेषणत्वेऽपि क्लीवैक्यम् । आधिक्यं च प्रागुक्तोन्मादापेक्षया । यद्वा, भूयः कन्दर्पेण व्यथितहृदयेत्यन्वयः । अत्रेदं तत्त्वम् । भूयःशब्दस्य त्रयी गतिर्दृश्यते, एका आवृत्त्यर्थिका अव्ययरूपा, द्वितीया बहुशब्दादीयसौ भूरादेशे सिद्धा बहुतरार्थिका वाच्यलिङ्गा, तृतीया तु यथोक्तप्रकृतिप्रत्ययप्रक्रियासाधिताप्यलिङ्गा बाहुल्यार्थवाचिनी चेति । अत्र पुनरावृत्त्यर्थकस्य अव्ययस्य

तस्य ग्रहणम् ; तथा च पूर्वं 'विरहविधुरे'त्यनेन सकृत् सुचिता तस्याः कामबाधा नवजलधरध्वानश्रवणेन पुनरपि प्रादुर्भूतेत्यर्थः। यद्वा भूय इति नवजलधरध्वानम् इत्यस्य विशेषणम्, वहुतरं ध्वानमाकर्ण्येति तदर्थः ; तथा च यस्यैकोऽपि ध्वानः अध्वनीनान् अध्वनीनरमणीश्च कामबाधया व्यथितहृदयान् कर्तुं समर्थः तस्य बाहुल्ये तु किमु वक्तव्यम् "एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्" इति रीत्येति भावः। गतं भूयःपदविवरणम्।

कन्दर्पेण व्यथितहृदयेति। कन्दर्पः कामः। स चात्र नेन्द्रियलौल्यम् अपि तु सुविशुद्धं कृष्णप्रेम, "प्रेमैव गोपरामाणां काम इत्यगमत् प्रथाम्" इत्युज्ज्वलनीलमणयुक्तेः। अत्रोज्ज्वले कामपदम् इतिशब्दस्य पदार्थाविर्भावकत्वमतमाश्रित्य अर्थपरम् अङ्गीकार्यम् अत एव प्रकृते 'कन्दर्पेण' इत्युक्तावपि न क्षतिः ; अन्यथा काम-कन्दर्पयोर्भिन्नानुपूर्वीकतया कामस्य प्रेमप्रथायामपि कन्दर्पस्य तथात्वं न स्यादिति। प्रेमा च "स्वाभाविकान्यनिरपेक्षममताप्रेरितानुरागविशेषः"। अत एव व्यथितहृदयेत्यत्र व्यथापि न स्वसुखाभावजनिता, स्वसुखसापेक्षत्वे अन्यनिरपेक्षत्वाभावेन प्रेमत्वानुपपत्तेः। किन्तु "ईदृशे काले यदि प्रियतम इह सन्निहितः स्यात् नूनं तस्य परमानन्दोदयोऽभविष्यत, दुर्भगाहं तमीदृशमानन्दमनुभावयितुं नालमस्मि" इत्यादिरूपकृष्णसुखाभावजनिता सेति ज्ञेयम्।

उन्मत्ततुल्येति। उन्मत्तता चास्या दूतोचितेन्द्रियपाटवादिरहितस्यापि चरणचिह्नस्य भ्रान्त्या दूतीकरणादवसेया। तथापि कृष्णान्वेषणबुद्धेरक्षणिकतया प्राकृतोन्मादग्रस्तानां ज्ञानस्य प्रतिक्षणनवीनतया च ततो भेदात्तुल्यताकथनम्। ययाचे इति। याचतेर्दुहादित्वाद् द्विकर्मकतया दौत्यं कर्तुम् इति मुख्यं कर्म, लक्षणं दौत्यकरणं ययाचे इति तदर्थः, कृदभिहितभावस्य द्रव्य-

वत् प्रकाशनियमादिति भावः। यद्वा ययाचे अनुनीतवतीत्यर्थः, तथा च याच्‌ञार्थत्वाभावान्न द्विकर्मकतापत्तिः। यद्वा ययाचे वक्ष्यमाणम् अर्थम् इत्यध्याहारेणान्वयः।

प्रज्ञाहीनमित्यादि। चत्वार्येतानि चिह्नविशेषणानि दूतस्यायोग्यतासूचकानि। तत्र प्रज्ञाहीनोऽपि शुकादिः यथोक्ताक्षरम् उद्गीरयन् दूतो भवत्येवेत्यत आह वचनरहितमिति। शुकस्य वचनपाटवसत्त्वात् ततोऽस्य भेद इति भावः। वचनरहितमपि इङ्गितेन वेदयद् दौत्यं कुर्यादित्याह निश्चलमिति, चरणहीनमित्यर्थः। एवञ्च गतिहीनस्य मथुरागमनासम्भवात् प्रकृतं दौत्यं न तेन सम्पादनीयमिति भावः।

ननु ज्ञातम् भ्रान्तिवशादेव राधया चरणादिरहितत्वेन दौत्यायोग्यम् अपि पदचिह्नं दूतीकृतमिति। एवञ्च "क्रोशस्यान्ते चरणयुगलं क्षालयत् सूरजायां यायाः" इत्यादि षड्विंशश्लोकपूर्वार्धे भ्रमानुबन्धि यद् उक्तं तत् अपि सुश्लिष्टम्, परम् उत्तरार्धे "उत्कृष्टं यद् जनयति पदम्" इत्यादि कथं सुसङ्गतं स्यात् पदाभावविशिष्टस्य पदाभाववत्तया ज्ञानस्य सत्यत्वेन भ्रमविरोधित्वादिति चेत्, तदानीं तस्याः क्षणिकप्रबोधस्वीकारेण कथञ्चित् समाधानस्य एष्टव्यत्वात्। एवम् अन्यत्रापि।

निश्चलमपि तुरङ्गादिसहायेन गत्वा दौत्यं करिष्यति, यद् वक्ष्यति— "आरुह्यास्मद्धृदयमथवा गच्छ तुङ्गं तुरङ्गम्" [२७]इति, अत आह श्रोत्रहीनमिति। वधिरत्वात् सन्देशवागनाकर्णनाद् वक्तव्यविमूढतया तत्र गत्वा वा किं करिष्यतीति भावः। एतेनायं दूतः सन्देशहारकतया कवेरभिप्रेत इति ज्ञेयम्, निसृष्टार्थस्य दूतस्य भावोन्नयनमात्रेण दौत्यनिर्वाहकतया भावोन्नयनस्य चेङ्गितादिनापि सम्भवात् श्रोत्रराहित्येऽपि क्षत्यभावात्। यद्वात्र

परस्परापेक्षाहीनं प्रत्येकम् एव विशेषणं दौत्यासामर्थ्यसूचकमिति ज्ञेयम्। अत्र विशेषणानामेषां साभिप्रायतया परिकरो नामालङ्कारः।

दौत्यं कर्तुमिति; दौत्यं दूतस्य कर्म, सन्देशवाक्प्रापणमित्यर्थः। अत्र याचनकर्त्री-दौत्यकर्तृणोर्भेदेऽपि 'योद्धुं धनुरानय' इत्यादिवत् तुमुन्-प्रत्ययो द्रष्टव्यः। केचित्तु अन्तर्भूतण्यर्थतामाश्रित्य दौत्यं कारयितुम् इत्यर्थमाहुः। एतत्पक्षे तुमन्तस्य याचतिकर्मत्वं यत् प्रागुक्तं तदसमञ्जसमिव स्यादिति ज्ञेयम्।

पद्मलाक्षीति। पद्मले प्रशस्तपद्मयुक्ते अक्षिणी यस्याः सा पद्मलाक्षी। अत्र पद्मप्राशस्त्येन नयनप्राशस्त्यं व्यङ्ग्यम्, तेन च कृष्णप्रेमास्पदत्वं सूचितम्। तथा दिव्यनयनाया भ्रान्तिं विना तादृगयोग्यनियोगे प्रवृत्तिर्न भवतीति भ्रान्त्या लिङ्गेन उन्मत्ततापि प्रसाधिता ॥३॥

অনুবাদ। তৎকালে উদ্ভূত নবমেঘের [গভীর] গর্জন শ্রবণ করিয়া সুনয়না রাধা কৃষ্ণপ্রেমে অতিশয় ব্যাকুলা হইয়া উন্মত্তার ন্যায় [ভ্রমবশতঃ] অবোধ, মূক, নিশ্চল (গতিহীন) বধির শ্রীকৃষ্ণের পদচিহ্নকে দৌত্য করিবার জন্য প্রার্থনা জানাইলেন ॥৩॥

रम्यं यावन्मुरहरपदे शोभते तावदेव
त्वय्यप्यास्ते कुलिश-कमल-स्यन्दनाङ्गादि चिह्नम्।
गोपीदौत्यप्रकटनभिया सन्निधौ चक्रपाणे-
र्जाने धीरप्रमुख मुखरो नूपुरो नो गृहीतः ॥४॥

[अन्वयः। मुरहरपदे कुलिश-कमल-स्यन्दनाङ्गादि यावत् रम्यं चिह्नं शोभते, तावत् एव त्वयि अपि आस्ते। [हे] धीरप्रमुख, [अहं] जाने [यत्], चक्रपाणेः सन्निधौ गोपीदौत्यप्रकटनभिया मुखरः नूपुरः नो गृहीतः ॥४॥]

टीका। रम्यं यावदिति। मुरहरपदे कुलिश-कमल-स्यन्दनाङ्गादि यावत्

रम्यं चिह्नं शोभते, त्वयि पदचिह्ने अपि तावत् एव तत्समस्तमेव आस्ते, विना नूपुरम् इति शेषः। अत्र शोभते इत्यनेन आस्ते इत्यनेन च कृष्णपदाश्रिततया चिह्नानां यथा शोभा सञ्जाता कृष्णविनाकृते त्वयि तु तेषां न तथेति प्रत्यायनात् यथोक्तशोभासम्पत्त्यर्थम् अवश्यं त्वया कृष्णसमीपे गन्तव्यमित्याशयः प्रकटीकृतः। अत्र रम्यमिति चिह्नानां स्वाभाविकशोभाकथनम्, शोभत इत्यनेन च कृष्णचरणसान्निध्यजनितशोभाकथनम् इति न पौनरुक्त्यम्। चिह्नमिति जात्याख्ययैकवचनम्। अथैवं नूपुरः कथं न दृश्यते? इत्याह गोपीदौत्येत्यादि। चक्रपाणेः श्रीकृष्णस्य सन्निधौ समीपे गोप्या मम सम्बन्धे यद् दौत्यं त्वदीयो दूतभावः तस्य यत् प्रकटनं पौरेषु बहुलीभावः "चरणचिह्नमिदं राधाया दूतं भूत्वा कृष्णसमीपे समागतम्" इत्येवंरूपः प्रकाश इति यावत्, तस्य भिया भयेन मुखरः शब्दायमानः वाचाल इति छलितोऽर्थः, नूपुरः चरणालङ्कारविशेषः नो गृहीतः न धृत इत्यर्थः, इत्यहं जाने सम्भावयामीति वाक्यार्थः कर्म। हे धीरप्रमुख धीरप्रधान! इति चिह्नसम्बोधनम्। मुखरो हि धीरेभ्यो न रोचते इत्याशयः। अत्र चक्रपाणेः सन्निधौ इति गोपीदौत्यस्याधिकरणं न तु तत्प्रकटनस्य स्ववचोव्याघातापातात्।

दौत्यं नाम गोपनीयं कर्म, तस्य प्रकाशे यो दूतं प्रेषयति यमुद्दिश्य च प्रेषयति तयोरुभयोरेव कार्यक्षतिर्भवति, मुखरश्च बहुभाषणव्यसनितया सर्वं प्रकाशयतीति च वस्तुस्थितिः। एवं स्थिते तव मुखरनूपुरपरित्यागमाकलय्य त्वं मम दौत्याय सन्नद्धमिति सम्भावयामि इति भावः। मुखरशब्दच्छलितोऽयमर्थः, वस्तुतोऽत्र शब्दायमानतारूपैव मुखरतेति द्रष्टव्यम्। धीरप्रमुख इति च हेतुगर्भसम्बोधनपदम्, तथा च यथा मुखरनूपुरपरित्यागेन अनुक्तमपि तव दौत्यसन्नाहं तर्कयामि तथा धीरतयापीत्यर्थः; धीरो हि वाचा अवदन्नपि

प्रार्थिकार्य सम्पादयतीति दृष्टचरम्। तथा च मेघदूते "प्रत्यादेशान्न खलु भवतो धीरतां तर्कयामी"ति, "प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैवे"ति च।

एवं सामोपायेन सन्तोष्य भयमपि दर्शयितुमाह चक्रपाणेरिति। यत्र त्वया सन्देशान्तरं वेदनीयं स सर्वदा सन्निहितचक्रो वर्तते अतस्तत्र दौत्य-प्रकाशादिरनुचितव्यापारो यथा न भवेत् तथा त्वया सावधानेन भवितव्यम्। यथोक्तं नीतिशास्त्रे—

"शृङ्गिणाञ्च नदीनाञ्च नखिनां शस्त्रपाणिनाम्।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च॥" इति

एकतस्तद् राजकुलम् अपरतश्च शस्त्रपाणिरिति सर्वथा भयस्थानमेवेति भावः। दौत्यप्रकाशस्य अनौचित्यं च इत्थम्—कृष्ण इदानीं राजसिंहासने वर्तते, तस्य चेदं गोपीप्रणयरूपम् अवदानं पौरेषु प्रकाशतां गतं तस्य मर्यादां लघये-देवेति यथा कृष्णपक्षे नोचितस्तत्प्रकाशः तथा परोढयापि राधया व्रजराजाय सन्देशः प्रेष्यत इति मत्पक्षेऽपि तदनौचित्यमिति भावः। एतेन कृष्णाद् भयं न तु प्रकटनादिति स्थिते 'प्रकटनभिये'त्यत्र प्रकटनस्य भीरिति सम्बन्ध-सामान्यलक्षणषष्ठ्याः समासः, न तु 'पञ्चमी भयेन' इति पञ्चमीसमासः। एवञ्च "गतिकारकेतरपूर्वपदस्य यण् नेष्यते" इति वार्त्तिकानुसारेण "एरने-काचोऽसंयोगपूर्वस्ये"त्यनेन प्राप्तं यणं बाधित्वा यथोक्तं रूपं सिध्यति। कारक-पूर्वपदत्वे तु ग्रामण्यादिवत् 'प्रकटनभ्या' इति रूपं भवेत्। केचित्तु गोपी-दौत्याय यत् प्रकटनं गमनं तत्र या भीः परतो भयं तेन हेतुना इति व्याचक्षते। तन्मते "कट गत्याम्" इत्यस्माद् भावेऽनटि प्रकटनपदसिद्धिः।

अत्रेदम् आलोचनीयम्—कुलिश-कमल-स्यन्दनाङ्गादि चिह्नम् इति यच्चरण-चिह्नस्य चिह्नमुक्तं तत् पदतलवर्तिरेखाकारचिह्नाभिप्रायम् एवञ्च पादपृष्ठवर्तिनो

নূপুরস্য কথমত্র প্রসক্তির্ভবেৎ যেন নূপুরাভাবং নিমিত্তীকৃত্য চরণচিহ্নস্য দৌত্যোন্মুখত্বং দৌত্যপ্রকটনভয়ং বা রাধয়া অনুমিতম্। পুরাণাদিষ্বপি চরণচিহ্নগণনায়াং নূপুরস্য সমুল্লেখো নোপলভ্যতে তস্য চরণালঙ্করণতয়ৈব সংগৃহীতত্বাদিতি। ন চৈতদপি ভ্রান্ত্যা এব রাধয়া ন গণিতমিতি বাচ্যম্ ঈদৃশার্ধজরতীয়ভ্রমে কারণানুল্লেখাৎ। সত্যম্, অয়মর্থঃ পদশব্দশ্লেষোত্থাপিতঃ কবিনা স্বশক্তিপ্রকটনায় নিবদ্ধ ইতি দ্রষ্টব্যম্। যদ্বা, চরণপৃষ্ঠবর্তী নূপুর এব রাধায়াশ্চিরং দৃষ্টচর ইতি অন্যমনস্কয়া রাধয়া তথোক্তমিতি ন দোষঃ ॥৪॥

অনুবাদ। [হে চিহ্ন!] কৃষ্ণের চরণে বজ্র পদ্ম চক্র প্রভৃতি যতগুলি মনোহর চিহ্ন শোভা পাইয়া থাকে, তোমাতেও [নূপুর ভিন্ন] ততগুলি চিহ্নই বর্তমান রহিয়াছে। আমার মনে হয়, কৃষ্ণের সমীপে গোপীদিগের এই [যে] দৌত্যকার্য [ইহার] প্রকাশ আশঙ্কায় (অর্থাৎ এই দৌত্য যাহাতে প্রকাশ না পায় এই জন্য) হে ধীরশ্রেষ্ঠ, মুখর (শব্দকারী) নূপুরটীকে তুমি গ্রহণ কর নাই ॥৪॥

যুক্তঞ্চৈতৎ ত্বয়ি মধুপুরীং প্রস্থিতে পুণ্যশীলাঃ
পশ্যন্তস্ত্বাং নয়নসুভগং সাশ্রুধারাক্ষিযুগ্মম্।
কীলালোত্থৈঃ সুরভিকুসুমৈরর্চয়ন্তোঽপি ভক্ত্যা
যাস্যন্ত্যুচ্চৈঃ পুলকিততনুপ্রেমধারামুদারাম্ ॥৫॥

[অন্বয়ঃ। এতৎ যুক্তং চ, [যতঃ] ত্বয়ি মধুপুরীং প্রস্থিতে [সতি] পুণ্যশীলাঃ সাশ্রুধারাক্ষিযুগ্মং নয়নসুভগং ত্বাং পশ্যন্তঃ, কীলালোত্থৈঃ সুরভিকুসুমৈঃ ভক্ত্যা অর্চয়ন্তঃ অপি উদারাম্ উচ্চৈঃপুলকিততনুপ্রেমধারাং যাস্যন্তি ॥৫॥]

टीका। ननु दौत्यं नामानुजीविजनोचितं कर्म, जनास्तन्न प्रशंसन्तीति कथं मया तादृशम् असदृशं कर्म कार्यम् इत्याह युक्तञ्चैतदिति। एतत् दौत्यं तव युक्तं योग्यं च, न केवलं परदुःखप्रहाणवासनयेदम् अफलकर्मवदगत्याऽनुष्ठेयम् अपि तु सुसदृशतयाऽपीति चकारसमुच्चितोऽर्थः। सुसदृशं च कार्यं सर्वैरेवानुष्ठेयमित्याशयः। युक्तत्वमेव विवृणोति त्वयीति। त्वयि चरणचिह्ने मधुपुरीं यदुराजधानीं प्रस्थिते गते सति पुण्यशीलाः पुण्यवन्तो जनाः तत्रत्या इति शेषः, साश्रुधाराक्षियुग्मं साश्रुधारम् अश्रुधारासहितम् अक्षियुग्मं यत्र दर्शनक्रियायां तद् यथा स्यात् तथा नयनसुभगं नेत्रप्रीतिप्रदं त्वां पश्यन्तः, तथा कीलालोत्थैः तोयोत्पन्नैः सुरभिकुसुमैः सुगन्धिपुष्पैः कमल-कुमुद-कह्लारादिभिः भक्त्या अर्चयन्तोऽपि पूजयन्तश्च, अपिश्चार्थे, उदारां महतीम् उच्चैःपुलकिततनुप्रेमधाराम् उच्चैःपुलकिता गाढतररोमाञ्चयुक्ता या तनुः तस्यां या प्रेमधारा प्रेमजन्यः स्वेदप्रवाहः तां यास्यन्ति प्राप्स्यन्तीत्यर्थः। यत्प्रसङ्गाद् जनानाम् ईदृशः कृष्णभक्त्युद्रेकः स्यात् तद् दौत्यं कथं तव अयोग्यमिति भावः।

अत्र पुण्यशीला इत्यनेन अकृतपुण्यानां श्रीकृष्णचरणचिह्नदर्शनं न भवतीति, कथञ्चिद् दृष्टेऽपि यथोक्तप्रेमधाराद्युदयो न भवतीति च व्यज्येते। एवं च अवजानन्तु नाम पामराः सन्तस्तु त्वाम् आदरिष्यन्त एवेति भावः।

साश्रुधाराक्षियुग्ममिति साश्रुधारम् अक्षियुग्मं यत्र विषये इति विगृह्य त्वाम् इत्यस्य विशेषणं केचिदाहुः। उच्चैःपुलकिततनुप्रेमधारामित्यत्र प्रेमधारा अश्रुरूपैवेति च परे। तत्र प्रागुक्ताश्रुधारया सहास्य पौनरुक्त्यं कथं निरसनीयम् इति चिन्त्यम्। एते च अश्रु-पुलक-स्वेदाः सात्त्विकभावाः। यदुक्तम्—

"स्तम्भः स्वेदश्च रोमाञ्चः स्वरभेदोऽथ वेपथुः।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः॥" इति।

प्रस्थित इति अतीतकालिकक्तप्रत्ययेन त्वयि मधुपुरीं प्राप्ते इत्यर्थं आयाति, तेन माथुरा एव जनाः कुलिशकमलादिलिङ्गेन कृष्णचरणचिह्नं ज्ञात्वा पूजयिष्यन्तीत्याशयः सूच्यते। केचित्तु प्रस्थिते इत्यस्य प्रतिष्ठमाने इत्यर्थं कल्पयन्तः चरणचिह्नस्य मार्गव्यापारोऽनेन श्लोकेनोक्त इत्याहुः। एतन्मते आदिकर्मणि क्तः। कीलालोत्थैरित्यनेन पथिश्रान्तिहरणयोग्यत्वं पुष्पाणां सूचितम्।

पश्यन्तः इति अर्चयन्तोऽपीति च। एतेन पूर्वं दर्शनं ततश्च पूजनमिति शिष्टाचारोऽपि दर्शितः। अत एव समुच्चयार्थकोऽपिशब्दोऽपि अर्चयन्त इत्यतः परमेव निवेशितः। एतत् सर्वमवज्ञाय केचिदिदं पद्यं द्वितीयतृतीयचरणयोर्व्यत्ययेन पठन्ति। तेषाम् अयम् आशयः—यद्यपि शाब्दक्रमादार्थक्रमो बलवान् इत्यस्ति नियमः तथापि अनुप्रासलालसया कविना स नियमस्तृणीकृतः। कथम् अन्यथा सुगममपि "तोयोत्पन्नै"रिति पदम् अपहाय कीलालोत्थैरिति दुर्गमपदं सन्निविष्टं तेनेति ॥५॥

অনুবাদ। এই দৌত্যকার্য তোমার উপযুক্তও বটে। [কারণ] তুমি মধুপুরে গমন করিলে পুণ্যবান্ [লোকেরা] সাশ্রুধার নেত্রে নয়নরম্য তোমাকে দর্শন করিয়া এবং ভক্তিসহকারে জলজ পুষ্প দ্বারা [তোমার] পূজা করিয়া বিপুল-পুলকিত শরীরে [কৃষ্ণ] প্রেমজনিত বিশাল ঘর্মধারা বহন করিবে (অর্থাৎ তাহাদের শরীরে সাত্ত্বিক ভাবসমূহের উদ্গম হইবে) ॥৫॥

चेतः प्रस्थापितमणुतया दौत्यकर्मोपयुक्तं
तत्रैवास्ते मुरहरपदस्पर्शमासाद्य मुग्धम्।
आकाङ्क्षेयं तनुगुरुतया नैव गन्तुं समर्था
कोऽन्यो गच्छेद् बत मधुपुरीं गोपिकानां हिताय ॥६॥

[अन्वयः। अणुतया दौत्यकर्मोपयुक्तं प्रस्थापितं चेतः मुरहरपदस्पर्शम्

आसाद्य मुग्धं [सत्] तत्रैव आस्ते । इयम् आकाङ्क्षा तनुगुरुतया गन्तुं नैव समर्था । बत अन्यः कः गोपिकानां हिताय मधुपुरीं गच्छेत् ? ॥६॥]

टीका । नन्वन्यः पटुकरणः कश्चन दूतो नियुज्यताम् इत्याह चेत इति । अणुतया अतिक्षुद्रतया दौत्यकर्मोपयुक्तं सन्देशहरणायोग्यं मत्वा इति शेषः । क्षुद्रस्य लघुशरीरत्वात् सन्देशहारकस्य आवश्यकं गमनागमनं तेन सुलभम् इति दौत्यकर्मोपयुक्तत्वं चेतस इति भावः । प्रस्थापितम् आत्मीयत्वाभिमानेन कृष्ण-समीपे प्रेषितम् इतःपूर्वम् इति शेषः, अस्माकं चेतः मुरहरपदस्पर्शं श्रीकृष्ण-चरणसम्पर्कम् आसाद्य मुग्धं सत् तत्रैव मधुपुर्याम् एव, यद्वा श्रीकृष्णचरण एव आस्ते, न ततः प्रत्यागच्छतीत्यर्थः । अत्र मुग्धम् इति मूढवत् विस्मृत-स्वकार्यम् इत्यर्थः, तथा च तत्र गतम् अपि चेतः अस्मद्वाचिकं श्रीकृष्णाय न न्यवेदयदिति प्रतिभाति, तच्चेदागतं स्यात् तदा सर्वमिदं ज्ञातुम् अस्माभिः शक्येतेति भावः । अत एव आस्तां मनस्तत्रैव, मा नाम ततः प्रत्यागच्छत्वपि, का भवतीनां क्षतिरिति पर्यनुयोगोऽपि निरस्तः । तथाहि अत्र दौत्यकर्मणो द्वैविध्यम् अभ्युपेयम् एकं प्रेषकस्य स्वोद्दिष्टस्थानगमनम् अपरं स्ववाचिक-निवेदनम् इति । तत्र गोपीभिः प्रेषितं मनस्तासाम् उद्दिष्टायां मधुपुर्यां गतम् इति निश्चप्रचम् एव, वाचिकं पुनर्न्यवेदयन्न वेत्यत्र विप्रतिपत्तिः, सा च यथोक्तार्थकेन मुग्धमिति मनोविशेषणेनैव ताभिर्निराकृतेति ज्ञेयम् ।

अत्र अणुतयेत्यस्य क्षुद्रतया तस्य च नीचतयेति लक्षितलक्षणया अर्थः, तथा च नीचस्यायं स्वभावः यत् स्वसुखपारवश्यं प्राप्य परकार्यं विस्मरतीति चेतसस्तिरस्कारात् दौत्यायोग्यत्वमपि सूचितम् । एवञ्च यदेव क्षौद्र्यम् अस्माभि-र्दौत्योपकारकतया निर्धारितं तदेव प्रत्युत अस्मद्भाग्यवैगुण्याद् दौत्यविघटकं जातम् इति "दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः" इत्यादिवद् व्याघाता-

लङ्कारोऽपि व्यज्यते। अत्र पक्षे अणुतयेत्यस्य आस्ते इत्यनेनान्वयः। एवं महत्यपि विरहे गोपीनां मनः श्रीकृष्णचरणादिदानीमपि न प्रच्युतम् इति पारमार्थिकोऽर्थः।

गतम् एकम् आत्मीयम्, आत्मीयान्तरमाह—आकाङ्क्षेति। इयम् अनुभूयमाना आकाङ्क्षा कृष्णदर्शनलालसा अस्माकम् आत्मीयेति भावः, तनुगुरुतया तनौ देहावच्छेदे गुरुः महती तनुगुरुः तस्या भावः तया, यद्वा तनोः गुरुतया स्थौल्येन, गन्तुं मधुपुरीं प्रयातुं नैव समर्था। तथा च गुरोर्गमनम् असुकरम् इति आत्मीयापि आकाङ्क्षा दौत्ये नियोक्तुं नैव शक्यत इति भावः। अत्र तनुगुरुरिति विरोधाभासः।

अस्माकं मनश्चेत् कृष्णं त्यजति कृष्णप्राप्तिलालसारूपा आकाङ्क्षा वा अस्मान् जहाति तदास्माकं किमपि दुःखं न स्याद् दूतप्रेषणम् अपि न प्रयोजनीयतां धत्ते, परम् अस्मद्भाग्यवैगुण्याद् एकतममपि न भवतीति प्रच्छन्नः स्वादृष्टोपालम्भः प्रकृतश्लोकेन क्रियते।

अस्माकम् आत्मीयेषु एकं क्षुद्रतया द्वितीया महत्तया दौत्यासमर्थम् इति त्वां विना अन्यः कोऽपि नास्तीत्याह—कोऽन्य इति, ईदृशे व्यतिकरे सतीति योजनीयम्। अन्यः कः त्वां विनेति शेषः, गोपिकानाम् अस्माकं हिताय मङ्गलार्थं मधुपुरीं गच्छेत्, वत इति खेदे। 'वदे'ति पाठे त्वमेव नः शाधीत्यर्थः।

तनुगुरुतयेत्यत्र तनुपदम् आकाङ्क्षायाः प्रकृतिगौरवनिरासकतया सार्थकं द्रष्टव्यम्। एतदेव कवेरभिप्रेतमिति प्रतिभाति; अन्यथा "नैव गन्तुं समर्था" इत्यपहाय "आकाङ्क्षेयं नहि गुरुतया दौत्यकृत्ये नियुक्ता" इत्येव तेन लिखितं स्यात्, प्रकृत्या गुरोर्नियोगस्य प्रत्यवायजनकत्वात्। आकाङ्क्षायाः प्रकृतिगौरवविरहश्च गोपीनां कृष्णप्राप्तिवासनारूपायास्तस्या लोकदृष्ट्या परपुरुषमात्रविषयक-

त्वादिति कथञ्चिदुन्नेयम् । कंसं हत्वा समधिष्ठितनृपासनस्य श्रीकृष्णस्य गोपीभिः प्राप्तिवासना तनुगुर्वी तु भवत्येवेति भावः ॥६॥

অনুবাদ। অতিক্ষুদ্র বলিয়া দৌত্যকর্মের উপযুক্ত বিবেচনায় [আমাদের] মনকে [পূর্বে শ্রীকৃষ্ণের নিকট] পাঠাইয়াছিলাম, [কিন্তু] সে শ্রীকৃষ্ণের চরণস্পর্শলাভে মুগ্ধ হইয়া সেই থানেই রহিয়া গেল। [আমাদের কৃষ্ণপ্রাপ্তি-বাসনারূপ] এই আকাঙ্ক্ষা স্থূলাকৃতি বলিয়া চলিতে পারে না। হায়, গোপিকা-দিগের হিতের জন্য [তুমিভিন্ন] আর কে মধুপুরী যাইবে? ॥৬॥

आगन्तव्यं झटिति मथुरामण्डलाद् गोपकान्ते
शान्तेति त्वं भव मधुरिपुः प्रस्थितः प्रोच्य चेदम् ।
वाक्यं तच्च श्रवणमभवत् तेन मेने क्रमाङ्क
प्रायः सत्यं मतमिदमहो कारणं कार्यमेव ॥७॥

[अन्वयः । "हे गोपकान्ते, [मया] झटिति मथुरामण्डलात् आगन्तव्यम्" इति, "त्वं शान्ता भव" इदं च प्रोच्य मधुरिपुः प्रस्थितः । तच्च वाक्यं श्रवणम् अभवत्, हे क्रमाङ्क, अहो, तेन 'कार्यं कारणम् एव' इदं मतं प्रायः सत्यं मेने ॥७॥]

टीका। न च—

तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः ।
सान्त्वयामास सप्रेमैरायास्य इति दौत्यकैः ॥ ॥ [भा० १०-३६-]३५

इति भागवतवचनानुसारात् स स्वयमेव आगमिष्यतीति व्यर्थं तत्र दूत-प्रेषणमिति वाच्यम् तद्वाक्यानुसारेण इदानीमपि तस्यानागमनाद् अतः परमपि तस्यागमने का प्रत्याशेति तद्वचनं मिथ्यैव कल्पनीयमित्याह—आगन्तव्यम् इति। हे गोपकान्ते, गोपो मल्लक्षणो जनः कान्तः प्रेमास्पदं यस्याः

तस्याः सम्बुद्धौ हे मयि स्नेहशीले, यद्वा, गोपस्य मम प्रियतमे, मया झटिति शीघ्रं मथुरामण्डलात् मथुरापुर्याः आगन्तव्यम् इति, अत्र अत इत्यध्याहार्यम् , अतः कारणात् त्वं शान्ता शमवती भव प्रसन्नान्तःकरणा भवेति यावत्। इदं च एतद् वचनं च प्रोच्य उक्त्वा मधुरिपुः प्रस्थितः वृन्दावनान्मधुपुरीं जगाम। अत्र इतिशब्दस्य पदार्थाविर्भावकत्वं चकारस्य च समुच्चयार्थत्वं द्रष्टव्यम्, तथा च न केवलं मथुरामण्डलाद् आगन्तव्यम् इत्येव तेनोक्तं त्वं शान्ता भव इति चोक्तम् इत्यर्थः। अगत्या एष एव पन्था आश्रयणीयः, इतिशब्दस्य हेत्वर्थताश्रयणे तु चकारस्य वैयर्थ्यं दुष्परिहरं स्यात्। तथापि तयोरस्थानस्थपदता तदवस्थैव स्थिता। अत्र गोपकान्ते इत्यत्र यथोक्तसमासद्वयघटितार्थद्वयेन प्रेम्णः उभयनिष्ठत्वप्रत्यायनात् आगमनस्य आवश्यकता दृढीकृतेति द्रष्टव्यम्।

तत् आगन्तव्यम् इत्यादि वाक्यं च श्रवणं कर्णशष्कुल्यवच्छिन्नम् आकाशं मिथ्येति फलितार्थः, अभवत् अद्य यावदिति शेषः। अत्र चकारस्त्वर्थः विरोधे द्रष्टव्यः। श्रवणमभवदित्युक्तेरयमभिप्रायः—कविना प्रतिपिपादयिषितस्य कार्यकारणयोरभेदस्य मूलं तावद् राधिकायाः कर्णशष्कुल्यवच्छिन्ने आकाशे (श्रवणे) जायमानः कृष्णस्य 'आगन्तव्यम्' इति शब्दः, तथा च राधिकायाः समीपे समुच्चारितः कृष्णस्य 'आगन्तव्यम्' इति शब्द एव मिथ्या जातः, न तु कृष्णोक्तं वा राधिकाश्रुतं वा शब्दान्तरम् अपि। अत एव 'वाक्यं चेदं गगनमभव'दिति सामान्यतः कविना न लिखितमिति। हे क्रमाङ्क पदचिह्न, यद्वा पादविक्षेपचिह्न, "क्रमः शक्तौ परीपाट्यां क्रमश्चरण-कल्पयोः" इति कोषः। तेन हेतुना कृष्णस्य आगन्तव्यम् इति शब्दस्य शून्य-त्वेन हेतुना कारणं समवायीति शेषः उपादानकारणम् इत्यर्थः, तस्यैव कार्या-

भिन्नतया वादिभिरावेदितत्वात् ; कार्यम् एव न तु ततो भिन्नम् इत्यर्थः, इदं मतं साङ्ख्याचार्यादीनामिति शेषः, प्रायः बाहुल्येन अद्य यावदिति यावत्, सत्यं मेने अहं मन्ये स्म। अत्र अतीतकालनिर्देशेन क्रियाया निष्पत्तिप्रत्यायनादिदं मम मननं दृढमूलमिति गोप्या प्रतिपादितम्। अस्मत्कर्तृके लिटः प्रयोगस्तु राधिकायाश्चित्तविक्षेपात् कथञ्चित् समाधातव्यः। मन्ये इति क्वचित् पाठः।

प्रायःपदस्यायमाशयः—कृष्णः स्ववचनरक्षार्थम् इदानीमपि नागत इति मया कार्यकारणयोरभेदवादिमतं सत्यं मन्यते। दूतप्रेषणादिरूपोद्बोधकसमवधानेन वा अस्मत्कृतसख्यस्य स्वयं स्मरणेन वा यदि इतः परं स आगच्छेत्तदा तु एतत् मतं सत्यं न मन्तव्यमिति। कृष्ण आगमिष्यति वा नवेति संशय एव प्रायः इत्युक्तेः कारणम् अन्यथा यदि कृष्णो नागमिष्यतीति राधिकया निश्चितं स्याद् दूतप्रेषणम् अपि तदा व्यर्थं भवेत् कृष्णानयनैकहेतुत्वात्तस्येति भावः। अहो इति खेदे। सखेदम् एव मयैतन्मतमभ्युपेयते इत्यर्थः। तथा च एतन्मतं तदैवाभ्युपगन्तुं शक्यते यदि कृष्णवचनं वितथं कल्पितं भवेत् तच्च मे नितरां खेदकारणमिति भावः।

शब्दः समवायसम्बन्धेन आकाशे जायते इति आकाशः शब्दस्य समवायिकारणम्। एवमपि सर्वैः सर्वः शब्दो न श्रूयते, यः शब्दो यस्य कर्णदेशे उत्पद्यते स तेन गृह्यते। कर्णश्च कर्णशष्कुल्यवच्छिन्न आकाश एव, न तु कर्णश्रवणादिपदेन लोकैर्व्यवह्रियमाणं दृश्यमानं वस्तु, "अतीन्द्रियम् इन्द्रियं भ्रान्तानाम् अधिष्ठाने" [सांख्यसूत्रम्] इत्याद्यभियुक्तवचनप्रामाण्यात्, अविकृतेऽपि तस्मिन् केषाञ्चित् शब्दाग्रहणात्, नष्टेऽपि शब्दग्रहणाच्च। अत्र च कार्यकारणयोरभेदवादिमते कारणादाकाशात् कार्यं शब्दोऽपृथगेव ; आकाशश्च

शून्यं तेन च निरर्थकता व्यञ्जयति अभेदवादिमतमाश्रित्य कृष्णवचसि राधया मिथ्यात्वम् आरोप्यते ।

कार्यकारणयोरपृथग्भावश्च सत्कार्यवादस्य अन्यथा अनुपपत्त्या साङ्ख्याचार्यादिभिरभ्युपेयते । तेषां मते नाशः कारणलयः न तु वस्तुनः अभावः, उत्पत्तिश्च कारणात् पृथग्भाव आविर्भाव इति यावत्, न त्वसतः करणम् । तथा च यथा कूर्मशरीरे सन्त्येव करचरणादीन्यङ्गानि तच्छरीरक्रियया आविर्भवन्ति एवमेव सन्नेव मृत्तिकायां घटः कारणव्यापारेण प्रकाशमान उत्पद्यत इति लोकैर्व्यवह्रियते । न तु कारणाद् मृत्तिकाया घटः किमपि पृथग् वस्तु इति ।

केचिदेवमाहुः, अस्य श्लोकस्य यथाश्रुतार्थपरतास्वीकारे दूतस्य मनस्येवमपि कदाचित् उदियाद् यत् यस्तावत् स्ववचोरक्षार्थम् अपि नागतः स त्वदनुशिष्टेन मदुक्तेन वचसा आगमिष्यतीति कः प्रत्ययः ? तस्माद् व्यर्थो मे गमनप्रयास इत्यस्य व्याख्यानान्तरमेष्टव्यम् । तच्चेत्थम्—"वाक्यं तच्च श्रवणमभवत्तेन" इत्यत्र 'अभवत्तेन' इत्येकं समस्तं पदम्, भवतः (=पदचिह्नस्य तव) तत्= (दौत्यं) भवत्तत् न भवत्तत् अ-भवत्तत् तेन=अभवत्तेन भवतो दौत्यमन्तरेणेत्यर्थः । अत्र पक्षे श्रवणमित्यस्य स्यादित्यध्याहृत्य अन्वयः करणीयः । तथा च भवतो दौत्यमन्तरेण तद्वाक्यं श्रवणं व्यर्थं स्यात् । कृते तु भवता दौत्ये तद्वाक्यं विफलं नैव भविष्यतीति ।

अयमत्राशयः—कृष्णेन गमनकाले दूतद्वारा प्रेषितेन 'आयास्ये' इति वाक्येन गोप्यः सुस्थिरीकृताः न तु स्वयम्, तथा च स्वयमनुक्त्वा दूतेन वाक्यप्रेषणे कृष्णस्यायमाशयो गोपीभिरुद्भावितो यद् यथाकालं युष्माभिर्दूते प्रेषिते अहमागमिष्यामीति । एवञ्च दूतप्रेषणापेक्षमेव तदागमनमिति न व्यर्थं पदचिह्नस्य मथुरागमनम् इति ।

ननु "तास्तथा तप्यतीर्वीक्ष्य" इत्यादिभागवतवचनेन ताः सर्वाः प्रत्येव कृष्णेन सान्त्वनं प्रयुक्तमित्यायाति, ततश्च 'गोपकान्ते' इति 'शान्तेति त्वं भव' इति चैकवचनप्रयोगः कथमुपपद्यतामिति चेदित्थम्—योगमायाप्रभावेन भगवता अन्यालक्षितं प्रत्येकमेव समुद्दिश्यैतद् वाक्यमुक्तम् ; गोपीभिस्तु मां प्रत्येवायं सन्देशः प्रेषित इति ज्ञातम् अतो राधयापि स्वमात्राभिप्रायेण एकवचनं प्रयुक्तमिति न दोषः ।।৭।।

অনুবাদ। 'হে গোপকান্তে, আমি শীঘ্রই মথুরানগর হইতে আসিতেছি' ইহা [বলিয়া] এবং 'তুমি শান্ত হও' ইহাও বলিয়া শ্রীকৃষ্ণ [বৃন্দাবন হইতে] প্রস্থান করিয়াছেন। [তাঁহার] সেই বাক্য শ্রবণ (কর্ণবিবরবর্তী শূন্য প্রদেশ, অর্থাৎ নিরর্থক) হইয়াছে ; অতএব হে পদচিহ্ন, 'কারণ কার্যই' এই মতটী প্রায় সত্য বলিয়াই আমি দুঃখের সহিত মনে করিয়াছি ॥৭॥

तूर्णं तस्यां गमनमुचितं तेन मे तद्वियोग-
व्याधेः शान्तिस्तव च भविता तत्पुरीस्पर्शपुण्यम् ।
वृन्दारण्याद् भवतु सुकृतं भूरि तेनैव किं स्या-
न्नाकाङ्क्षा किं भवति विपुलश्रीमतोऽर्थान्तरेषु ॥८॥

[अन्वयः । तस्यां [तव] तूर्णं गमनम् उचितम् । तेन मे तद्वियोगव्याधेः शान्तिः [भविता] तव च तत्पुरीस्पर्शपुण्यं भविता । वृन्दारण्याद् भूरि एव सुकृतं भवतु, तेन किं स्यात्, विपुलश्रीमतः अर्थान्तरेषु किम् आकाङ्क्षा न भवति ? ।।৮।।]

टीका । एवं दौत्यमन्तरेण श्रीकृष्णागमनस्यासम्भाव्यता प्रतिपादिता । इदानीं "पिब निम्बं प्रदास्यामि खलु ते खण्डलड्डुकम्" इत्युक्तदिशा स्वगतफलतिरस्कारेण दूतः फलेन प्रलोभ्य दौत्योन्मुखः क्रियते तूर्णम् इति। अत्र यद्यपि 'मे

तद् वियोगव्याधेः शान्तिर्भविता' इति स्वगतफलमप्युक्तं तथापि दूतगतपुण्य-प्रदर्शनस्यैव वाक्यशेषत्वेन प्राधान्यमवगन्तव्यम् ।

तस्यां मथुरापुर्यां तूर्णं शीघ्रं गमनं तत्रेति शेषः, उचितं न्याय्यम् । 'श्रेयांसि बहुविघ्नानी'त्युक्तेः 'शुभस्य शीघ्रमशुभस्य कालहरणमि'त्युक्तेश्च पुण्यजनकेऽस्मिन् कर्मणि त्वया विलम्बो न कर्तव्य इति भावः । केचिदाहुः—अहमिदानीं नवम्यां दशायां वर्ते इति मूर्छयैव त्वयाऽवगतम्, अतः परमपि यदि विलम्बः क्रियते तदा नूनमहं न भविष्यामीति युक्तं त्वया त्वरितुमिति । कथम् उचितम् ? इत्याह तेनेति । तेन तत्र तव गमनेन मे राधिकायाः तद्वियोगव्याधेः तस्य मत्कान्तत्वेन प्रसिद्धस्य, यो वियोगः तज्जनितो यो व्याधिः, यद्वा स एव व्याधिः तस्य श्रीकृष्णविरहजन्यपीडाया इत्यर्थः, शान्तिः उपशमो भविता, उद्बोधकदूतदर्शनेन स्मृतवृन्दावनलीलस्य श्रीकृष्णस्य आगमनावश्यम्भावादिति भावः । तदादिपदेन प्रियजनपरामर्शो नारीसमुदाचारसिद्धः । तव दूतस्य च चकारो व्याधिशान्त्यपेक्षया, तत्पुरी-स्पर्शपुण्यं मथुरापुरीसंसर्गजनितसुकृतं भविता । सा पूर्वोक्ता प्रसिद्धा वा पुरी तत्पुरी तस्याः स्पर्शः तज्जनितं पुण्यं मोक्षनामकम् । तथा च स्मर्यते—

अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ।। इति ।

यद्वा तदिति पृथक्पदम्, तत् प्रसिद्धम् अवाङ्मनसगोचरं वा पुरीस्पर्शपुण्य-मित्यन्वयः । तथात्वं च पुण्यस्य मोक्षरूपत्वात् ।

ननु त्वदुक्तवचनेन मथुरावद् वृन्दावनम् अपि मोक्षसाधनमिति ज्ञायते, तत्रत्य-'माया'पदेन वृन्दावनस्यैवाभिहितत्वात्, तत् कथं मया वृन्दावनं परित्यज्य मथुरा गन्तव्या ? इत्यत आह वृन्दारण्यादिति । अत्रत्य एवशब्दो भिन्नक्रमः

भूरि इत्यनन्तरं द्रष्टव्यः। वृन्दारण्याद् भूरि प्रभूतम् एव सुकृतं भवतु तवेति शेषः, तेन वृन्दावनजनितपुण्येन किं स्यात्? न किमपीत्यर्थः, तथा च वृन्दावनजनितपुण्येन पुण्यान्तरोपार्जननिरासो नैव भवतीति भावः। वृन्दारण्यादिति प्रभवत्यर्थे पञ्चमी, यद्वा वृन्दारण्ये अवस्थायेति ल्यबलोपे पञ्चमी। एतदेवार्थान्तरेण द्रढयति नाकाङ्क्षेति। विपुलश्रीमतः, अत्र अप्यर्थो द्रष्टव्यः समधिकसम्पत्तिशालिनोऽपि इत्यर्थः, अर्थान्तरेषु स्वकोषस्थ-विपुलैश्वर्यातिरिक्तैश्वर्येषु, किम् आकाङ्क्षा न भवति? काक्वा भवत्येवेत्यर्थः। विपुलश्रीमत इति विपुलं श्रीमान् विपुलश्रीमान् इति सुप्सुपासमासः, विपुलम् इति मतुबर्थीभूताया अस्तिक्रियाया विशेषणम् स्तोकनम्रेत्यादिवत्। यद्वा, विपुलः श्रीमान् विपुलश्रीमानिति परमसुन्दरादिवत् कर्मधारयः, न तु कर्मधारयसमासनिष्पन्न-विपुलश्रीपदात् अस्त्यर्थे मतुप्प्रत्ययः, "न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः" इति तस्य प्रतिषिद्धत्वात्।

नन्वेकवाक्योपात्तत्वेन समभिव्याहाराद् वृन्दावनजनितपुण्यस्य मथुराजनितपुण्यस्य च तुल्यत्वमवगम्यते तत् को विशेषो मम वृन्दावनं परित्यज्य मथुरागमनस्य? किञ्च, पुराणादिषु मथुरापेक्षया वृन्दावनस्यैवाधिकं प्राशस्त्यमुद्घोष्यते, त्वयापि पुण्यस्य भूरीतिविशेषणदानात् 'अर्थान्तरेष्वि'त्यत्र अर्थान्तरपदेन यत्किञ्चिदर्थप्रत्यायनाच्च वृन्दावनम् एव अधिकपुण्यदमिति स्वीकृतप्रायं प्रतिभाति, तदत्र महति संशयपङ्के निपतितमस्मीति चेन्मा भैषीः। अस्तु वृन्दावनस्य पुण्यमधिकम् अस्तु तस्य पुराणादिषु प्राशस्त्यम् अस्तु वा भूर्यादिपदम्, तथापि त्वया न भेतव्यम् अन्यदपि ते पुण्यमहम् उपदिशामि श्रूयताम्—वृन्दावने तवैकम् एव पुण्यं पुरीगमने तु पुरीस्पर्शपुण्यं मद्वियोगव्याधिशान्त्या परोपकारजनितमतुलं पुण्यं सर्वोपरि श्रीकृष्णदर्शनजनितं पुण्यम्

इति त्रिविधं पुण्यं भावीति तूर्णमेव त्वया गन्तव्यमिति भावः। अत एव अर्थान्तरेष्विति बहुवचनम् अपि सार्थकम् ॥८॥

অনুবাদ। [তোমার] শীঘ্র সেখানে (মথুরায়) যাওয়া উচিত, তাহাতে আমার কৃষ্ণবিরহজনিত রোগের উপশম [হইবে] ও তোমার সেই পুরী-স্পর্শজন্য পুণ্য হইবে। বৃন্দাবনে থাকিয়া অধিক পুণ্যই হউক, তাহাতে কি হইবে? বিপুল সম্পত্তিশালী ব্যক্তির [ও] কি অন্যান্য অর্থ পাইতে ইচ্ছা হয় না? ॥৮॥

अक्रूरस्य व्रजकुलवधू-प्राणपानोद्यतस्य
प्रीतिर्भूयो भवतु भवतो दर्शनात्तेन किं वा।
कार्यासिद्धिर्भवति यदहो मादृशां दुःखहेतु-
र्नैवौन्नत्यं सकलभुवनप्रार्थनीयं रिपूणाम् ॥९॥

[अन्वयः। भवतः दर्शनात् व्रजकुलवधूप्राणपानोद्यतस्य अक्रूरस्य भूयः प्रीतिः भवतु, तेन वा किं [स्यात्]। अहो यत् कार्यासिद्धिः एव मादृशां दुःख-हेतुः भवति. रिपूणां सकलभुवनप्रार्थनीयम् औन्नत्यं न [दुःखहेतुः] ॥९॥]

टीका। ननु तदानीं कृष्णनयनावसरे भवतीनां दुरुक्तिपीडितः अक्रूरः कृत्रिमः शत्रुरभवत् स चेदानीं दूतभूतं मामवलोक्य भवतीनां दौःस्थ्यमनुमाय परां प्रीतिं लप्स्यते, अतो भवतीभिर्मां तत्र प्रेषयन्तीभिः सा प्रीतिः कथं घटयितव्येत्याह—अक्रूरस्येति। भवतः तव अर्थात् मथुरां गतस्य, दर्शनात् हेतोः, यद्वा दर्शनं प्राप्य व्रजकुलवधूप्राणपानोद्यतस्य व्रजरमणीनां प्राणहरणे व्याप्रियमाणस्य अक्रूरस्य वृन्दावनात् कृष्णं मथुरां नीतवतः अक्रूरनामकस्य कस्यचन कंसप्रेष्यस्य, भूयः पुनरपि कृष्णनयनात् परमप्रीत्यर्थः, यद्वा भूयः समधिकं यथा स्यात्तथा इति भवतुक्रियाविशेषणम्, प्रीतिः आनन्दो भवतु,

तेन वा तेनापि किं स्यादिति शेषः, अस्माकं तेन किमपि न भवेत्, अनवसरोऽयं शात्रवाचरणस्येति भावः ।

तदेवाह कार्यासिद्धिरिति । यद्वा, ननु यास्तावत् शत्रुषु समुचितं व्यवहर्तुं न जानन्ति ताः कथं मित्रेष्वस्मदादिष्वपि यथोचितसमुदाचाराः स्युरिति कथं मया युष्माकं दौत्यं करणीयम् इत्याशयानं दूतमाश्वासयितुं स्ववचनस्य युक्ततामाविष्करोति कार्यासिद्धिरिति । अहो इति सम्बोधने, हे पदाङ्क, यत् यस्मात् कारणात् कार्यासिद्धिः कार्यस्य श्रीकृष्णानयनस्य असिद्धिः व्याघातः एव मादृशां विरहदुःस्थानामित्यर्थः, दुःखहेतुः भवति, सकलभुवनप्रार्थनीयं सर्वकाम्यं शत्रूणाम् औन्नत्यम् अभ्युदयः आनन्दरूपः न दुःखहेतुर्भवतीति शेषः ।

अत्र सकलभुवनप्रार्थनीयमिति व्यवच्छेदकविशेषणेन (न तु स्वरूप-विशेषणेन) औन्नत्यस्य सम्पदाद्यर्थनिरासेन आनन्दरूपार्थपरता स्थापिता, सम्पदादेः सर्वजनप्रार्थ्यतायां विमतावपि आनन्दस्य तथात्वे विकल्पस्याश्रुत-चरत्वात् । एवञ्च "अत्र एवकारोऽप्यर्थकः स च सकलभुवनप्रार्थनीयम् इत्यनन्तरं द्रष्टव्यः" इति यत् केनचिदुक्तं तदनादेयम् उक्तरीत्या आनन्दरूपार्थ-लाभेन अपिशब्दव्यवच्छेद्याभावात् ।

अत्र न क्रूरः अक्रूर इति तत्पुरुषापवादेन न विद्यते क्रूरो यस्मादिति कार्यानुमितबहुव्रीह्यर्थेन अक्रूरस्य क्रूरत्वनिश्चयात् "क्रूरस्त्वमक्रूरसमाख्यया स्म नश्चक्षुर्हि दत्तं हरसे वताज्ञवत्" इति भागवतोक्तेः प्राणपानोद्यतस्येति कार्य-लिङ्गाच्च तस्य सर्पसाम्यं ध्वन्यते । उद्यतस्येत्यनेन कृष्णागमनप्रत्याशया धृता अस्माकम् इमे प्राणा इदानीमपि न तेन पीताः केवलं पातुं यत्नः क्रियते ; यदि पुनरिदानीं कृष्ण आयाति तदा त्वस्य मनोरथो विफलो भविष्यतीति मनोरथभङ्गदुःखेनैव सोऽस्माभियाजयितुम् इष्यत इति व्यज्यते । एवञ्च, अस्तु

भवद्दर्शनेन आपाततस्तस्य अविचारितरमणीयं सुखम् अन्ततस्तु महदेव दुःखं भविष्यतीति कार्यमेव त्वया एतद् दौत्यम् इत्यर्थः ॥९॥

অনুবাদ। [মথুরায়] তোমাকে দেখিয়া ব্রজরমণীগণের প্রাণপানে উদ্যত অক্রূরের অতিশয় আনন্দ হউক, তাহাতেই বা কি হইবে? যে হেতু, হে পদাঙ্ক, [কৃষ্ণানয়নরূপ] কার্যের ব্যাঘাতই আমাদের ন্যায় বিরহিণীদিগের দুঃখের কারণ; শত্রুর সকল ভুবনে প্রার্থনীয় অভ্যুদয় (অর্থাৎ আনন্দ) [আমাদের দুঃখের কারণ] নহে ॥৯॥

सन्त्येवास्मत्कलुषकरिणः कोटिशो वारणीया-
स्तेऽप्यस्माभिः स्मृतिकरवरेणाङ्कुशं ते गृहीत्वा।
स्वच्छन्देन व्रज मधुपुरीं को भवेद् वा विरोधी
गोपीभर्तुर्विरहजलधिं गोपकन्यास्तरन्तु ॥१०॥

[अन्वयः। अस्मत्कलुषकरिणः कोटिशः सन्ति एव, अस्माभिः स्मृतिकरवरेण ते अङ्कुशं गृहीत्वा ते अपि वारणीयाः। वा कः विरोधी भवेत्? स्वच्छन्देन मधुपुरीं व्रज, गोपकन्याः गोपीभर्तुः विरहजलधिं तरन्तु ॥१०।

टीका। ननु यानि भवतीनां पातकानि युष्मान् भगवतः श्रीकृष्णाद् विघटयाम्बभूवुस्तान्यद्यापि कृष्णस्यानागमनाद् न निवृत्तानीति शङ्के, तानि चेद् विघ्नं कुर्युस्तदा कथं मया मथुरा गन्तव्येत्याह सन्तीति। अस्मत्-कलुषकरिणः अस्माकं कलुषाणि तान्येव करिणः इति रूपकम्, ते कोटिशः सन्ति एव, इति वयं जानीम इति शेषः। प्रतिविधानं दर्शयति ते इति। अत्र अपिशब्दस्त्वर्थः, विरोधे वर्तते, तु किन्तु अस्माभिः स्मृतिकरवरेण स्मृतिरेव करवरः तेन स्मरणरूपहस्तेन ते त्वयि चिह्नाकारेण स्थितम् इत्यर्थः, अङ्कुशं शृणिं गजनियामकम् अस्त्रविशेषं गृहीत्वा ते वारणीया निवर्तनीयाः प्रतिषेद्धुं शक्या

इति यावत्। अत्र 'ते'कारद्वयस्यैकस्तच्छब्दीयः प्रथमाबहुवचनान्तः द्वितीयो युष्मच्छब्दीयः षष्ठ्येकवचनान्त इति विवेकः। अन्यत्रापि करिणो यूथशः भ्रमन्तो जङ्गमपर्वता इव मार्गावरोधका भवन्त्येवेति द्रष्टव्यम्।

नन्वन्येऽपि मनुष्यादयो मार्गविघ्नं कुर्युरित्याह को भवेदिति। वाशब्दः पक्षान्तरे, अथवा को विरोधी भवेत्? न कोऽपीत्यर्थः। "उपायं चिन्तयेत् प्राज्ञस्तथापायञ्च चिन्तयेत्" इति नीतिस्मरणादस्माभिरापाततः कलुषकरिणां मार्गविघातकता आशङ्किता, परमार्थतस्तु न केऽपि विरोधं कुर्युरिति भावः। अतः स्वच्छन्देन स्वेच्छानुसारात् मधुपुरीं व्रज गच्छ। गोपकन्याः मादृशा इत्यर्थः, गोपीभर्तुः श्रीकृष्णस्य विरहजलधिं वियोगरूपं समुद्रम् अपारं विरहम् इति पर्यवसितोऽर्थः, तरन्तु अतिक्रामन्तु। एतद् वाक्यं "को भवेद् वा विरोधी"ति वाक्यस्य हेतुप्रदर्शनपरतया द्रष्टव्यम्, तथाच गोपीभर्त्रा सह गोपीनां संयोग एव स्वाभाविकः विरहस्त्वौपाधिक इति स्वाभाविककर्मसम्पत्तौ अपरेषां प्रतिकूलता कथं स्यादित्यर्थः। वस्तुतः पत्या सह पत्नया इव कृष्णेन सहास्माकं मिलने सज्जनानामानन्द एव भविष्यति न प्रतिबन्धकतेति, असज्जनास्त्वत्र वृन्दावने न सन्तीति च वक्तुराशयः। केचित् वाशब्दस्य समुच्चयार्थतामाश्रित्य अन्यः को वा विरोधी भवेदित्यर्थमाहुः।

अत्रेदम् आलोचनीयम्—

"अपारसंसारसमुद्रतारिणी समुत्थितव्याधिसमूलघातिनी।
अशेषजन्मार्जितपापनाशिनी हरिस्मृतिः सर्वविपद्विनाशिनी" ॥

इति वचनाद् हरेरिव हरिचरणयोरन्ततश्च तत्रत्यचिह्नानामपि यथोक्तफलभावनया गुणस्तुत्या द्रुतमभिमुखीकर्तुं कविनायं श्लोकोऽवतारितः न त्वङ्कुशादीनां प्रातिस्विकं फलमनुसृत्येति अनुमीयते। यतः पुराणादिष्वङ्कुशस्य भक्तचित्त-

वशीकारः फलमुक्तं दृश्यते न तु पापापनोदनमपि, तत्फलन्तु तत्रत्यवज्र-स्यैव। तथा च स्कान्दे—

"दक्षिणश्रीपदाङ्गुष्ठमूले चक्रं बिभर्त्यजः" इत्युपक्रम्य
"कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम्।
पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारिणम्" ॥

इत्युक्तम्। एवञ्च श्लोकस्यास्य प्रथमपादे 'करिण' इत्यत्र 'गिरयः' इति द्वितीयपादे 'अङ्कुश'मित्यत्र 'अशनि'मिति कृते विप्रतिपत्तिः परिहृता भवेदित्य-स्माकं प्रतिभाति। 'तुष्यतु दुर्जन' इति न्यायात्तु 'वारणीया' इत्यत्र भेदनीया इत्यपि कर्तुं शक्यते। स्वकृतेः पूर्वोक्तन्यूनताकल्पनयैव कविना 'को भवेद्वे'ति पक्षान्तरमाश्रितमिति कल्प्यते। अस्मदुद्भाविते पाठे कवेरस्वरसे बीजम् एवं स्यात्—गिरयः अचलतया निष्प्राणतया च न मार्गविघ्नसमर्थाः तद्वैपरीत्यात् करिणस्तु समर्था इति ॥१०॥

অনুবাদ। [আমরা জানি] আমাদের কোটি কোটি পাপরূপ হস্তী আছে [তাহারা তোমার গমনের ব্যাঘাত সৃষ্টি করিতে পারে]। কিন্তু আমরা স্মৃতিরূপ উৎকৃষ্ট হস্ত দ্বারা [চিহ্নরূপে] তোমাতে অবস্থিত অঙ্কুশ ধারণ করিয়া তাহা-দিগকে বারণ করিতে পারিব। অথবা, কে বিরোধী হইবে? (অর্থাৎ কেহই তোমার প্রতিবন্ধক হইবে না)। তুমি স্বচ্ছন্দে মধুপুরী গমন কর, [ফলে] গোপকন্যাগণ গোপীভর্তার (শ্রীকৃষ্ণের) বিরহসাগর পার হউক ॥১০॥

आस्ते नूनं यदुषु मथुरामण्डले चक्रपाणिः
कूजद्भृङ्गैरमलकमलैराकुले गोकुले वा।
तस्माद् गच्छेरतिलघु पुरीं ताञ्च जन्मावनीवद्
बालक्रीडां रचयति मुहुर्यत्र तत्रानुरागः ॥११॥

[अन्वयः। चक्रपाणिः नूनं मथुरामण्डले यदुषु [आस्ते], वा कूजद्भृङ्गैः अमलकमलैः आचिते गोकुले आस्ते। तस्मात् अतिलघु तां पुरीं च गच्छेः, जन्मावनीवत् यत्र मुहुः बालक्रीडां रचयति तत्र [अपि] अनुरागः [भवति] ॥११॥]

टीका। मथुरायामेव श्रीकृष्ण आस्ते इति राधाया मनसि स्थितम्। इदानीं पुनः सुप्तप्रतिबुद्धन्यायेन बाल्यलीलादोलतया गोकुलेऽपि तद्गमनमाशङ्क्य उभयत्र दूतस्य गमनम् उपदिशति—आस्ते इति। वस्तुतस्तु पौर्वापर्यपर्यालोचनया अघटमानापीयं श्रीकृष्णस्य गोकुलस्थितिः कविना यमुनासम्बन्धिवाक्चातुर्यप्रपञ्चनवाञ्छयैव केवलमुपन्यस्तेति प्रतिभाति।

चक्रपाणिः नूनं निश्चितं मथुरामण्डले मथुरापुर्यां तत्रापि यदुषु यादवसभायां यादवमध्ये वा आस्ते वर्तते। अत्र यदुष्विति स्थानचिह्नकथनम्, विस्तीर्णत्वान्मथुरामण्डलस्य क्व मया कृष्णोऽन्वेष्टव्य इति दूतप्रश्नस्योत्तरतया प्रयुक्तम्। चक्रपाणिरिति कृष्णचिह्नप्रदर्शनपरम्। न च पुत्राय पितुरिव श्रीकृष्णचरणचिह्नाय श्रीकृष्णस्य चिह्नकथनम् अलीकम् इति वाच्यम्, चिरप्रोषितस्य पितुः पुत्रेणाप्यस्मरणश्रवणात्, "स्नेहः पापाशङ्की"त्यनुभवाद् गोपीनां तदुक्तेरावश्यकतानपायाच्च। यद्वा, वृन्दावनीयं पदचिह्नन्तु वंशीधरस्य श्रीकृष्णस्येति चक्रधरस्य तस्य परिचयदानं नानावश्यकम् इति सर्वमवदातम्। एतेन तस्य राजोचितयोग्यता च सूचिता। यद्वा, चक्रशब्दस्य मण्डलार्थतया मण्डलं (राष्ट्रं) तस्य हस्ते वर्तते इत्यपि ध्वन्यते। तथा च चक्रपाणित्वेन शक्तिमत्त्वात् मण्डलाधिपतया, स्वस्य यादवत्वात् स्वगणप्रेम्णा वा यदुष्वेव तस्य वासः प्रथमतः सन्दिह्यते इति भावः।

इदानीं गोकुलवाससम्भावनाम् अपि दर्शयति—कूजद्भृङ्गैरिति। वा अथवा,

कूजन्तः शब्दायमाना भृङ्गा मधुकरा येषु तथाविधैः अमलकमलैः नवोद्भिन्न-नलिनैरित्यर्थः, अत्र कूजद्भृङ्गैरिति विशेषणात् अमलपदस्य नवोद्भिन्नत्वार्थ-लाभः। आकुले व्याप्ते गोकुले नन्दव्रजे श्रीकृष्णस्य बाल्यलीलाभूमावित्यर्थः, आस्ते इत्यनेनैवान्वयः। यद्वा, कूजद्भृङ्गैरमलकमलैरिति व्यधिकरणपदद्वयम्, कूजद्भृङ्गैरमलकमलैश्चेत्यर्थः। एतेन शरत्कालः सूच्यते। अत्र कूजद्भृङ्गै-रमलकमलैरिति गोकुलस्य चिह्नकथनम्, कूजद्भृङ्गादिलिङ्गैस्त्वया गोकुलं ज्ञातव्य-मित्याशयः। तथा च विकचकमलादिलौल्याद् गोकुलेऽपि तस्य गमनं नासम्भवम् इति गोप्या हृदयम्।

निगमयति तस्मादिति। तस्मात् हेतोः अतिलघु अतिशीघ्रं तां पुरीं मथुरां चकाराद् गोकुलं च गच्छेः यास्यसि। ननु स्ववीर्येण निर्जितारातेर्नृपा-सनसन्निषण्णस्य तस्य गोकुलगमने किं कूजद्भृङ्गाकुलकमलदर्शनलालसा एवैको हेतुराहोस्विदन्योऽपि वर्तते इत्याह—जन्मावनीवदिति। यद्वा, ननु श्रूयते मथुरा तस्य जन्मभूमिरिति, ततश्च "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी"ति वचनात् मथुरां परित्यज्य तस्य गोकुलागमने को हेतुरित्याह जन्मावनीवदिति। यत्र मुहुः असकृत् बालक्रीडां शैशवलीलां रचयति करोति जन इति शेषः, तत्र तत्रापीत्यर्थः, जन्मावनीवत् जन्मभूमौ इव अनुरागः तस्य जनस्य भवती-त्यादिरध्याहार्यः। तथा च अस्तु तस्य मथुरा जन्मभूमिः परं बाललीलाश्रय-तया गोकुलेऽपि तस्य नाल्पीयान् अनुरागः कल्पनीय इत्याशयः। 'बालः क्रीडाम्' इति सविसर्गपाठे बालः सन् बाल्यावस्थायामित्यर्थः, यत्र क्रीडां रचयती-त्याद्यर्थः।

केचिदेवं व्याचक्षते। मथुरा गोकुलम् इत्युभयमपि कृष्णस्य जन्मभूमिः। तथा च यदा मथुरायां देवकीतः श्रीकृष्णः प्रादुर्बभूव तदा नन्दालयेऽपि अपरः

श्रीकृष्णो योगमाया च यशोदायाः प्रादुर्बभूवतुः। वसुदेवे यशोदाया अरिष्ट-शय्यायाम् अपरकृष्णपार्श्वे स्वापत्यं निधाय योगमायाम् आदाय प्रस्थिते उभौ कृष्णौ एकीबभूवतुरिति पुराणस्वरसः। एवञ्च द्वयोरेव जन्मभूमित्वाद् आस्तां स मथुरायां वा गोकुले वा, वृन्दावने तु कथमागमिष्यतीति दूतप्रश्ने अर्थान्तरं विन्यस्यति जन्मावनीवदिति। उभे एव तस्य जन्मभूमी इति मतवादे स्वीकृतेऽपि लीलाश्रयतया वृन्दावनेऽपि तस्यानुरागो वर्तत इति अत्रागमने नैराश्यशङ्का न कार्येति भावः। अत्र पक्षे बालपदं कैशोरपरम् "आषोडशाद् भवेद् बालः" इति वचनात् आषोडशादित्यत्र आङो मर्यादार्थकत्वात् पञ्चदश-वर्षपर्यन्तम् इत्यर्थः, अयं किशोर इत्यप्युच्यते "कैशोरमा पञ्चदशात्" इति स्मृत्यन्तरात्। वृन्दावनं कैशोरलीलाभूमिर्भगवत इति भागवतादिषु प्रसिद्ध-मेवेत्यभिप्रायः ॥११॥

অনুবাদ। চক্রধারী শ্রীকৃষ্ণ নিশ্চয় মথুরারাজ্যে যদুসভায় [রহিয়াছেন], অথবা ভ্রমরকুল যাহাতে গুঞ্জন করিতেছে ঈদৃশ অমল (অর্থাৎ সদ্যঃ প্রস্ফুটিত) কমলকুলে ব্যাপ্ত গোকুলে রহিয়াছেন। অতএব তুমি অতিশীঘ্র সেই মথুরা-পুরী ও গোকুলে যাইবে। [লোক] যেখানে অনবরত বাল্যলীলা করে, (অথবা, বালক যেখানে অনবরত ক্রীড়া করে) জন্মভূমির ন্যায় সেই স্থানের উপরও [তাহার] অনুরাগ থাকে ॥১১॥

आस्तां मध्ये तरणितनया भीषणा भूरिनक्रै-
रावर्ताद्यैर्नयनभयदैस्तां तरिष्यस्यवश्यम्।
संसाराब्धिं तरति सहसा यत् क्षणं चिन्तयित्वा
तस्यासाध्यं भवति किमहो पारयानं तटिन्याः ॥१२॥

[अन्वयः। नयनभयदैः भूरिनक्रैः आवर्ताद्यैः [च] भीषणा तरणि-

तनया मध्ये आस्ताम्, ताम् अवश्यं तरिष्यसि। यत् क्षणं चिन्तयित्वा [जनः] सहसा संसाराब्धिं तरति, अहो तटिन्याः पारयानं किं तस्य असाध्यं भवति ? ॥१२॥]

टीका। ननूभयत्र गन्तुर्यमुना अवश्यम् उत्तर्तव्या तां कथम् उत्तरिष्यामीत्याह आस्ताम् इति। नयनभयदैः दर्शनमात्रेणोद्वेजकैः, यस्या दर्शनम् एव भयं जनयति तस्याः पारगमनं तु नितराम् एव दुष्करम् इति नयनपदस्याशयः। भूरिनक्रैः बहुतरग्राहैः, बहुवचनात् कुम्भीरादिपरिग्रहः, आवर्ताद्यैः जलभ्रमादिभिः च विशिष्टा, अत्रापि नयनभयदैरिति द्रष्टव्यम्। आदिशब्दात तरङ्गादिसंग्रहः। अत एव भीषणा, अत्र भूरिनक्रैरित्यादौ विशेषणे तृतीया, यद्वा हेतौ तृतीया, तरणितनया सूर्यपुत्री यमुना इति यावत्, मध्ये गोकुलवृन्दावनयोः मथुरागोकुलयोर्वा पथिमध्ये इत्यर्थः। आस्तां वर्तताम्। तां यमुनाम् अवश्यम् नियतं तरिष्यसि।

तरणावश्यम्भावे हेतुमाह संसाराब्धिम् इति। यत् पदचिह्नं त्वामित्यर्थः, क्षणम् अत्यल्पमात्रकालम् अपीति शेषः, चिन्तयित्वा मनसिकृत्य सहसा हठात् अन्यसाधननिरपेक्षमिति भावः, संसाराब्धिं संसारसागरं तरति सर्वोऽपि जन इति शेषः, तस्य तादृशस्य तवेत्यर्थः, तटिन्याः अस्या यमुनायाः क्षुद्राया इति भावः, पारयानं तीरान्तरप्राप्तिः किम् असाध्यम् अपि तु नैवेत्यर्थः। अहो इति विस्मये। अत्रायं भावः, अप एव धीयन्तेऽस्मिन्निति व्युत्पत्त्या अब्धिपदेन पारहीनो जलराशिरवसीयते, तटिनीपदेन च तटवत्त्वम् इत्यनयोर्महदन्तरतया "निपीतकालकूटस्य हरस्येवाहिखेलनम्" इत्याभाणकोक्तदिशा त्वां स्मरतामीषत्करं यत् तटिन्याः पारयानं तत्ते सुतरामेव सुकरमिति।

अत्र 'आवर्ताद्यैरपि भयकरैरि'ति पाठे अपिः समुच्चये आवर्ताद्यैश्चेत्यर्थः।

भयकरैरिति करोतीति व्युत्पत्त्या कर्त्रजन्तस्य करशब्दस्य कर्मषष्ठ्या समासः, न तु भयं करोतीत्युपपदसमासः, 'मेघर्तिभयेषु कृञः' इत्यादिना खच्प्रत्यये 'अरुर्द्विष'दित्यादिना मुमागमेन 'भयङ्कर' इति रूपप्रसङ्गात्। यद्वा, "विद्या यशस्करी"त्यादाविव "कृञो हेतुताच्छिल्यानुलोम्येषु" इत्यनेन हेत्वर्थे टप्रत्ययाद् यथोक्तपदसिद्धिः। अध्याहारादिदोषाभावादयमेव पाठः साधीयान् प्रतिभाति।

केचित्तु, नयनभयदैरिति आवर्ताद्यै रित्यनेनैवान्वेति, तेषामेव प्रत्यक्षत्वेन भयदत्वसम्भवात्, न तु भूरिनक्रै रित्यनेनापि, नक्राणां जललीनतया अदृश्यत्वात्, इति वदन्ति। तन्न सुचिन्तितम्, नक्रादीनामपि काले जलोपरि सैकतादौ वा दर्शनात्, अन्यथा तेषां सत्तापि न प्रतीता स्यादिति ॥१२॥

অনুবাদ। নেত্রভয়দায়ক বহু নক্রপ্রভৃতি ও জলভ্রমিপ্রভৃতি সমন্বিতা ভীষণা যমুনা [পথি] মধ্যে থাকুক, [তুমি] অবশ্য তাহা পার হইতে পারিবে। [যে হেতু] যাহাকে (যে শ্রীকৃষ্ণচরণচিহ্নকে) ক্ষণকালও চিন্তা করিয়া [সকল লোক] সংসার-সমুদ্র উত্তীর্ণ হইয়া থাকে, কি আশ্চর্য, [একটা] নদীর পারগমন কি তাহার অসাধ্য হইবে? ॥১২॥

दृष्ट्वैव त्वां विदितमधुना पूर्ववत् पद्मनाभं
प्राप्यावश्यं विरह-जलधेः पारमासादयिष्ये।
मोदिष्ये च क्षणमपि हरेरास्य-चन्द्रामृतेन
प्राप्तप्राणा सुरभिकुसुमामोदिते मञ्जुकुञ्जे ॥१३॥

[अन्वयः। अधुना त्वां दृष्ट्वा एव विदितं [यत्] पद्मनाभं प्राप्य विरह-जलधेः पारम् आसादयिष्ये। हरेः आस्य-चन्द्रामृतेन प्राप्तप्राणा सुरभिकुसुमा-मोदिते मञ्जुकुञ्जे क्षणम् अपि पूर्ववत् मोदिष्ये च ॥१३॥]

टीका। गुणास्तुल्या दौत्ये प्ररोचयति—दृष्ट्वेति। अधुना इदानीम् ईदृश्यां विरहावस्थायाम् इत्यर्थः, त्वां पदचिह्नं दृष्ट्वा एव आलापादिनिरपेक्षेण तव केवलदर्शनेनैवेत्येवकारार्थः। विदितं मया ज्ञातम्। यद्वा, इदानीं विदितम् इत्यन्वयः। किम् इत्याह पद्मनाभम् इति। पद्मनाभं श्रीकृष्णं प्राप्य आसाद्य विरहजलधेः पारं तीरम् आसादयिष्ये प्राप्स्यामि, इति विदितमित्यन्वयः।

"सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवती"ति रीत्या

"सत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते रतिः"

इति भागवतोक्तदिशा वा येन पापकर्मणा मम कृष्णविरहो जातस्तदिदानीमपगतप्रायं सम्भावयामीत्यर्थः। अत्र विरहसागरपतिताया मम सागरशाय्येव साह्यं कर्तुं समर्थ इति पद्मनाभपदेन ज्ञाप्यते, पद्मनाभमूर्तेः सागरशायित्वस्मरणादिति भावः। ततः किम् इत्याह हरेरिति। हरेरास्यचन्द्रामृतेन प्राप्तप्राणा सती सुरभिकुसुमामोदिते सुगन्धपुष्पवासिते मञ्जुकुञ्जे क्षणम् अपि पूर्ववत् मथुरागमनात् प्रागिव मोदिष्ये आनन्दम् अनुभविष्यामि च। यद्वा, पूर्ववत् प्राप्य विरहजलधेः पारमासादयिष्ये इति पूर्वार्धेनैव 'पूर्वव'-दित्यस्यान्वयः। तथा च पूर्वं यथा श्रीकृष्णो मदेकानुरक्त आसीत् तथैव तं प्राप्येत्याद्यर्थः। प्राप्तप्राणा इत्यनेन विरहाद् इदानीं मृतप्राया तिष्ठामीति सूच्यते, अतस्त्वं कृष्णानयनाय त्वरस्वेति आशयः ॥१३॥

অনুবাদ। বর্তমানে তোমাকে দেখিয়াই বুঝিয়াছি [যে] শ্রীকৃষ্ণকে পাইয়া বিরহসাগরের পার পাইব এবং কৃষ্ণের মুখচন্দ্রামৃত দ্বারা উজ্জীবিত হইয়া সুরভিকুসুমামোদিত মনোহর নিকুঞ্জে [অন্ততঃ] ক্ষণকালও পূর্বের ন্যায় আমোদ উপভোগ করিব ॥১৩॥

सम्पर्कात्ते तरणितनयातीरसोपानवृन्दं
राज्ञः पन्थास्तलमपि तरोराचितं पद्मरागैः ।
शोभां यास्यत्यचिरमतुलां स्वीयकार्यानुरोधा-
दुक्तैनैतैर्मुहुरपि सखे तत्र न स्थेयमेव ॥१४॥

[अन्वयः । ते सम्पर्कात् तरणितनयातीरसोपानवृन्दं राज्ञः पन्थाः तरोः तलम् अपि पद्मरागैः आचितम् [इव] अचिरं शीघ्रम् अतुलां शोभां यास्यति । हे सखे, एतैः स्वीयकार्यानुरोधात् मुहुः उक्तेन अपि [त्वया] तत्र न एव स्थेयम् ॥१४॥]

टीका । अतिव्याकुलतया त्वराम् उपदिशन्ती भङ्गया स्तौति—सम्पर्काद् इति । ते सम्पर्कात् सम्बन्धात् तरणितनयातीरसोपानवृन्दं यमुनातीरस्थ-सोपानपरम्परा, राज्ञः पन्थाः राजमार्गः, तरोः तलं वृक्षस्य अधःस्थित-प्रदेशश्च, अपिः समुच्चयार्थः, पद्मरागैः शोणमणिभिः आचितं खचितम् इव अचिरं शीघ्रम् अतुलां शोभां यास्यति लप्स्यते यद्वा, पद्मरागैरिति पद्मदलीय-लोहितभाभिरित्यर्थः, एतच्च चरणचिह्ने वर्तमानं कमलचिह्नमुद्दिश्य कथितम् इति द्रष्टव्यम् । अयं भावः, महतां चरणं स्वतः शोणं भवति इति ज्यौतिषिका वदन्ति ; अतस्तच्चिह्नमपि शोणं भवतीत्यभिप्रेत्येयं सम्भावनैव कविना कृतेति ज्ञातव्यम्, न तु वस्तुस्थितिरिति । अत्र आचितञ्च आचितश्च आचितञ्च आचितम् इति क्लीवैकशेषो द्रष्टव्यः, "परार्थे प्रयुज्यमानः शब्दो वतिमन्तरेण वत्यर्थं गमयती"ति च इवार्थलाभः । केचिद् 'यास्यन्ती'ति पठित्वा 'सोपानादीनां सम्भूय युगपत् कर्तृत्वविवक्षया बहुवचनान्तत्वम्' इति समादधते । चतुर्थचरणे 'एतै'रिति बहुवचनेन प्रतिनिर्देशाद् अयमेव पाठः साधीयान् प्रतिभाति ।

प्रकृतम् आह स्वीयेति। एतैः सोपानवृन्दादिभिः स्वीयकार्यानुरोधात् स्वसौन्दर्यसम्पादनरूपकार्यवैयग्रयात् मुहुः वारं वारम् उक्तेन कथितेन अनुरुद्धेन इत्यर्थः, अपि त्वया इत्यध्याहार्यम् , तत्र तत्तत्प्रदेशे, अत्र वीप्सा द्रष्टव्या, नैव स्थेयं न एव वस्तव्यम् । तथा च त्वत्सम्पर्कसञ्जाता तेषां शोणमणिशोभा त्वदपगमे झटित्येव मास्म नश्यदिति तानि त्वद्गमनं नानुमन्येरन्नेव, त्वया तु कथमपि न स्थातव्यमिति। स्वार्थपराणां वचसि का श्रद्धेति भावः। यद्वा, स्वीयायाः सखीभूताया मम कृष्णानयनरूपकार्यानुरोधादित्यर्थः, ''मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः'' इति न्यायादिति भावः। एतत्पक्षे स्वीयकार्यानुरोधादिति अवस्थानाभावे हेतुः, पूर्वपक्षे तु 'उक्तेन' इत्यस्यैकदेशे कथन इति विवेकः। अत्रापि तीरसोपानादिषु प्राणिमात्रसुलभ-वाग् व्यवहारसम्भावना राधाया भ्रान्तिमूलेति ज्ञेयम्।

केचिदिदं 'पद्मरागैराचित'मिति तरोस्तलम् इत्यस्यैव विशेषणमिच्छन्तो भूतार्थकथनमिदमित्यभिप्रयन्ति। तथा, तरणितनयातीरसोपानवृन्दं राज्ञः पन्थाः तरोस्तलमपि त्वत्सम्पर्कात् अतुलां शोभां यास्यतीति व्याचक्षते च। अत्र कया रीत्या तरुतलं पद्मरागमणिखचितं भवति, कया रीत्या वा चरणचिह्नेन तस्य शोभा जनयितव्येति न वयं विद्मः। यदि च तरुतलपदं लक्षणया तत्रत्य-वेद्यादिपरमिति प्रतिपाद्यते, यदि वा उद्यानीयत्वेन विशेष्यते तदापि जायमानम् अर्थगौरवं कवेरगौरवम् एव सूचयिष्यतीति अस्मदुक्त एवार्थः सम्यक् प्रतिभाति ॥१४॥

অনুবাদ। তোমার সম্পর্কবশতঃ যমুনাতীরের সোপানপংক্তি, রাজপথ ও তরুতল পদ্মরাগ মণিদ্বারা খচিত হইয়াই যেন শীঘ্র অনুপম শোভা ধারণ করিবে। হে সখে, স্বীয় কার্যের অনুরোধে (অর্থাৎ স্বীয় স্বীয় শোভা নষ্ট

হইবার ভয়ে) ইহাদের দ্বারা বার বার অনুরুদ্ধ হইয়াও তুমি সেখানে কিছুতেই থাকিবে না ॥১৪॥

ये वीक्षन्ते सततमधुना श्रीपतेरङ्घ्रिपद्मं
मञ्जीराद्यैः कनककलितैर्भूषणैर्भूषितञ्च ।
तेषाञ्च त्वं किमु न भविता लोचनप्रीतिहेतु-
र्व्यक्तैरेतैः कुलिश-कमल-स्यन्दनाङ्कादिचिह्नैः ॥१५॥

[अन्वयः । अधुना ये कनककलितैः मञ्जीराद्यैः भूषणैः भूषितं च श्रीपतेः अङ्घ्रिपद्मं सततं वीक्षन्ते, उ, एतैः व्यक्तैः कुलिश-कमल-स्यन्दनाङ्कादिचिह्नैः त्वं तेषां च लोचनप्रीतिहेतुः किं न भविता ? ॥१५॥]

टीका । ननु साक्षात्कृतश्रीपतिचरणा मथुरावासिनः कथं चिह्नमात्रे मय्यादरं दर्शयिष्यन्ति ? एवञ्च "युक्तं चैतत्" इत्यादि पूर्वं यदुक्तं तदप्ययुक्तमित्याह—ये वीक्षन्ते इत्यादि । अधुना ये मथुरावासिनः कनककलितैः स्वर्णनिर्मितैः मञ्जीराद्यैः नूपुरप्रभृतिभिः अत्र आद्यपदग्राह्यमलङ्कारान्तरं मृग्यम्, भूषणैः भूषितम् अलङ्कृतम् अपि, चोऽप्यर्थे ; श्रीपतेः कमलाकान्तस्य अङ्घ्रिपद्मं चरणकमलं सततं वीक्षन्त इत्यन्वयः । तथा च एकतः प्रकृतं पादपद्मम् अपरतश्च कनकमञ्जीरभूषितमिति तदपहाय अप्राकृते मञ्जीररहिते पदचिह्ने बद्धादरा मथुरावासिनः

"स्रोतोवहां पथि निकामजलामतीत्य जातः सखे प्रणयवान् मृगतृष्णिकायाम्"

इत्यस्याः कालिदासीयसूक्तेर्लक्ष्यभूताः कथं भवेयुरिति पूर्वपक्षीभूतस्य पूर्वार्धस्य भावः । मञ्जीरराहित्यञ्च पादतलीये चिह्ने पदोपरि राजमानस्य नूपुरस्य चिह्नसंक्रमणाभावेन वस्तुस्वरससिद्धम् अपि

गोपीदौत्यप्रकटनभिया सन्निधौ चक्रपाणे-
जाने धीरप्रमुख मुखरो नूपुरो नो गृहीतः ॥ (४)

इत्यनेनोत्प्रेक्षितमपि । उत्तरयति—तेषामित्यादि । उ इति सम्बोधने, हे चरणचिह्न, एतैः त्वयि प्रत्यक्षीभूतैः व्यक्तैः प्रकटैः कुलिशकमलस्यन्दनाङ्कादिचिह्नैः वज्रादिचिह्नैः करणैः त्वं तेषाम् अपि, अत्रापि चोऽप्यर्थे, लोचनप्रीतिहेतुः नेत्रानन्दकारणं किं न भविता भविष्यसि ? अपि तु भविष्यस्येव । भविष्यति तृन् प्रत्ययः । तथा च लभन्तां नाम ते चरणोपरिभागदर्शनजां नेत्रप्रीतिम् तत्र-भागदर्शनजा प्रीतिस्तु त्वदायत्तेति त्वामप्यादरिष्यन्त एवेति भावः । न च तथापि साक्षात् तत्रभागमपास्य चिह्ने मय्यादरो न युज्यत एवेति वाच्यम्, सुस्पष्ट-दर्शनाशया तस्य सप्रयोजनत्वात् , चरणापेक्षया त्वयि कुलिशकमलादिचिह्नानां प्रकटत्वात्, अत एव व्यक्तैरिति चिह्नानां विशेषणमुपात्तम् । लोकेऽपि ग्रहणादि-दिदृक्षवः साक्षात् सूर्यम् अपहाय जलप्रतिविम्बितम् एव तम् आदरादवलोक-यन्तीति । किमु इत्यव्ययद्वयं किम् इति प्रश्ने, उ इति सम्बोधने । यद्वा, किमु इत्येकमेव पदम् ॥१५॥

অনুবাদ। বর্তমানে [মথুরাবাসী] যাঁহারা নিরন্তর শ্রীপতির পাদপদ্ম কনকনির্মিত নূপুরাদিভূষণে ভূষিত দর্শন করিতেছেন, হে পদচিহ্ন, সুস্পষ্ট এই সকল বজ্র-পদ্ম-চক্রাদি চিহ্ন দ্বারা তুমি কি তাঁহাদেরও নেত্রানন্দের হেতু হইবে না ? ॥১৫॥

यस्यासङ्गादलभत तनुं मानुषीं गौतमस्त्री
ध्यानेनैव प्रथितमहिमा श्रीपतिं नारदादिः ।
तस्माज्जाते त्वयि मधुरिपोरङ्घ्रि-पद्माद् विचित्रः
किं दीनानामुपरि करुणालिङ्गितो दृष्टिपातः ॥१६॥

[अन्वयः । गौतमस्त्री यस्य आसङ्गात् मानुषीं तनुम् अलभत, प्रथितमहिमा नारदादिः ध्यानेन एव श्रीपतिम् [अलभत], मधुरिपोः तस्मात् अङ्घ्रिपद्मात् जाते त्वयि दीनानाम् उपरि करुणालिङ्गितः दृष्टिपातः किं विचित्रः ? ॥१६॥]

टीका। इदानीं कुलप्रशंसया उन्मुखीकरोति—यस्येति। गौतमस्त्री अहल्या पाषाणमयीत्यर्थः, यस्य श्रीपतेरङ्घ्रिपद्मस्य आसङ्गात् ईषत्सम्पर्कात् आङ् अल्पेषदर्थे, मानुषीं तनुं मानवशरीरं स्वपूर्वभवदेहमित्यर्थः, अलभत प्राप। प्रथितमहिमा विख्यातमाहात्म्यः नारदादिः यस्य ध्यानेन एव, एवकाराद् दर्शनादिव्यवच्छेदः, केवलचिन्तया श्रीपतिम् अलभत, यद्वा ध्यानेनेत्यस्य प्रथितमहिमेत्यनेनान्वयः। नारदादिरित्यादिपदाद् ध्रुवशुकादिपरिग्रहः, मधुरिपोः श्रीकृष्णस्य तस्मात् तादृग् विधात् परोपकरणपरायणादिति भावः। अङ्घ्रिपद्मात् जाते त्वयि दीनानां मादृशीनाम् उपरि करुणालिङ्गितः दयायुक्तः करुणाप्रेरितो वा दृष्टिपातः किं विचित्रः आश्चर्यः चमत्कारकारीति यावत् ? अपि तु नैव। कुलागतैव ते दीनानामुपरि सकरुणा दृष्टिरिति भावः। कार्यस्य कारणसाजात्यनियमात् कारणकरुणाख्यापनेन कार्यस्यापि कारुण्यमर्थात् सिद्धमित्यर्थः। वक्ष्यति च "सदृशं कारणेनैव कार्यम्" इति।

यस्य जनकस्य ईषत् स्पर्शात् मृतापि पाषाणमय्यपि अहल्या प्राणान् प्राप, तस्मादुद्भूतस्य तव सम्पर्कात् इदानीमप्यमृता मानुष्यहं कृष्णप्राप्तया कथं न प्राणान् लभेयेति, तथा ध्रुवनारदादयो यस्य ध्यानमात्रेण तं प्रापुः तदुत्पन्नस्य तव साक्षातकारादपि मे कथं न कृष्णलाभः स्यादिति च स्फोरयितुं चरणस्य कारणत्वे दृष्टान्तान्तरेषु सत्स्वपि प्रकृतोपयोगाद् यथोक्तं द्वयम् एवोपात्तम् इति द्रष्टव्यम्। 'प्रथितमहिमश्रीपतिम्' इत्येकपदपाठः क्वचित् ॥१६॥

অনুবাদ। যাহার অল্পমাত্র স্পর্শে গৌতমপত্নী [পাষাণী অহল্যা] মানুষশরীর লাভ করিয়াছিল, প্রখ্যাতমাহাত্ম্য নারদাদি ঋষি যাহার ধ্যান মাত্র করিয়াই শ্রীকৃষ্ণকে পাইয়াছিলেন; মধুসূদনের সেই পাদপদ্ম হইতে উৎপন্ন তোমার দুঃখিনী আমাদের প্রতি সকরুণ দৃষ্টিপাত কি [একটা] বিচিত্র [ব্যাপার]? ॥১৬॥

एकं चिह्नं हरिपदभवं पन्नगस्योत्तमाङ्गे
तादृक्शोभामपि खगपतेर्निर्भयं तं चकार।
पिण्डेनान्यत् तरणिरभवद् घोरसंसारसिन्धौ
ध्यातं तादृक् त्वमपि महतां जन्म विश्वोपकृत्यै ॥१७॥

[अन्वयः। हरिपदभवम् एकं चिह्नं पन्नगस्य उत्तमाङ्गे [स्थितं] तादृक्-शोभाम्, तं खगपतेः निर्भयम् अपि चकार; अन्यत् पिण्डेन घोरसंसारसिन्धौ तरणिः अभवत्। त्वम् अपि तादृक् ध्यातम्। महतां जन्म विश्वोपकृत्यै [भवति] ॥१७॥]

टीका। त्रीणि हरिपदचिह्नानि प्रकृत्य द्वयोः परोपकारपारवश्योद्-घाटनेन तृतीयस्यापि तत्पारवश्यं युक्तमिति युक्त्या समर्थयते—एकम् इति। हरिपदभवम् एकं चिह्नं पन्नगस्य सर्पस्य कालियस्येति यावत्, उत्तमाङ्गे शिरसि स्थितम् इति शेषः, तादृक्शोभां तादृशीं सर्वजनाध्यक्षाम् अनिर्वाच्यां वा शोभां, तं कालियं खगपतेः गरुडात् निर्भयं भयहीनम् अपि चकार। अपिः समुच्चये; न केवलं तादृक्शोभां चकार तं गरुडान्निर्भयञ्च चकारेत्यर्थः। यद्वा, तञ्च गरुडान्निर्भयं चकारेत्यन्वयः। पौराणिकी वार्ता तु भागवतादेरवसेया।

एवम् एकस्य ऐहिकफलदायकत्वमुक्त्वा अन्यस्य पारलौकिकतामाह पिण्डेनेति। अन्यत् चिह्नं गयासुरशिरस्थितमिति शेषः, पिण्डेन पित्रादी-नुद्दिश्य सुतादिभिः स्वोपरि पातितेन पिण्डादिनेत्याशयः, हेतौ तृतीया,

घोरसंसारसिन्धौ तरणिः नौका अभवत पिण्डदातुस्तत्पित्रादेश्चेति शेषः। इतिहासः पुराणादिष्वनुसन्धेयः। ततः किम् इति आह ध्यातम् इति। त्वम् अपि तादृक् तयोस्तुल्यं वर्तसे इति ध्यातं मया निश्चितम्, सहचारदर्शनादिति भावः। अत्र तादृगित्यस्य 'ते इव दृश्यसे' इति व्युत्पत्त्या तयोः समुच्चित इह-परकालिकोपकारकतारूपो गुण एकस्मिन्नेव त्वयि वर्तते इति व्यतिरेकप्रतीतेः कृष्णानयनरूप ऐहिकोऽर्थस्त्वदायत्त इति ध्वनितम्। अथवा, ध्यातं चिन्तितं सत् त्वमपि तादृक् घोरसंसारसिन्धौ तरणिवदिति एकतरत्रैवान्वयः एवञ्च ध्यानमात्रेण घोरसंसारसिन्धुतरणतरणेस्तव मया प्रत्यक्षीकृतस्य मद्विरहसागर-तरणिता कथं दुष्करा भवेदिति भावः। ततोऽपि किम् इत्याह महतामिति। महतां जन्म विश्वोपकृत्यै सर्वेषामुपकाराय भवति। तथा च महत्प्रभवत्वात् लोकोपकारकत्वाच्च त्वदग्रजयोर्महत्त्वेन तवापि महत्त्वमनुमीयते, महान्तश्च परोपकारपरा इति युक्तस्त्वयापि ममोपकारः कर्तुमित्याशयः ॥१७॥

অনুবাদ। হরিপদের একটি চিহ্ন [কালিয়] সর্পের মস্তকে [থাকিয়া] উত্তম শোভা [করিয়াছিল] ও গরুড় হইতে তাহাকে নির্ভয়ও করিয়াছিল। আর একটি [গয়াসুরের মস্তকে থাকিয়া] পিণ্ডের মাধ্যমে দুস্তর সংসার-সিন্ধুতে নৌকা হইয়া আছে (অর্থাৎ লোকদিগকে সংসারসিন্ধু পার করিতেছে)। তোমাকেও তাহাদেরই তুল্য আমি [মনে] করি। মহৎদিগের জন্ম সকলের উপকারের জন্য হইয়া থাকে ॥১৭॥

उत्फुल्लानामतिसुरभयः सौरभैरम्बुजाना-
मम्भोलेशैस्तरणिदुहितुः शीतलैः शीतलाश्च।
अद्यावश्यं सततगतयः स्वैरमाधूतबर्हा
वर्तिष्यन्ते भवदभिमत प्रीतये लाञ्छनाग्र ॥१८॥

अन्वयः । [हे] लाञ्छनाग्र, अद्य उत्फुल्लानाम् अम्बुजानां सौरभैः अतिसुरभयः, तरणिदुहितुः शीतलैः अम्भोलेशैः शीतलाः च सततगतयः स्वैरम् आधूतबर्हाः [सन्तः] अवश्यं भवदभिमतप्रीतये वर्तिष्यन्ते ॥१८॥]

टीका । पथिक्लेशोऽपि नाशङ्कनीय इत्याह—उत्फुल्लानामिति । परोपकृतये प्रवृत्तानां स्वाच्छन्द्यं दैवोपपादितम् एव भवतीत्याह उत्फुल्लानामिति केचित् । हे लाञ्छनाग्र, पूर्वश्लोकोक्तानां चिह्नानां मध्ये प्रधानभूत, प्राधान्यकारणञ्च तत्रैवोक्तं द्रष्टव्यम् । अद्य इदानीं यात्राकाले इत्यर्थः, उत्फुल्लानां विकशितानाम् अम्बुजानां पद्मानां सौरभैः सौगन्ध्यैः अतिसुरभयः अतिसुगन्धयः, तरणिदुहितुः तपनकन्याया यमुनायाः शीतलैः अम्भोलेशैः जलकणैः शीतलाश्च सततगतयः पवनाः स्वैरम् ईषत् यथा तथा आधूतबर्हाः आधूताः चालिताः बर्हाः मयूरपिच्छानि यैः तादृशाः सन्तः भवदभिमतप्रीतये त्वदीप्सितप्रीतिदानार्थम् अवश्यं वर्तिष्यन्ते कल्पिष्यन्ते प्रवृत्ता भविष्यन्तीति यावत् । वर्तिष्यन्ते अनुवर्तिष्यन्ते त्वाम् अनुगमिष्यन्तीत्यर्थ इत्येके । वर्तिष्यन्ते सेविष्यन्ते इति चापरे ।

अत्र लाञ्छनाग्र इत्याह्वानेन स्ववंशमहत्तरत्वख्यापनात् प्रशंसा सुचिता, सा च प्रकृतदौत्यस्वीकारानुकूलेति द्रष्टव्यम् । सततगतयः इत्यनेन वायोः निवृत्त्यभावप्रतिपादनात् कादाचित्कधर्मप्रसक्तिरपि निराकृता । स्वैरम् इति आधूतक्रियाविशेषणम् । यद्वा वर्तिष्यन्ते इत्यत्र तद् योजनीयम् । विशेषणत्रयेण क्रमात् सौरभ्य-शैत्य-मान्द्यरूपं वायोर्गुणत्रयम् उक्तम् । उत्फुल्लानाम् इत्यनेन आधूतबर्हा इत्यनेन च नेत्रप्रीतिजनकत्वव्यञ्जनात् प्रलोभनम् अपि ॥१८॥

বঙ্গানুবাদ। হে চিহ্নশ্রেষ্ঠ, আজ প্রফুল্ল কমলের সৌরভে অতিসুগন্ধ, যমুনার জলকণদ্বারা শীতল সদাগতি [বায়ু] ধীরে ধীরে ময়ূরপুচ্ছ চালিত করিয়া তোমার অভিমত প্রীতিবিধানার্থ প্রবৃত্ত হইবে ॥১৮॥

त्यक्तव्येयं चिरपरिचिता जन्मभूमीति बुद्ध्या
मा खिद्यस्व त्रिभुवनजनत्राणहेतो कमाङ्क ।
किं न त्याज्यं भवति महतां चेत् परस्योपकारो
वाराणस्या मुनिरपि गतो दक्षिणाशामगस्त्यः ॥१९॥

[अन्वयः । [हे] त्रिभुवनजनत्राणहेतो कमाङ्क, इयं चिरपरिचिता जन्मभूमी त्यक्तव्या इति बुद्ध्या मा खिद्यस्व । परस्य उपकारः चेत् महतां किं न त्याज्यम्, अगस्त्यः मुनिरपि वाराणस्या दक्षिणाशां गतः ॥१९॥]

टीका । ननु नाहं शारीरिकं क्लेशं गणयामि, किन्तु चिरपरिचितायाः जन्मभूमेस्त्यागाद् विषीदामीत्याशयवन्तं पदाङ्कम् आश्वासयितुम् आह—त्यक्तव्येति । यद्वा, परोपकारस्यावश्यकतायां पुनरपि महच्चरितं दृष्टान्तीकृत्य स्वकार्यसाधनार्थम् आह त्यक्तव्येति । हे त्रिभुवनजनत्राणहेतो लोकत्रयवासिनां परित्राणकर्तः महानिति तात्पर्यं प्रकृते तदर्थस्यैवोपयोगात् । त्रिभुवनत्राणकर्तृत्वं चास्य पूर्वं सप्तदशश्लोके युक्त्या व्यवस्थापितं द्रष्टव्यम् । यद्वा, इदं सम्बोधनं द्वितीयार्धगतार्थस्य पूर्वं द्रष्टव्यम्, तत्रैवास्य श्लिष्टत्वात् । इयं चिरपरिचिता आजन्मविदिता जन्मभूमी त्यक्तव्या परित्याज्या इति बुद्ध्या ज्ञानेन इति मत्वेति यावत्, क्वचित् तथैव पाठः ; चिरपरिचितभूमिः जन्मभूमिश्चेति द्वयं विशकलितम् अपि दुस्त्यजं किं पुनः समुदितम् "एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्" इतिवदिति भावः । मा खिद्यस्व मा शोचीः दुःखं मा कार्षीरिति यावत् । खेदाकरणे कारणमाह किं नेति । परस्य उपकारश्चेत् यदि भवति, तदेति शेषः, महताम् उन्नतानां किं न त्याज्यम्, सर्वम् एव त्यागार्हम् इति भावः । यद्वा, महतां त्याज्यं न ईदृशं किं वस्तु इत्यन्वयः । अत्र दृष्टान्तम् आह वाराणस्या इति । अगस्त्यः तन्नामा मुनिरपि मनन-

शीलोऽपि, "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः" इत्यादिगीतोक्तलक्षण-लक्षितो वा, वाराणस्याः काश्याः सकाशात् दक्षिणाशां दक्षिणां दिशं गतः, परोपकारार्थमिति वाक्यशेषः। वाराणस्या इत्यपादाने पञ्चमी ; यद्वा ल्यब्लोपे पञ्चमी, तां परित्यज्येत्यर्थः। 'हातव्येयम्' इति क्वचित् पाठः।

अत्र मुनिरपीत्यनेन परोपकारं विना दक्षिणाशागमने लौकिकफलाभावः सूचितः, तथा वाराणस्या दुस्त्यजत्वमपि। तथा च ऐहिकफलनिस्पृहस्य पारलौकिकमनुसन्दधतो मुनेरगस्त्यस्य काशीपतिसन्निधानपूताया वाराणस्याः परीहारो दुष्कर एवेति भावः।

दक्षिणाशामित्यस्यायम् आशयः। संसारविरक्तस्य मोक्षैकलक्ष्यस्य मुने-रगस्त्यस्य मोक्षसाधनपुर्य्येवैष्टव्येति वाराणसीपरीहारेण मोक्षदायकपुर्य्यन्तर-प्राप्तावपि न क्षतिरिति स्थिते तादृशपुर्य्यन्तरागोचरं दक्षिणां दिशं श्रयता तेन परार्थे महानेव त्यागः स्वीकृत इति।

अत्रेयं पौराणिकी वार्ता। देवद्रोहिणि विन्ध्यमहीध्रे कदाचित् तपनरथ-पथावरुरुत्सया स्वं शिरः समुन्नमयति भीतैर्देवैर्विन्ध्यपूज्योऽगस्त्यः प्रतीकाराशया शरण्यः सम्प्राप्तः। स्वीकृतदेवकार्ये अगस्त्ये विन्ध्यशैलसमीपं सम्प्राप्ते विन्ध्यस्तम् अवनतेन शिरसा प्रणनाम। अगस्त्यश्च तम् आशीर्भिरभिनन्द्य यावदहम् आगच्छामि तावत् त्वम् एवं तिष्ठेत्यभिधाय अपुनरावृत्तये दक्षिणां दिशं ययौ, निववृते च चिराय शिरःसमुन्नमनरूपा वृद्धिर्विन्ध्यस्येति ॥१६॥

অনুবাদ। হে ত্রিলোকবাসীর পরিত্রাণকারণ পদচিহ্ন, এই চিরপরিচিত জন্মভূমি পরিত্যাগ করিতে হইবে এই মনে করিয়া দুঃখ করিও না। পরের উপকার হইলে মহৎ ব্যক্তির কি না ত্যাজ্য (অথবা পরের উপকার হইলে মহৎ ব্যক্তি ত্যাগ করিতে পারে না এমন কোন্ বস্তু আছে ?), অগস্ত্য মুনিও [পরের উপকারের জন্য] কাশী ত্যাগ করিয়া দক্ষিণদিকে গিয়াছিলেন ॥১৬॥

कर्पूरादेः सलिलमभवद् वैतरण्यम्बुतुल्यं
वाक्यागम्यं नदति कठिनं कोकिलः षट्पदोऽपि ।
वृन्दारण्ये किरति गरलं दुःसहं शीतरश्मि-
र्नैतद् वाच्यं सकृदपि सखे सन्निधौ केशवस्य ॥२०॥

[अन्वयः । वृन्दारण्ये कर्पूरादेः सलिलं वैतरण्यम्बुतुल्यम् अभवत् ; कोकिलः षट्पदः अपि वाक्यागम्यं कठिनं नदति । शीतरश्मिः दुःसहं गरलं किरति । हे सखे, एतत् केशवस्य सन्निधौ [त्वया] सकृत् अपि न वाच्यम् ॥२०॥]

टीका । स्वविरहजन्यदैन्यनिवेदनेन दयाम् उत्पाद्य दौत्याय प्रेरयितुम् भङ्गया आह—कर्पूरादेरिति । वृन्दारण्ये कर्पूरादेः सलिलं कर्पूरादिसम्बन्धि जलं सुवासित-शीतलम् इति भावः । आदिपदात् चन्दनादिपरिग्रहः, वैतरण्यम्बुतुल्यं वैतरण्याख्य-यमद्वारावस्थितसुतप्तकुपूयनदीजलतुल्यम् अत्युष्णादुर्गन्धमित्याशयः । अभवत्, कृष्णविरहादिति शेषः, एवमग्रेऽपि । कोकिलः षट्पदः अपि भ्रमरोऽपि स्वभावान्मधुरकण्ठोऽपीत्यपेरर्थः, वाक्यागम्यम् अतिकठिनत्वाद् अश्रुतचरत्वाद् वा वाक्यस्यागोचरं वक्तुमशक्यम् इति यावत्, कठिनं कर्कशं नदति शब्दायते । अत्र 'स्तोकः पाकः' इतिवत् वाक्यागम्यम् इति कठिनम् इत्यस्य विशेषणम्, कठिनमिति 'नदति' क्रियाविशेषणम्, तथा च वाक्यागम्यकाठिन्यवत् नदतीत्यर्थः । शीतरश्मिः स्वभावात् शीतलकिरणयुक्तश्चन्द्रः दुःसहं गरलं विषं किरति विस्तारयति सन्तापयतीति भावः, विरहोद्दीपकतया सर्वम् एतत् दुःखदायकमभवदित्यर्थः । अत्र 'गरल'-पदं तापे लाक्षणिकम्, अत एव 'दुःसहम्' इति विशेषणम् अपि सङ्गच्छते । यद्वा शीतरश्मिपदान्तर्गतं शीत-पदम् अमृताभिप्रायकं द्रष्टव्यम् । वृन्दारण्ये इति सर्वत्र सम्बन्धनीयम् । हे सखे,

एतत् सलिलादेर्वैतरण्यम्बुतुल्यत्वादि केशवस्य सन्निधौ त्वया सकृत् अपि एकवारम् अपि लेशेनापीत्यर्थः, न वाच्यम्। कृष्णस्य विरहाज्जातानाम् अत एव तदागमनमात्रेण विनेष्यमाणानाम् अपि तत्तदवस्थानां स्वाभाविकता-भ्रमेण तस्य कदाचिदप्यागमनाप्रसक्तेरिति भावः। कृष्णविरहेण अस्माकम् इदानीम् ईदृशी अवस्था वर्तते अतस्त्वया दौत्याय कालक्षेपो न कार्य इति प्रस्तुतम्। अत एव 'सखे' इति सखिसम्बोधनेन सम्बन्धयोजनमपि सुतरामेव सुश्लिष्टम्। यद्वा, यथोक्तप्रकारेण मास्तु, यथाकथञ्चिद् अस्माकं वियोगव्यथा त्वयाऽवश्यं कृष्णस्य गोचरीकर्तव्येति सन्देशोऽत्र भङ्गया कथित इति ज्ञेयम्।

तदेतत् सर्वं 'त्वया नागन्तव्यं कथमिह हरे' इत्यादिरूपगोस्वामि-कृत"हंसदूता" (৭০) नुस्मृतिफलम् अनुमीयते ॥२०॥

অনুবাদ। বৃন্দাবনে কর্পূরাদির [সুবাসিত-শীতল] জল বৈতরণীর জল-তুল্য [দুর্গন্ধ ও অত্যুষ্ণ] হইয়াছে, কোকিল ও ভ্রমর অকথ্য কঠিন শব্দ করিতেছে, সুধাংশু অসহ্য গরল ছড়াইতেছে—হে সখে, এ সকল কথা একবারও (অর্থাৎ ঘুণাক্ষরেও) শ্রীকৃষ্ণের কাছে বলিবে না ॥২০॥

प्रस्थानं ते कुलिश-कलनान्निश्चितं पण्डिताग्रै-
श्चित्तेऽस्माकं तदपि रमते याहि याहीति वाणी।
अप्रामाण्यं जनयति सदा नन्दसूनोर्वियोगो
व्याप्यज्ञानाद् व्रजकुलभुवां व्यापकस्यापि सिद्धौ ॥२१॥

[अन्वयः। कुलिशकलनात् ते प्रस्थानं पण्डिताग्र्यैः [यद्यपि] निश्चितं तदपि अस्माकं चित्ते 'याहि याहि' इति वाणी रमते। नन्दसूनोः वियोगः व्रजकुलभुवां व्याप्यज्ञानात् व्यापकस्य सिद्धौ अपि सदा अप्रामाण्यं जनयति ॥२१॥]

टीका। "नन्विदं कुलिशं पश्यथ, तदिदं मे बहिर्गमनस्य अनुमापकम् इत्यवधार्य युष्माभिः स्वस्थचित्ताभिः स्थीयताम् अलं मे प्रेषणक्लेशेन" इत्याशयाने पदाङ्के तद्वाक्यमभ्युपेत्य परिहरति—प्रस्थानमिति। कुलिश-कलनाद् वज्रधारणात् चरणचिह्नस्थितकुलिशाकाररेखादर्शनादित्यर्थः, ते प्रस्थानं मधुपुरगमनम्, यद्वा, गमनमात्रम्, अत एव परस्ताद् याहि याहीति अविशेषेणोक्तम्, पण्डिताग्र्यैः विपश्चिद्वरेण्यैः अनुमाननिपुणैरिति भावः, निश्चितं निश्चयेन अवगतम् अनुमानप्रमाणद्वारेति शेषः। तदपि तथापि अस्माकं व्रजकुलभुवाम् अपण्डितानाम् अपि वस्तुतत्त्वविदाम् इति भावः, तथा च पण्डिताग्र्यैरित्यत्र परिसंख्यया केवलन्यायशास्त्रविद्भिः न तु वस्तु-याथात्म्यज्ञैरपीति व्यवच्छेदः प्राप्तः। चित्ते "याहि याहि" इति वाणी रमते क्रीडति विवक्षिततया प्रतिभातीत्यर्थः।

अयं भावः, मार्गविघ्नाशङ्कया सर्वदा सायुधं विचरन्तं जनं गृहेऽपि गृहीता-युधं विलोक्य "अयं बहिर्गमनवान् आयुधधारित्वाद्" इत्यनुमानेन तस्य बहिर्गमनम् अनुमिनोति जनः। एवं रीत्या पदचिह्नस्यापि कुलिशकलनलिङ्गेन बहिर्गमनम् अनुमानलभ्यं भवति, ततश्च स्थानान्तरगमने कारणाभावाद् गोपोदौत्यार्थं प्रकृतं मथुरागमनमेव तेनानुमानेन प्राप्यत इति।

एवम् अनुमानसिद्धेऽपि गमने याहि याहीति वाण्या विवक्षिततया प्रतिभाने कारणभूतम् उक्तानुमानस्य प्रामाण्यसंशयम् आविष्करोति अप्रामाण्यम् इति। नन्दसूनोः श्रीकृष्णस्य वियोगः अस्मत्तो भिन्नदेशावस्थितिरूपो विच्छेदः व्रजकुल-भुवां व्रजरमणीनां सम्बन्धे व्याप्यज्ञानात् कुलिशधारणरूपहेतुपरामर्शात् व्यापकस्य पदाङ्कीयप्रस्थानस्य सिद्धौ अनुमितौ पण्डिताग्र्यैः कृतायाम् अपीति शेषः, सदा अप्रामाण्यं तज्ज्ञानधर्मिकम् अप्रामाण्यसंशयं जनयति उत्पादयति। 'कथ-

यती'ति पाठेऽपि स एवार्थः। एवञ्च ज्ञानधर्मिकाप्रामाण्यसंशयस्य अर्थसंशायकतया गमनेऽपि संशयो भवतीति याहि याहीति वाणी रमते इति भावः। नन्दसूनोर्वियोगस्य परम्परया अप्रामाण्यसंशयप्रयोजकत्वम् एव। तथाहि गोपीवल्लभत्वेन श्रीकृष्णो व्यापकः गोप्यो वयं तदधीनत्वेन व्याप्याः, वयम् अत्र वर्तामहे स तु नास्तीत्यतो व्याप्यसत्त्वस्य व्यापकसत्त्वनियामकत्वमिति पण्डिताग्रयवाक्येऽप्रामाण्यसंशयो जायते। एवञ्च प्रकृतानुमानेऽपि अप्रामाण्यसंशयो भवतीत्यभिप्रायेण वियोगस्य अप्रामाण्यसंशायकत्वमुक्तम् इति ध्येयम्।

बालावबोधार्थम् अत्र किञ्चित् प्रस्तूयते। "साध्याभाववदवृत्तित्वं व्याप्ति"रिति व्याप्तिलक्षणम्, व्याप्त्याश्रयत्वं व्याप्यत्वम् इति च व्याप्यलक्षणम्। साध्यञ्च निश्चयज्ञानविषयीभूतं वस्तु, तदेव व्यापकम् इत्यप्याख्यायते। एवञ्च साध्यस्य निश्चयज्ञानविषयीभूतस्य वस्तुनः यत्र प्रदेशे अभावो वर्तते तत्र यन्न तिष्ठति तद् व्याप्यम् अनुमानप्रयोजको हेतुरित्यर्थः। पर्वतो वह्निमान् धूमादित्यत्र वह्निः साध्यः व्यापकः, धूमो वह्निव्याप्यो हेतुः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्तीति साध्याभाववदवृत्तित्वं धूमस्य। एवञ्च व्याप्यसत्त्वे व्यापकसत्ता नियता इति स्थितम्। प्रकृते कुलिशकलनं हेतुः प्रस्थानं साध्यम्, हेतुर्व्याप्यं साध्यं व्यापकं, ते च एकस्मिन् पदचिह्नरूपे पक्षे वर्तमाने इति तादृशहेतुना प्रस्थानस्य अनुमानं भवति। एवं चेद् गोपीनां सत्त्वे एव गोपीवल्लभत्वसिद्धिरिति गोपीवल्लभः श्रीकृष्णो व्यापकः गोप्यो व्याप्याः, ततश्च व्यापकस्य तस्य अभाववति प्रदेशे गोपीभिः व्याप्यरूपाभिः कथम् अपि न स्थेयं, स्थीयते तु ताभिः व्यापकश्रीकृष्णरहिते वृन्दावने इति व्याप्यज्ञानाद् व्यापकसिद्धिरिति सिद्धान्तः संशयग्रस्तो दृश्यते इति ॥२१॥

অনুবাদ। তোমার বজ্রধারণ হেতু (অর্থাৎ তুমি বজ্রধারণ করিয়াছ

বলিয়া; তোমাতে বজ্রচিহ্ন দেখিয়া) পণ্ডিতশ্রেষ্ঠগণ [যদিও] তোমার প্রস্থান (মধুপুরে গমন) নিশ্চয় করিয়াছেন, তথাপি আমাদের মনে "যাও যাও" এই বাক্য উদিত হইতেছে। [আমাদের সহিত] শ্রীকৃষ্ণের বিচ্ছেদ ব্রজরমণীগণের সম্বন্ধে, ব্যাপ্যজ্ঞান হেতু ব্যাপকের সিদ্ধিবিষয়ে (ব্যাপ্যের জ্ঞানাধীন ব্যাপকের অনুমিতিবিষয়ে) সর্বদা প্রামাণ্যসংশয় জন্মাইতেছে ॥২১॥

উক্তপ্রায়ং তরণিতনয়া-নাগয়োস্তত্কথায়া-
মাস্তে কো বা জগতি ভবতাং ভীতিহেতুঃ ক্রমাঙ্ক।
কিঞ্চ স্বান্তে ক্ষণমপি ভবত্সঙ্গমে যাত দূরং
ভীতির্মৃত্যোরপি কিমশনিং লোকরীত্যা দধাসি ? ॥২২॥

[অন্বয়ঃ। [হে] ক্রমাঙ্ক, বা, জগতি ভবতাং ভীতিহেতুঃ কঃ আস্তে, [ইতি] তরণিতনয়া-নাগয়োঃ তত্কথায়াম্ উক্তপ্রায়ম্। কিং চ, স্বান্তে ক্ষণম্ অপি ভবত্সঙ্গমে [সতি] মৃত্যোঃ ভীতিঃ অপি দূরং যাতি, [অতঃ] অশনিং কিং লোকরীত্যা দধাসি ? ॥২২॥]

টীকা। ইদানীং কুলিশকলনস্য যাদৃচ্ছিককতাপ্রত্যায়নেন প্রাগুক্তং প্রস্থানানুমানম্ অপোহ্য বস্তুগত্যৈব যাহি যাহীতি বাণ্যা অর্থবত্ত্বং প্রত্যায়য়িতুম্ আহ— উক্তপ্রায়ম্ ইতি। বা ইতি পক্ষান্তরার্থকং, পূর্বপক্ষাদ্ বিশেষসূচনায় সমুপাত্তম্। হে ক্রমাঙ্ক, জগতি ভবতাং ভীতিহেতুঃ ভয়কারণং কঃ আস্তে ? ন কোঽপি ইত্যর্থঃ। ভবতামিতি গৌরবে বহুবচনম্, যদ্বা কালিয়াদিশিরঃস্থিতপদাঙ্কান্তরসংগ্রহার্থং তত্। তথা চ ভয়াভাবান্ন তদুপশমনার্থং কুলিশকলনম্ এবঞ্চ "উত্পাতাদ্যা-শঙ্কয়া বজ্রধারণবান্ অয়ম্" ইতি পরামর্শাভাবাত্ তত্পরামর্শমূলকম্ "অয়ং প্রস্থানবান্ তাদৃশবজ্রধারণাত্" ইতি পূর্বোক্তম্ অনুমানম্ অপি অনাস্পদম্ ইতি ভাবঃ। ইতি ভবতাম্ অভয়ম্ ইত্যর্থঃ, তরণিতনয়া-নাগয়োঃ যথাক্রমম্

"आस्तां मध्ये तरणितनया" इति द्वादशश्लोके तरणितनयायाः, "एकं चिह्नं हरिपदभवम्" इति सप्तदशश्लोके नागस्य च तत्कथायां तस्यां पूर्वोक्तायां कथायाम् ; तरणितनयानागसम्बन्धिपूर्वोक्तकथायाम् इति समुदितार्थः । तरणितनयानागयोरिति सम्बन्धसामान्ये षष्ठी । अल्पाच्तरस्यापि नागस्य परनिपातः क्रमानुरोधात् । उक्तप्रायं बाहुल्येन कथितम् । प्रायपदस्यायम् आशयः । यद्यपि तत्र तत्र वाचा भयाभावो न निबद्धः, तथापि पर्यालोचने स एवार्थ आयाति । तथाहि, तरणितनयाकथायां नक्रचक्रभीषणाया यमुनाया अनायाससमुत्तरणविधानात्, नागकथायां कालियस्य गरुडान्निर्भयत्वसम्पादनकथनाच्च अर्थतस्तवैव निर्भयत्वम् आयातम् इति प्रायम् इत्युक्तम् ।

एतावतापि अपरितोषादाह किञ्चेति । किञ्च अपिच, अन्यदपि भयाभावकारणम् आकर्ण्यताम् इत्यर्थः । स्वान्ते हृदये क्षणम् अपि अल्पकालम् अपि भवत्सङ्गमे भवतस्तव सम्पर्के सतीति शेषः, मनसि त्वयि चिन्तिते सतीत्यर्थः । मृत्योः यमात् भयम् अपि यतोऽधिकं भयं नास्ति तादृशं यमभयम् अपीत्यपेरर्थः, दूरं याति स्मरतो जनात् अपैति । तथाच यत् स्मृतम् अपि जनानाम् अभयं ददाति स स्वयं कथं बिभीयादिति भावः । अत्र स्वान्ते भवत्सङ्गमे इति व्यधिकरणसप्तम्यौ । केचित्तु भवतः सङ्गमो यस्मिन् इति व्यधिकरणबहुव्रीहिणा भवत्सङ्गमे इति स्वान्ते इत्यस्य विशेषणम् आहुः । प्रकृतम् आह किम् अशनिम् इति । अत्र अतः इति हेतुबोधकं पदमध्याहार्यम् । अतः कारणात् उक्तरीत्या भवतो भयाभावस्य व्यवस्थापितत्वात् अशनिं वज्रं किं लोकरीत्या लोकाचारानुसरणेन दधासि धारयसि बिभर्षीति यावत् ; क्वचित् तथैव पाठः । किमिति प्रश्ने । लोकरीत्येत्यस्यायं भावः । यथा लोके अभ्यासवशात् कश्चिद् वर्षाव्यतिरिक्तेऽपि काले निशि छत्रधरः प्रयाति,

यथा वा कश्चिद् दिवापि सयष्टिक एव प्रतिष्ठते तद्वत् तवापीयम् अशनिरभ्यास-वशादागता इति तर्कयामीति। एवञ्च उत्पातोपशमनरूपकारणाभावात् अशनि-कलनहेतुकं प्रस्थानम् असिद्धम् इति युक्तैवेयं "याहि याही"ति प्रेरणेति भावः। केचित्तु भयाभावकथनात्मकम् इदं प्रोत्साहनवाक्यम् इत्याहुः।

अत्रेदम् अवधेयम्। तरणितनया-नागकथायां भयाभावस्य अवाचनिकत्वात् उक्तप्रायमिति प्रायपदमुपात्तम् अत एव तत्रापरितोषात् किञ्चेति पक्षान्तरमपि स्वीकृतम्। परं "भक्षितेऽपि लशुने न शान्तो व्याधिरि"ति रीत्या एतावतापि भयाभावस्य वाचनिकता नैव जाता, अत्रापि पक्षे अनुमानादिनैव तदर्थ-स्याधिगम्यत्वात्। किञ्च, स्वान्ते भवत्सङ्गमे मृत्योर्भयमपि दूरं यातीत्यत्र कश्चित् हेतुरपि कविना न कथितः ॥२२॥

অনুবাদ। হে পদাঙ্ক, অথবা জগতে তোমাদের ভয়ের কারণ কি আছে? [ইহা] যমুনা ও [কালিয়] নাগের পূর্বোক্ত কথায় [১২শ ও ১৭শ শ্লোকে] প্রায় বলিয়া আসিয়াছি। আরও [শোন], চিত্তে ক্ষণকাল মাত্রও তোমার সঙ্গম হইলে (অর্থাৎ ক্ষণমাত্র তোমাকে চিন্তা করিলে) যমের ভয়ও দূরে যায়, [অতএব] বজ্রটি কি লোকাচার হিসাবে ধারণ করিয়াছ? ॥২২॥

येनारूढं विषधरशिरो भूरि वक्तव्यमन्यत्
किं वाऽकारि स्तनगिरिवरारोहणञ्च श्रुतं तत्।
उत्पन्नस्य प्रियतम पदा तेन भीतिस्तवास्ते
को वा ब्रूयादिति हि सदृशं कारणेनैव कार्यम् ॥२३॥

[अन्वयः। अन्यत् भूरि किं वा वक्तव्यम्, येन विषधरशिरः आरूढं स्तनगिरिवरारोहणं च अकारि, तत् श्रुतम्, हे प्रियतम, तेन पदा उत्पन्नस्य तव भीतिः आस्ते इति कः वा ब्रूयात्। हि कार्यं कारणेन सदृशम् एव [भवति] ॥२३॥]

टीका। ननु वज्रं विना भगवदीयत्वानिश्चयाद् वज्रविशिष्टस्यैव तस्य कालियादिभयाभावसम्पादकत्वरूपोऽनुभावो न त्वेककस्येति कुतो लोकाचारानुरोधेन वज्रधारणप्रसङ्ग इत्याह—येनेति। अन्यत् उक्तात् अतिरिक्तं किं वा वक्तव्यं न वक्तव्यमेवेत्याशयः, तथापि स्थूणानिखननन्यायेन वक्ष्यमाणमप्युच्यते इति शेषः। यद्वा, यद् इदानीम् वक्ष्यते इतोऽन्यत् किं वा वक्तव्यम् इति योजना। केचित्तु पाठक्रमं बहुमन्यमाना "येनारूढं विषधरशिरः" इत्यनन्तरमेवैतद् योजयन्ति। येन पदा श्रीकृष्णस्येति शेषः, विषधरशिरः विषधरस्य कालियस्य शीर्षम् आरूढम् आक्रान्तम्, येन स्तनगिरिवरारोहणम् अस्माकं स्तनशैलाधिरोहणं च अकारि, "एका तदङ्घ्रिकमलं सन्तप्ता स्तनयोरधात्" इति भागवतोक्तेरिति भावः। यद्वा, पूतनायाः स्तनगिरिवरारोहणम् इत्यर्थः। अत्र कठिनोन्नतत्वसाधर्म्येण स्तनस्य गिरिवरसाम्यम्। तदिति एतदित्यर्थः, श्रुतं भवतेति शेषः। यद्वा, एतद् विश्रुतं प्रसिद्धम् इत्यर्थः। हे प्रियतम, प्रियतमस्य श्रीकृष्णस्य पदचिह्नत्वादिति भावः। एतेन कुलक्रमागतम् इदम् अस्माभिः सह तव सौहार्दम् अवश्यं मानयता त्वया अस्मदुपकारः कर्तव्य एवेति ध्वनितम्। तेन तादृशेन अकुतोभयेनेत्यर्थः, पदा उत्पन्नस्य जनितस्य तव भीतिः आस्ते इति को वा ब्रूयात् वक्तुं शक्नुयात्। अवचने कारणम् आह हीति। हि यस्मात् कार्यं कारणेन सदृशम् एव भवतीति शेषः। तथा च "पितुश्चरितं सुत एव धत्ते" इति "जनकस्य स्वभावो हि जन्ये तिष्ठति निश्चितम्" इत्यादि सूक्त्यनुसारात् कालियशीर्षाधिरोहण-कुलकामिनीकौलीन्यहान्यादिरूपसाहसिककर्मकर्तुः श्रीकृष्णस्य पदा उत्पन्नस्य ते भयं न कार्यमिति भावः। एवं च तवेदम् अकुतोभयत्वं जनकादागतं न तु वज्रधारणौपाधिकमिति वज्रधारणे लोकाचारं विना कारणान्तरं नास्तीत्याशयः।

पदेति करणे तृतीया। केचित् येन तेनेति श्रीकृष्णेन इत्यर्थं योजयन्ति, तत्र पदा इत्यत्र हेतौ, तेनेत्यत्र च करणे तृतीया ॥२३॥

অনুবাদ। আর অধিক কি বলিব? যে বিষধরের (কালিয়ের) মস্তকে আরোহণ করিয়াছে, [আমাদের] স্তনগিরিবরেও আরোহণ করিয়াছে—[ইহা] তুমি [ও] শুনিয়াছ। হে প্রিয়তম, সেই [শ্রীকৃষ্ণের] পদদ্বারা উৎপন্ন তোমার ভয় আছে, ইহা কে বলিতে পারে? যে হেতু, কার্য কারণের তুল্যই হইয়া থাকে ॥২৩॥

ज्ञातं ज्ञातं कुलिशसदृशं चिह्नमेतन्न वज्रं
नो चेदेवं जनयति कथं लोचनप्रीतिधाराम्।
दूरस्थञ्च ग्लपयति मनो निस्वनो यस्य तत् स्या-
न्नेत्रप्रीतिप्रदमिति वचो न श्रुतं क्वापि केन ॥२४॥

[अन्वयः। ज्ञातं ज्ञातम् एतत् कुलिशसदृशं चिह्नं वज्रं न, नो चेत् कथम् एवं लोचनप्रीतिधारां जनयति? यस्य निस्वनः दूरस्थं च मनः ग्लपयति तत् नेत्रप्रीतिप्रदं स्यात् इति वचः केन क्व अपि न श्रुतम् ॥२४॥]

टीका। उन्मत्तयापि राधया स्वकर्मण्यभिनिवेशवत्या पूर्वतृतीयश्लोके [२१शे] पदाङ्कगतं वज्रचिह्नं प्रकृतवज्रं मत्वा तद्धेतुकं पदाङ्कस्य प्रस्थानम् अनुमितम्, परतश्च द्वाभ्यां श्लोकाभ्यां स्वबुद्धया उद्भावितेन भयाभावलिङ्गेन प्रकृतवज्रग्रहणस्य असाङ्गत्यं तेन तस्य लौकिकत्वञ्च अवधारितम्, इदानीं पुनः "क्षणात् प्रबोधमायाति लङ्घ्यते तमसा पुनः" इति रीत्या क्षणं प्रत्यापन्न-प्रकृतिका सा तस्यावास्तवत्वम् अवधारयन्ती पदाङ्कं प्रशंसया प्रोत्साहयति—ज्ञातं ज्ञातम् इति। उन्मत्तोऽपि स्वहितमनुसन्धत्त एवेति भावः। हर्षातिशयेन

द्विरुक्तिः, स च चिरसंशयितस्य पदाङ्कीयवज्रस्य स्वरूपनिर्णयाद्विज्ञेयः। यद्वा, निर्णयदार्ढ्यसूचनाय सेति।

एतत् त्वयि दृश्यमानं वस्तु कुलिशसदृशं वज्राकारं चिह्नम्, वज्रं न साक्षात् कुलिशं न भवतीति शेषः। विपक्षे बाधकम् आह नो चेदिति। नो चेत् यदि कुलिशसदृशं चिह्नं न भवेत् यदि साक्षाद् वज्रं भवेदिति यावत्, तदा तदिति शेषः। कथम् एवम् अनुभूयमानाम् इत्यर्थः, लोचनप्रीतिधाराम् प्रीतिजन्या धारा प्रीतिधारा, लोचनयोः प्रीतिधारा, ताम् आनन्दोत्थाम् अश्रुधारां जनयति उत्पादयति। विषादादपि नेत्रधारा प्रवहतीति प्रीतीत्युक्तम्। यद्वा लोचनप्रीतिधारां नयनयोर्हर्षपरम्पराम्।

ननु वज्रस्य नेत्रप्रीतिविधाने का बाधेत्याह दूरस्थम् इति। चोऽप्यर्थे, यस्य वज्रस्य निस्वनः दूरस्थम् अपि मनः श्रोतुरिति शेषः, मनसो दूरत्वञ्च श्रोतुर्दूरत्वेन ज्ञेयम्, ग्लपयति भयोतपादनेन विषण्णीकरोति तत् स्वयमिति शेषः, समीपस्थम् इति हृदयं नेत्रप्रीतिप्रदत्वस्य अन्यथा अनुपपत्तेः। अत एव 'दूरस्थम्' इत्यपि वज्रापेक्षयैव न तु निस्वनापेक्षया दूरत्व-समीपत्वयोरेकसम्बन्धित्वौचित्यात् निस्वनस्य दूरस्थत्वे मनोग्लानिविधानासम्भवाच्च। नेत्रप्रीतिप्रदं स्यात् इति वचः केनापि क्वापि कुत्रापि काले प्रदेशे वा न श्रुतम्। तथा च व्याघ्रादेरिव यस्य दूरस्थस्यापि निस्वनो जनान् उद्वेजयति तत् स्वयं समीपस्थं सत् कथं नेत्र-प्रीतिं दद्यादिति नेदं परमार्थतो वज्रमिति भावः। केचित् यद् यत् कठोर-शब्दवन्न तन्नेत्रप्रीतिजनकम् इदं चेत् कठोरशब्दवद् वज्रं स्यात्तदा नेत्र-प्रीतिकरं न स्यादित्यापत्त्या नयनप्रीतिजनकत्वेन वज्रभिन्नत्वम् अवधारितम् इति भावमाहुः।

अत्र दूरस्थशब्दात् परोऽप्यर्थकश्चकारो निस्वन इत्यतः परम् अपि द्रष्टव्यः।

तथा च यस्य निस्वनोऽपि दूरस्थम् अपि इत्याद्यर्थः। एवं क्वापि इत्यत्र 'पि'-शब्दश्च मध्यमणिन्यायेन केन इत्यनेनापि सम्बध्यते इति द्रष्टव्यम् ॥२४॥

অনুবাদ। বুঝিয়াছি বুঝিয়াছি, এটি বজ্রতুল্য চিহ্ন [মাত্র], বজ্র নহে, [তাহা] না হইলে কিরূপে এই প্রকার নয়নের আনন্দাশ্রুধারা জন্মাইতেছে? যাহার শব্দও দূরবর্তী মনকেও বিষণ্ণ করে, সে [স্বয়ং নিকটস্থ হইয়াও] নয়নের প্রীতিপ্রদ হইতে পারে এইরূপ কথা কেহও কোথায়ও শুনে নাই ॥২৪॥

आस्ते चैवं नवजलधरो यं विलोक्य प्रमोदा-
न्नृत्यन्त्युच्चैर्विषधरभुजो निस्वनोऽप्यस्य भीमः।
मिथ्यैवाद्यं यदवधि मया वीक्षितस्तादृशोऽयं
कन्दर्पो मां तदवधि दहत्येव बाणैरसह्यैः ॥२५॥

[अन्वयः। एवं च नवजलधरः आस्ते, यं विलोक्य विषधरभुजः प्रमोदात् उच्चैः नृत्यन्ति. अस्य निस्वनोऽपि भीमः। आद्यं मिथ्यैव, मया यदवधि तादृशः अयं वीक्षितः तदवधि एव कन्दर्पः असह्यैः बाणैः मां दहति ॥२५॥]

टीका। कठिनध्वनिशालिनोऽपि नेत्रोत्सवसाधकतां लौकिकदृष्टान्तेन प्रसाध्य खण्डयति आस्त इति। वाक्यम् इदं प्रश्नोत्तरभावेन उपन्यस्तम् इति द्रष्टव्यम्, तथा च पूर्वार्धं पूर्वपक्षरूपम् उत्तरार्धम् उत्तरपक्षरूपम् इति।

एवं च एवम् अपि वक्ष्यमाणविधया विरुद्धधर्मोपेतं वस्त्वपि इत्यर्थः। आस्ते जगति विद्यते। इति यदि ब्रूषे इति भावः। किं तत्? इत्यपेक्षायाम् आह नवजलधर इति। एतत् "एवम्" इत्यनेनोपात्तस्य वस्तुनः परिचायकम्। अनयैव वक्रीत्या अत्र व्याख्या कार्या, न तु 'एवं नवजलधरश्च आस्ते' इति वा 'एवं च नवजलधर आस्ते' इति वा यथाश्रुतम् अन्वयः

कार्यः, नवजलधरस्य पूर्वम् अनुपात्ततया चकारेण समुच्चयासंभवात्। अर्थस्त्वेक एव। अत्र नवेति जलधरविशेषणं मयूरहर्षनृत्यविधायकत्वविषया समुपन्यस्तम्। यद्वा, मेघस्य वार्षिकत्वलाभार्थं तत्, वर्षास्वेव मयूरनृत्य प्रसिद्धेः। यं नवजलधरं विलोक्य विषधरभुजः अहिभुजः मयूरा इति यावत्, प्रमोदात् हर्षात् उच्चैः उन्नताः सन्तः नृत्यन्ति, अत्र पुच्छोन्नमनान्मयूराणाम् उन्नतत्वम् औपचारिकम्। यद्वा उच्चैः अधिकं यथा स्यात् तथा नृत्यन्तीति नर्तनक्रियाविशेषणम्। "प्रमोदा" इति पाठे मयूरविशेषणम्, हर्षान्विताः सन्त इति तदर्थः। अस्य निस्वनः गर्जितम् अपि भीमः अस्तीति शेषः। अत्र निस्वनस्य भीमत्वम् उद्दीपकत्वात् विरहिणां सम्बन्धे द्रष्टव्यम्। वस्तुतो वज्रगर्भतयात्र भयजनकत्वं पदाङ्कस्याभिप्रेतं प्रतिभाति विरहिभयजनकत्वोक्तौ तात्पर्याभावात्।

एवं नवजलधरदृष्टान्तेन भीमशब्दशालिनोऽपि नेत्राह्लादकत्वे प्रतिपक्षेण प्रतिष्ठापिते "परमतम् अप्रतिषिद्धम् अनुमतं भवति" इत्युक्तदिशा स्वसंवेद्यतया भीमनिस्वनत्वम् अभ्युपगम्य नेत्राह्लादकत्वं निराचष्टे मिथ्यैवेति। आद्यं पूर्वोल्लिखितयोर्वाक्ययोः प्रथमवाक्यं नवजलधरदर्शनानुमितप्रीतिजनितशिखिनृत्यकथनरूपम् इत्यर्थः, मिथ्यैव व्यर्थमेव विरुद्धकार्यदर्शनादिति भावः। नृत्यन्तु प्रत्यक्षसिद्धमिति न प्रतिवादमर्हतीति कारणस्य प्रीतेः मिथ्यात्वं ग्राहयति यदवधीति। मया यदवधि यस्माद् दिनात् आरभ्य तादृशः नवीन इत्यर्थः, अयं प्रक्रान्तः जलधरः वीक्षितः दृष्टः तदवधि एव कन्दर्पः असह्यैः दुःसहैः बाणैः मां दहति पीडयति। विरहिणां मेघशब्दश्रवणस्य कामपीडाजनकत्वात्। अत एव "तस्मिन्नुद्यन्नवजलधरध्वानमाकर्ण्य भूयः कन्दर्पेण व्यथितहृदया" इत्युक्तं प्राक्। तथा च "मेघालोकेषु नृत्यं भवति च

शिखिनाम्'' इत्युक्तेः कविसमयप्राप्तं शिखिनृत्यं न प्रीतिजन्यमिति भावः। यद्वा, 'तादृशः' इत्यस्य नवजलधरसदृशः श्रीकृष्ण इत्यर्थः। अत्र पक्षे

धैर्यात् काचित् कतिचन सखीशिक्षया लज्जयाऽन्या
भीत्या काचित् कतिचन रुषा काचिदालस्यतोऽपि।
स्वाधीनेऽपि त्वयि रतिगुरौ केलिकुञ्जावलम्बि-
न्यस्वाध्यायाः कति कति निशा मादृशामत्र नासन्॥

इति कविभाषितदिशा वृन्दावनेऽपि तेन तेन मानादिना कारणेन परतश्च मथुरागमनेन विच्छेदप्राप्त्या निरवच्छिन्नयथाभिलषितविहाराद्यभावान्मया असह्यैव कामजनिता पीडा अनुभूयते न तु कृष्णादर्शनात् पूर्वमपीति यदवधि-तदवध्योरर्थः। एवञ्च यत्सादृश्यादन्योऽपि जनो दुःसहपीडाजनको भवति स कथं प्रीतिहेतुर्भवेदिति भावः। अत्र श्रीकृष्णदर्शन-(मेघपक्षे—मेघदर्शन-)कन्दर्प-कर्तृकदहनयोः साकाङ्क्षतासिद्ध्यर्थम् उभयोर्हेतुहेतुमद्भावः कल्पनीयः, तथा च कामकर्तृकदहनं कृष्णादिदर्शनजन्यमित्यर्थ इति न काचिदनुपपत्तिः।

केचिदेवं व्याचक्षते। तादृश इति नृत्यन्मयूरसहकृतोऽयं नवजलधरः इत्यर्थः। तथा च नवजलधरस्य कामपीडाजनकत्वे नर्तनशीलमयूराणां सह-कारित्वम् एव अत एवोभयोर्युगपत् समवधानं न तु नवजलधरसन्दर्शनेन मयूराणां नर्तनमित्यभिप्राय इति।

मिथ्यैवाद्यम् इत्यत्र मिथ्यैवायम् इति पाठे अयं मेघालोके मयूरनृत्यरूपः कविसमयः इत्यर्थः, यद्वा 'तादृशः अयम्' इत्याद्यस्य 'अयं'-पदस्य अन्वयः। द्वितीयम् 'अयं' पदं कन्दर्पान्वयि, प्रतिक्षणपीडादायकत्वेन प्रत्यक्षवदवभासमान इति तदर्थः। एवञ्च मिथ्यैवेत्यत्र विधेयस्य मिथ्यात्वस्य कण्ठोक्तोद्देश्यकत्वा-भावात् अध्याहृतेत्यादिपदपरामृष्टवाक्यार्थोद्देश्यकत्वं द्रष्टव्यम् ॥२५॥

অনুবাদ। [যদি বল] এরকমও ত [বস্তু] আছে [যেমন] নূতন মেঘ, যাহাকে দেখিয়া ময়ূরগণ আনন্দে পুচ্ছ উন্নত করিয়া নৃত্য করিয়া থাকে, [অথচ] উহার গর্জনও ভীতিজনক। [উত্তর—] প্রথম কথাটি (অর্থাৎ নবমেঘ দর্শনে ময়ূরগণ আনন্দে নৃত্য করে—এই কথা) মিথ্যা ; কারণ, আমি যেদিন হইতে এই নবজলধর দেখিয়াছি (অথবা নবজলধর তুল্য এই কৃষ্ণকে দেখিয়াছি), সেই দিন হইতেই কাম আমাকে অসহ্য বাণদ্বারা পীড়া দিতেছে। (অথবা পক্ষে ভাবার্থ এই—যাহার তুল্য বস্তু দেখিলেও কষ্ট পাইতে হয়, তাহার দর্শন কিরূপে সুখকর হইতে পারে) ॥২৫॥

क्रोशस्यान्ते चरणयुगलं क्षालयत् सूरजायां
यायाः किञ्च क्षणमपि तरोर्मूलमासाद्य तिष्ठेः ।
उत्कृष्टं यज्जनयति पदं सेवकानां जनानां
पद्भ्यां हीनं तदिति जगतां प्रत्ययः कूर्मलोम ॥२६॥

[अन्वयः । क्रोशस्य अन्ते सूरजायां चरणयुगलं क्षालयत् यायाः । किं च, तरोः मूलम् आसाद्य अपि क्षणं तिष्ठेः । यत् सेवकानाम् उत्कृष्टं पदं जनयति तत् पद्भ्यां हीनम् इति जगतां प्रत्ययः कूर्मलोम ॥२६॥]

टीका । ननु पादहीनमहं कथं गमिष्यामीति सम्भावितप्रश्ननिराकरण-मुखेन गमनसौकर्यमुपदिशति । तत्रापि आयाससाध्यत्वात् पादवत्त्वसाधनं पश्चात् चिकीर्षन्ती प्रथमं गमनसौकर्यम् आह—क्रोशस्येति । क्रोशस्य अष्टसहस्र-हस्तपरिमितस्य पथ इति शेषः, अन्ते अवसाने समाप्तौ इति यावत्, यद्वा सीमायाम्, सूरजायां सूर्यतनयायां यमुनायाम् इति यावत्, चरणयुगलं पदद्वयं क्षालयत् धौतं कुर्वत् यायाः गच्छेः, क्रोशान्ते चरणप्रक्षालनस्य श्रमहरत्वश्रवणा-दिति भावः । किञ्च अपिच, न केवलं चरणयुगलम् एव क्षालयेः वक्ष्यमाणम्

अपि कुर्या इत्यर्थः । तदाह तरोरिति । तरोः वृक्षस्य मूलम् आसाद्य मार्गक्रमेण प्राप्य क्षणं तिष्ठेः गमनान्निवृत्त' भवेः । अत्र श्रमहानेर्विवक्षितत्वात् तरोरित्यनातपस्थानाभिप्रायकम् । तथा च पथि वृक्षाणां सुलभत्वेऽपि सर्वे न छायाप्रधाना इति सर्वत्रावस्थानप्रसक्तिर्निरस्ता, अन्यथा तत्र तत्रावस्थाय गमने मथुराप्राप्तौ महान् विलम्बः स्यात् । यद्वा, एतदर्थम् एव क्षणम् इति पदम् उपात्त' वेदितव्यम् । अत एव 'क्रोशस्यान्ते' इत्यनेन चरणयुगलक्षालनस्य अवधिविधानम् अपि नानुपपन्नम् । अत्र "किञ्चापि"-शब्दयोरन्यतरस्त्यक्तुं शक्य इति प्रतिभाति । 'क्षालयन्' इति पाठे परत्रापि लिङ्गव्यत्ययो द्रष्टव्यः ।

ननु श्रुतं यच्छ्रोतव्यम्, किन्तु सर्वमेतद् यदधीनं तच्चरणयुगलमेव मे नास्तीति कुतो वा प्रक्षालनं कुतो वा तरुमूलासादनम्? अत एव दौत्यमपि दूरापेतमेवेत्याह—उत्कृष्टम् इति । यत् त्वदभिन्न' पदचिह्नमित्यर्थः, सेवकानाम् उपासकानां जनानाम् उत्कृष्ट' पदं स्थानं ब्रह्मलोकादीत्यर्थः, जनयति उत्पादयति तेभ्यो ददाति, तत् पदचिह्न' पङ्क्त्यां हीनम् इति जगतां जगद्वासिनां प्रत्ययः ज्ञानं प्रमेति यावत्, कूर्मलोम कूर्मलोमप्रत्ययवत् भ्रमः । अत्राक्षिप्तेनाप्रसिद्धत्वरूपसाधारणधर्मेण कूर्मलोम इवेत्युपमानिर्वाहः । तथा च यथा लोम्नि कूर्मीयत्वम् अप्रसिद्धं तथैतस्य प्रत्ययस्य जगदीयत्वम् अपीत्यर्थः । एतेन कूर्मलोम्नः अप्रसिद्धत्वेन उपमानाप्रसिद्धिदोषोऽपि निरस्तः । यद्वा प्राचीनोक्ता अद्भुतोपमेयम्, अद्भुतोपमायान्तु "उभौ यदि व्योम्नि पृथक् प्रवाहावाकाशगङ्गापयसः पतेताम्" इत्यादिवत् उपमानाप्रसिद्धिर्भूषणायैव । अत्र 'क्षालयत्' इत्यादेः "पदचिह्नम्" इति कर्तृपदमूह्यम् ।

अत्र "यद् यत् उत्कृष्टपददायकं तत् तत् पदवत्" इति व्याप्त्या, "यद् यत् उत्कृष्टपददायकं तत् तत् न पदशून्यं त्वं यदि पदशून्यं स्यास्तदा उत्कृष्टपद-

दायकं न स्याः" इत्यापत्त्या वा तव पदवत्त्वं सिद्धमेवेत्यभिप्रायः। अन्यथा निर्धनस्यापि धनदातृत्वापत्तिरिति भावः। देयद्रव्यस्वरूपं दातुस्तादृशद्रव्य-शालित्वे नियामकम् इति उत्कृष्टपददातुस्तव पदमपि उत्कृष्टम्, पदस्योत्कर्षश्च गमनादिचातुर्यमिति साधुगमनशीलपदाधिकारिणा त्वया सुगमैव मथुरेति उत्कृष्टविशेषणस्याशयः। अनयैव रीत्या सेवकानामिति बहुवचनाक्षिप्तं देयस्य पदस्य बहुत्वं दातृपदबहुत्वस्यानुमापकम् इति पद्भ्यां हीनम् इत्युक्तिरपि नासङ्ग-तेति ज्ञेयम्। अत्रानुमाने पदशब्दस्य स्थान-चरणोभयार्थकता बीजम्। कविना हेतुबोधकवाक्ये पदशब्दस्य स्थानवाचकता स्वीकृता साध्यबोधकवाक्ये तु चरणार्थकतेत्यतो वस्तुशून्येयम् अनुमितिर्जातेति द्रष्टव्यम्। एवञ्च प्रकृतोपकारा-भावात् स्वशक्तिप्रदर्शनमात्रपर्यवसितमिदम् ॥२६॥

অনুবাদ। এক ক্রোশ পরে যমুনায় চরণদ্বয় প্রক্ষালন করিয়া যাইবে। আরও, তরুমূলে আসিয়াও ক্ষণকাল অবস্থান করিবে। যে সেবকদিগকে উৎকৃষ্ট পদ (ব্রহ্মলোকাদি স্থান) দান করে সে [স্বয়ং] পদদ্বয়হীন—জগতের এই জ্ঞান কূর্মলোমের ন্যায় [মিথ্যা] ॥২৬॥

आरुह्यास्मद्धृदयमथवा गच्छ तुङ्गं तुरङ्गं
सौरं तेजः सजल-जलदच्छायया वारणीयम्।
वृष्टिं नैव त्वदुपरि करिष्यत्ययं चण्डरश्मिः
खेदाशङ्की सरसिजसखस्त्वद्धृताम्भोरुहस्य ॥२७॥

[अन्वयः। अथवा, तुङ्गं तुरङ्गम् अस्मद्धृदयम् आरुह्य गच्छ। सजलजलदच्छायया सौरं तेजः वारणीयम्। सरसिजसखः अयं चण्डरश्मिः त्वद्धृताम्भोरुहस्य खेदाशङ्की [सन्] त्वदुपरि वृष्टिं न एव करिष्यति ॥२७॥

टीका। ननु तवेदम् अनुमानेन अचरणस्यापि मम चरणसाधनं "वाचा

पृथक्कार्द्रीकरणम्'' इव वस्तुशून्यतया वाङ्मात्रम् इत्यसम्भाव्यम् एव मे तत्र गमनम् इत्याशङ्कायां सचरणाचरणसाधारणं गमनमुपदिशति—आरुह्ये ति। यद्वा, ''प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्'' इति रीत्या पूर्वश्लोकोक्तां ''प्रथमं श्रमोत्पत्तिस्ततस्तदपनोदनमि''त्येवंरूपां गुरुप्रक्रियां परिहृत्य लाघवात् श्रमोत्पत्तिम् एव वारयितुम् आह—आरुह्ये ति।

अथवा पक्षान्तरे, यद्यनुमितम् अपि चरणम् अपह्नुषे यदि वा श्रमम् एव न आशिश्रयिषसि तदेत्यर्थः। तुङ्गम् उन्नतं तुरङ्गम् अश्वम् आरुह्य गच्छ मथुरां याहि। किं तदित्याह—अस्मद्धृदयम् इति, मम मनोरूपमित्यर्थः। गौरवे बहुवचनम्। मम मनः सर्वदा कृष्णगामि वर्तते, सौन्दर्येण प्रियपदजनितत्वेन मद्दौत्योन्मुखत्वादिना च त्वं मे प्रियतमम् इति तन्मनस्तुभ्यं दीयते त्वं तदाश्रित्यानायासेन याहीति परमार्थः। अत्र षष्ठश्लोके ''चेतः प्रस्थापितमणुतया दौत्यकर्मोपयुक्तं तत्रैवास्ते'' इत्यादि यत् पूर्वम् उक्तं सोन्मादया राधया तदिदानीमपस्मृतम् इति द्रष्टव्यम्। त्वरागामितया मथुराप्राप्तेरविलम्बितत्वद्योतनाय तुरङ्गमिति सार्थकपदोपन्यासः। तुङ्गमिति विशेषणम् अश्वपक्षे सादिनं प्रति साधारण्यबुद्धिविघटकतया दूतप्रोत्साहनाय उपयुक्तम्, मनःपक्षे इदानीमपि कृष्णोन्मुखतया अलभ्यलिप्सुत्वद्योतनाय सोत्प्रासं तदिति मन्तव्यम्।

नन्वेवं कामं विनीतो मार्गायासः, वर्षातपयोः कः प्रतिविधिरित्याह—सौरमित्यादि, वृष्टिमित्यादि च। सजलजलदच्छायया जलभरितमेघप्रतिविम्बेन कर्त्रा सौरं तेजः सूर्यकिरण आतप इति यावत्, वारणीयं प्रतिरोद्धव्यम्। परोपकारार्थं प्रस्थितस्य ते परोपकारिणो जलदा आतपत्रायिष्यन्त इति भावः। ''छाया सूर्यप्रिया कान्तिः प्रतिविम्बमनातप'' इति कोषः। अत्रानातपार्थः कान्त्यर्थश्च दुर्घटौ एवेति द्रष्टव्यम्। कश्चित्तु वारणीयमित्यस्य त्वयेति शेषः।

तथा च सजलजलदच्छाययया करणेन त्वया आपतितं सौरं तेजो वारणीयम् इति पदाङ्कं प्रत्यनुनयो व्यज्यते इत्याह । एतत्पक्षे जलदागमकारणं नोच्यते इति निर्हेतुतादोषः प्रसज्यते । यद्वा, चण्डरश्मिना वारणीयमिति उत्तरवाक्ये प्रथमान्ततयोपस्थितस्य कर्तुर्विभक्तिविपरिणामेनान्वयः, जलदीयसजलत्वविधानस्य तदधीनत्वात् ।

नन्वेवम् "एकं विधित्सतोऽपरं प्रच्यवते" इति न्यायाय दत्तः करावलम्बः । तथाहि आतपनियमनार्थम् उपासितसजलजलदं मां वर्षणेन जलदा एव पीडयितार इति चेद् भ्रान्तोऽसि, वर्षणस्य जलदकर्तृकत्वाभावादित्याह—वृष्टिमिति । सरसिजसखः कमलबन्धुः अयम् उपरि वर्तमानः चण्डरश्मिः सूर्यः त्वद्धृताम्भोरुहस्य त्वया चिह्नविधया गृहीतस्य पद्मस्य खेदाशङ्की दुःखोत्पत्तिभीरुः सन् त्वदुपरि वृष्टिं वर्षणं नैव करिष्यति । तथा च वर्षणं न मेघकर्तृकम् अपि तु सूर्यकर्तृकम् , सूर्यश्च पद्मस्य मित्रम् , पद्मञ्च अतिवर्षणान्म्लायतीति मित्रस्य दुःखं मा प्रसाङ्क्षीदिति सूर्यः कथम् अपि वृष्टिं न करिष्यति, मित्रद्रोहस्यातिनिन्दितत्वादिति भावः । अत एव सरसिजसख इति हेतुगर्भविशेषणम् । अत्र "आदित्याज्जायते वृष्टिरि"त्यादि शास्त्रं मूलमवगन्तव्यम् ।

अत्र 'स्वयम् उन्मत्तः सर्वम् उन्मत्तं पश्यती'ति लौकिकाभाणकदिशा उन्मत्तया राधया पदाङ्कस्थे पद्माङ्के प्रकृतपद्मभ्रमम् आबिभ्राणया सूर्यस्यापि तादृशभ्रमं सम्भाव्यैवमुक्तम् इति । यद्वा, अनया खेदाशङ्कया पद्मचिह्नस्य प्रकृतपद्मवद् मनोरमत्वं व्यञ्जितमिति द्रष्टव्यम् ।

अत्रेदम् आलोचनीयम्—वर्षणे सूर्यस्येव मेघस्यापि कारणता स्वीकार्यैव, साक्षात् कारणता मेघस्य, परम्परया सूर्यस्य । तथा च मेघे जलाधाने तपनः कारणं वर्षणे तु सजल-मेघ इति विवेकः । एवञ्च मेघो यदि जल-

भरितः स्यात्तदा अवश्यं वर्षणं कुर्यादेव ; अत एवात्र सजलविशेषणम् अनुपादेयम् इति प्रतिभाति। न च जलं विना जलदाप्रसिद्धिरिति वाच्यं स्वल्पजलशालित्वेनापि तत्प्रसिद्धेरुपपादनसम्भवात् , वर्षणन्तु प्रचुरजलशालित्व-नियतम् इति ॥२৭॥

অনুবাদ। অথবা, উন্নত ঘোটকরূপী আমার মনে আরোহণ করিয়া গমন কর [ইহাতে পথক্লেশ হইবে না]। সজল মেঘ প্রতিবিম্ব দ্বারা সূর্যের তেজ বারণ করিবে। পদ্মবন্ধু সূর্য তোমাতে [চিহ্নরূপে] বর্তমান কমলের ক্লেশভয়ে তোমার উপর বৃষ্টি করিবেন না ॥২৭॥

एतेन स्यान्मधुपुरगतिः केन मे पङ्किलोऽभूत्
पन्था नन्दव्रजकुलभुवां लोचनाम्भोभिरुच्चैः।
नो वा शुष्को हरिविरहजोत्तापतोऽपीन्दुवक्त्रे
नित्योत्पत्तेर्नयनपयसां वाक्यमेतन्निरस्तम् ॥२८॥

[अन्वयः। एतेन, 'पन्थाः नन्दव्रजकुलभुवां लोचनाम्भोभिः उच्चैः पङ्किलः अभूत् ; [हे] इन्दुवक्त्रे, नयनपयसां नित्योत्पत्तेः हरिविरहजोत्तापतः अपि नो वा शुष्कः, [अतः] केन मे मधुपुरगतिः स्यात्', एतत् वाक्यं निरस्तम् ॥२८॥]

टीका। तुरङ्गमारोहणस्य फलान्तरम् आह—एतेनेति। एतेन मदुद्भावितया तुरगारोहणपुरःसरगमनव्यवस्थया हेतुभूतया इत्यर्थः। अस्य "एतद् वाक्यं निरस्तम्" इति चतुर्थचरणस्थेन अन्वयः। एतत् 'स्यादि'त्यादि-'नयन-पयसाम्" इत्यन्तं त्वया वक्तव्यविधया आदितसमानमित्याशयः, वाक्यं निरस्तं निराकृतं मयेति शेषः। यद्वा, एतेनेति कर्तरि तृतीया। वाक्यम् आह—स्यादित्यादि। पन्थाः मधुरागमनमार्गः नन्दव्रजकुलभुवां नन्दव्रज-

कुलजातानां लोचनाम्भोभिः अश्रुजलैः श्रीकृष्णविरहहेतुक-रोदनजन्यैरित्यर्थः, उच्चैः अधिकं यथा स्यात्तथा पङ्किलः कर्दमाक्तः अभूत्। हे इन्दुवक्त्रे चन्द्र-सुन्दरमुखि, नयनपयसां पूर्वोक्तानां नेत्रजलानां नित्योत्पत्तेः अनवरतोत्पाद-नात् हरिविरहजोत्तापतः श्रीकृष्णवियोगानलसन्तापात् अपि नो वा शुष्कः, वा एवार्थे, नैव कठिनीभूत इत्यर्थः। अतः केन कथं मे पदाङ्कस्य मधुपुर-गतिः स्यात् एतद् वाक्यं निरस्तम्; अश्वेन यातुः कर्दमस्य स्वाङ्गसङ्गप्रसङ्गा-भावेन क्लेशविरहात्, "उपानद्गूढपादस्य ननु चर्मावृतेव भू"रितिवदिति भावः। अत्र वाक्यमित्यस्यानन्तरम् अपिर्द्रष्टव्यः। हरिविरहजोत्तापत इत्यस्य नन्दव्रजकुलभुवाम् इत्यनेनान्वयः। यद्वा, व्रजभुव इति शेषः, कृष्ण-विरहेण जङ्गमानामिव स्थावराणामपि क्लेशोत्पत्तेः पौराणिकत्वात्। अत्र पय-उत्तापयोर्युगपदुद्भवे उत्तापकार्यासद्भावं प्रत्यक्षसिद्धमाश्रित्येदमुक्तम्। यद्वा, उत्तापापेक्षया पयस आधिक्याभिप्रायकमिदम्। अत एव उच्चैरिति विशेषणोप-न्यासो नित्योत्पत्तेरिति हेतूपन्यासश्च सार्थकौ। किञ्च, इन्दुवक्त्रे इति यत् सम्बोधनं तस्यापि नेत्रपयसामाधिक्ये तात्पर्यम्। तथाहि एकतस्तावन्नेत्रपयसां नित्योत्पत्तिः अन्यतश्च निसर्गशीतानां षोडशशतगोपरमणीगतानाम् आस्य-शशिनाम् अनिशं सन्निधानम् इति उत्कटोऽप्युत्तापः स्वकार्यमन्थरो जात इति भावः। एवञ्च इन्दुवक्त्रे इति यत् सम्बोधनैकवचनं तत् प्रत्येकाभिप्रायेणेति वेदितव्यम्। 'हरिविरहजोत्तापित' इति पाठे हरिविरहजोत्तापोऽस्य जात इत्यर्थे "इतच्" प्रत्ययेन पन्था इत्यस्य विशेषणम् ॥२८॥

অনুবাদ। ইহা দ্বারা (অর্থাৎ ঘোড়ায় চড়িয়া যাওয়ার কথা বলায়), "নন্দব্রজকুলোৎপন্নগণের লোচনজলে পথ অত্যন্ত কর্দমাক্ত হইয়াছে, হে চন্দ্রমুখি, অশ্রুজল অনবরতই উৎপন্ন হইতেছে বলিয়া শ্রীকৃষ্ণবিরহসম্ভূত

উত্তাপেও কিছুতেই শুষ্ক হইতেছে না, [অতএব] আমি কিপ্রকারে মধুপুরে যাইব" এই কথাও (অর্থাৎ সম্ভাবিত তোমার এই আপত্তিও) খণ্ডিত হইল ॥২৮॥

अद्भिस्ताभिस्तरणितनया पीनतां नैव लब्धा
गोपीभर्तुर्विरहदहनैः प्रत्युत क्षीणताञ्च ।
नो चेदेवं सलिलतरसा गोकुले माऽस्तु किन्तु
प्रस्थानं ते किल मधुपुरे निर्विरोधं क्रमाङ्क ॥२९॥

[अन्वयः । ताभिः अद्भिः तरणितनया पीनतां न लब्धा एव, गोपीभर्तुः विरहदहनैः प्रत्युत क्षीणतां च [लब्धा] । चेत् एवं नो, [तदा] हे क्रमाङ्क, सलिलतरसा गोकुले [ते प्रस्थानं] मा अस्तु, किन्तु मधुपुरे ते प्रस्थानं निर्विरोधं किल ॥२९॥]

टीका । नन्वेवमश्वसहायेन पदाङ्केन पङ्कस्तार्यताम्, यमुना तु युष्मन्नयनधाराभिर्वर्धमाना वर्तते, यदुक्तं कविना "किन्त्वेका यमुना कुरङ्गनयनानेत्राम्बुभिर्वर्धते" इति अतस्तत्राश्वोऽपि अनाश्वास इत्याशयवन्तं पदाङ्कं यथोक्तकविवचनस्यायुक्तताप्रतिपादनेन प्रतिबोधयितुं भूमिकामारचयति—अद्भिरिति । ताभिः पूर्वश्लोकोक्ताभिः अद्भिः नन्दव्रजकुलभुवां लोचनाम्भोभिः तरणितनया यमुना पीनतां स्थूलतां वृद्धिमित्यर्थः, न लब्धा एव न प्राप्तैव । अत्र लभेः प्राप्त्यर्थकत्वेन, "गत्यर्थानां ग्रहणे प्राप्त्यर्थानामपि ग्रहणम्" इति न्यायात् 'गत्यर्थाकर्मके'-त्यादिना कर्तरि क्तः । गोपीभर्तुः श्रीकृष्णस्य विरहदहनैः वियोगानलैः प्रत्युत पीनतावैपरीत्येनेत्यर्थः, क्षीणतां च कृशताम् एव, लब्धेति अध्याहारेणान्वयः । चकार एवार्थे । दहनैरिति बहुवचनेन सातत्यसूचनादनवरतज्वलदनलतया

स्थौल्यापेक्षया क्षैण्याधिक्यं प्रतिपादितम्। तथा जलेनाप्यनुपशमप्रत्यायनाद् विरहानलस्य वाडवतुल्यता बोधितेति च बोध्यम्।

अत्र यमुनायाः कृष्णविरहकथनं दूतस्य नैराश्यनिरासार्थं प्रकृतार्थगोपन-प्रयुक्तम्, आत्मनो विरहवैक्लव्येन यमुनाया अपि वृन्दावनीयकृष्णविरहवैक्लव्याभि-मानप्रयुक्तं वा इति ज्ञेयम्। अन्यथा वृन्दावनादिस्थानत्रयस्यैव यमुना-पारीयत्वेन यत्र क्वापि कृष्णसत्त्वात् यमुनायाः कृष्णेन विरहो नास्तीति तदुक्ति-र्निर्मूलैव भवेत्। केचिदाहुः, ननु वृन्दारण्ये मथुरायाञ्च यमुनाया वर्तमानत्वात् कथं तद्विरह इति चेन्न, वृन्दारण्यावस्थानावस्थायां यमुनातीरमालम्ब्यैव बाल्य-क्रीडाद्याचरणेन निरन्तरं श्रीकृष्णेन सम्बन्धः, इदानीन्तु कदाचित् स्नानावगाहना-दिनैव इत्येतदभिप्रायेणैतदभिधानात् इति। एतदस्वरससूचनमपि नो चेदिति पक्षान्तरोत्पत्तौ निदानमनुसन्धेयम्।

'तुष्यतु दुर्जन' इति रीत्या यमुनायाः पीनताम् अभ्युपेत्यापि दौत्यावकाशं प्रसञ्जयति—नो चेदिति। चेत् एवं नो यमुना यदि लब्धक्षीणता न स्यात्, तदापीति शेषः, सलिलतरसा जलवेगेन हेतुना गोकुले मा अस्तु प्रस्थानम् इति वाक्यशेषः, ते तव पदाङ्कस्य मधुपुरे प्रस्थानं गमनं निर्विरोधम्, किलेति निश्चये, निश्चयेन प्रतिबन्धशून्यम् इत्यर्थः, मधुपुर-वृन्दावनयोरेकतीरवर्तित्वेन उत्तरणाना-वश्यकतया यमुनाजलवृद्धेः गमनप्रतिबन्धाप्रयोजकत्वादिति भावः। एतेन मधुपुर एव श्रीकृष्णो नियतं वर्तते, त्वया तत्र गतेनैव मम मनोरथसिद्धिर्भवि-ष्यतीति गोप्याशयो व्यज्यते। अत एव "गोकुले वे' त्येकादशश्लोके पक्षान्तर-प्राप्ततया गोकुलस्थित्युक्तेर्दुर्बलता प्रतिपादितेति ज्ञेयम्।

केचिद् वृन्दावनेन सह गोकुलस्यैकपारत्वम् अत एव मधुपुरस्य भिन्नपारत्व-मातिष्ठमानाः सलिलतरसा मधुपुरे माऽस्तु गोकुले ते प्रस्थानं निर्विरोधम् इति

पाठव्युत्क्रमेण व्याचक्षते। अत्र पक्षे गोकुले कृष्णावस्थानस्य प्रायेण असम्भाव्यतायां गोप्या अवगतायाम् अपि यथाकथञ्चिद् दूतस्यालस्यभङ्ग-वाञ्छया एवमभिहितम् इति आशयो द्रष्टव्यः ॥२९॥

অনুবাদ। সেই জলে (ব্রজগোপীগণের নয়নজলে) যমুনা বৃদ্ধি[ত] পায়ই নাই, বরং কৃষ্ণের বিরহানলে কৃশতাই প্রাপ্ত হইয়াছে। [আর] যদি তাহা না হয় (অর্থাৎ যমুনা যদি ক্ষীণা নাই হইয়া থাকে) [তাহা হইলেও] জলের বেগে গোকুলে না হউক, মধুপুরে তোমার গমন প্রতিবন্ধকশূন্যই [কারণ, একপারে বলিয়া বৃন্দাবন হইতে মথুরা যাইতে যমুনা পার হওয়ার কোন আবশ্যকতা নাই] ॥২৯॥

क्षीणैवास्ते तरणितनया वस्तुतस्तद्वियोगे
का वा पीना भवति वचनं कस्यचिन्नेति युक्तम्।
गोपस्त्रीणां नयनसलिलैर्वर्धते सा विशीर्णा
अन्ये नन्दव्रजपुरजना नूनमित्यर्थकं यत् ॥३०॥

[अन्वयः। वस्तुतः [तु] तरणितनया क्षीणा [सती] एव आस्ते, तद्वियोगे का वा पीना भवति। इति—"सा गोपस्त्रीणां नयनसलिलैः वर्धते, अन्ये नन्दव्रजपुरजनाः नूनं विशीर्णाः" इत्यर्थकं यत् कस्यचित् वचनं [तत्] न युक्तम् ॥३०॥]

टीका। इदानीं पूर्वोक्तकविवचनस्य अयुक्तताख्यापनेन गोकुलेऽपि गमनं प्रतिबन्धकताशून्यम् इत्याह—क्षीणैवेति। वस्तुतः अत्र वाक्यभेदबोधकस्तुकारो द्रष्टव्यः, वस्तुगत्या तु यथार्थत इति यावत्। तरणितनया क्षीणा एव क्षीणा सत्येव आस्ते। तद्वियोगे कृष्णविरहे सतीत्यर्थः, का वेति कतमेत्यर्थः, पीना भवति, न कापीत्यर्थः। अत्रायं कवेरभिप्रायः। ईशतया श्रीकृष्णः सर्वेषां

स्थावरजङ्गमानामात्मरूप आनन्दरूपश्च। गोपीभिरपि तद्रूपतयैव स विज्ञात इति रासोपक्रमे—

यत् पत्यपत्यसुहृदामनुवृत्तिरङ्ग
स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम्।
अस्त्वेवमेतदुपदेशपदे त्वयीशे
प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥ (१०-२९-३२)

इत्याद्युक्त्या सुव्यक्तम्। अत्र "तनुभृता"मिति स्थावरसाधारणम्। एवञ्च यथा आत्माभावेन जीवः शवतां प्रतिपद्य पीनतायां नैवाधिक्रियते तथा आनन्दाभावेनापीति युक्तमुक्तं का वा पीना भवतीति। इति आनन्दप्रद-नन्दनन्दन-विच्छेदेन पीनत्वासम्भवाद्धेतोः, "कस्यचिद् वचनं न युक्तम्" इत्युत्तरेण अन्वयः। वचनं विवृणोति गोपस्त्रीणामिति। सा यमुना गोपस्त्रीणां नयनसलिलैः वर्धते, अन्ये नन्दव्रजपुरजना नन्दव्रजवासिनः नूनं निश्चितं विशीर्णाः क्षीणाः, कृष्णविरहेणेत्यर्थः, इत्यर्थकं यथोक्तार्थावेदकं यत् कस्यचिद् वचनं तदिति शेषः, न युक्तम् उक्तयुक्तेरप्रमाणमित्यर्थः। कस्यचिदिति रूपगोस्वामिपादानाम्। वचनं चेत्थम्—

शीर्णा गोकुलमण्डली पशुकुलं शष्पाय न स्पन्दते
मूकाः कोकिलपंक्तयः शिखिकुलं न व्याकुलं नृत्यति।
सर्वे त्वद्विरहानलेन गुरुणा गोविन्द दैन्यं गता
किन्त्वेका यमुना कुरङ्गनयनानेत्राम्बुभिर्वर्धते ॥ इति ॥३०॥

অনুবাদ। বাস্তবিক কিন্তু যমুনা ক্ষীণা হইয়াই রহিয়াছে; কৃষ্ণবিরহে কে-ই বা স্থূলা হইয়া থাকে? অতএব, "গোপরমণীগণের নয়নজলে যমুনা বৃদ্ধি পাইতেছে, অন্যান্য নন্দব্রজবাসিবৃন্দ ক্ষীণ হইয়াছে"—ঈদৃশ অর্থযুক্ত কোন ব্যক্তির যে বাক্য [তাহা] খাটিতেছে না ॥৩০॥

सामग्री चेन्न फलविरहो व्याप्तिरेवेति तत्त्वं
तत्त्वं गोपीनयनसलिले केवलेऽप्यस्ति मैवम् ।
उत्कण्ठायां हृदि न कुरुते कारणानां सहस्रं
लक्षं वापि क्षणमपि यतः पीवरत्वं जलानाम् ॥३१॥

[अन्वयः । चेत् सामग्री [तदा] फलविरहः न [भवति] इति व्याप्तिः तत्त्वम् एव । केवले गोपीनयनसलिले अपि तत्त्वम् अस्ति, एवं मा । हृदि उत्कण्ठायां [सत्यां] कारणानां सहस्रम् अपि वा लक्षं क्षणम् अपि जलानां पीवरत्वं न कुरुते ॥३१॥]

टीका । ननु सति नेत्रसलिले हेतौ न कथं यमुनासलिलस्य पीनतोत्पादः कारणसत्त्वस्य कार्यसत्तानियामकत्वात्, ततश्च यमुना नेत्राम्बुभिर्वर्धते इति यत् केनचिदुक्तं तद्युक्तमेव इत्याशङ्कायां प्रतिबन्धकताविरहविशिष्टस्य कारणस्य फल-जनकताप्रतिपादनमुखेन पीनत्वप्रतिबन्धं वक्तुम् आह—सामग्रीति । चेत् यदि सामग्री यावत्कारणसम्भारः भवति तदा फलविरहः फलाभावः न भवति. फलोत्पत्तिरेव भवतीत्यर्थः । इति व्याप्तिः अयं नियमः, इत्येव तत्त्वं याथार्थ्यम् इयं व्याप्तिर्यथार्थैवेत्यर्थः । यद्वा, "नफलविरह" इत्येकं पदम्, नञर्थेन न-शब्दे सुप्सुपेति समासात् ; तथा च नफलविरहः फलाभावाभावः फलोत्पत्तिरिति यावत् , व्याप्तिः इत्येव तत्त्वम् इत्यन्वयः । एवञ्च न इतिशब्दाध्याहारापेक्षा, उद्देश्यविधेयभावेन वाक्यनिष्पत्तेः । यद्वा, प्रथमस्य तत्त्वम् इत्यस्य 'तत् त्वम्' इति छेदः, तत् यतः सामग्रीसत्त्वे कार्यस्य उत्पत्तिर्नियता अतः कारणादित्यर्थः । "व्याप्तिरेषेति तत्त्वम्," "व्याप्तिरेषैव तत्त्वम्" इति चात्र पाठान्तरे । अथैवं न कथं पीनतोत्पादः कारणस्य गोपीनेत्रपयसः सत्त्वादित्याह—तत्त्व-मित्यादि । केवले प्रतिबन्धकाभावविशिष्टे गोपीनयनसलिले अपि तत्त्वं सामग्री-

त्वम् अस्ति एव मा, एवं वक्तुं न युक्तमित्यर्थः। "नैवम्" इति च पाठः। अत्र केवलशब्दः प्रतिबन्धकाभावेतरसलिलादिरूपकारणकूटोपलक्षकः अन्यथा सामान्यकारणीभूतयोर्दिक्कालयोरपि सत्त्वात् सलिलमात्रे सामग्रीत्वनिराकरण-स्यायोग्यतापातः स्यादित्यवधेयम् इति केचित्।

नयनसलिले सामग्रीत्वाभावे हेतुमाह—उत्कण्ठायाम् इति। यतः कारणात् हृदि उत्कण्ठायाम् उद्वेगे वेदनायां वा स्थितायाम् इति शेषः, स्थितया उत्कण्ठयेत्यर्थः। कारणानां सहस्रम् अपि वा लक्षं तावत्तावत्संख्यकं जलान्तरसम्पर्कादिरूपं कारणम् इत्यर्थः, क्षणम् अपि अत्यल्पकालम् अपि क्षणकार्यवदीषदपीति वा, जलानां यमुनाजलानां पीवरत्वं वृद्धिमित्यर्थः, न कुरुते। अत्र वाशब्दः प्रतिबन्धकाभावेतर-कारणसमुदायग्राहकः। पीनताप्रतिबन्धकी-भूतोत्कण्ठाभावविरहात् सामग्र्यसमवधानेन पीनतोत्पत्त्यभाव इति भावः। तथाच, यथा जलान्तरसम्पर्को जलपीनत्वस्य कारणम् एवम् उत्कण्ठाभावोऽपि, अत्रोत्कण्ठाया वर्तमानत्वात् तदभावरूपहेत्वभावात् सत्यपि जलान्तरसम्पर्करूपे एकस्मिन् हेतौ कारणकूटसमवधानरूप-सामग्र्यसत्त्वेन पीनत्वानुत्पत्तिः। एवं च गुरुतर-विरहानलदन्दह्यमानाया अपि यमुनाया गोपीनयनसलिलैर्वर्धमानत्वकथनं कवेरसाम्प्रतम् एवेति पर्यवसितोऽर्थः। एतच्चाग्रे स्फुटीभविष्यति। अत्र तनुपीनत्व-जलपीनत्वयोरेकसामग्रीकत्वाभिमानेन यमुनाया विरहोत्कण्ठितात्वा-भिमानेन चायं सिद्धान्त इति ज्ञेयम्।

अत्र उत्कण्ठायां सत्यामिति असन्देहे सन्देहवचनं "यदि वेदाः प्रमाण"-मितिवत्। तथा च यमुनायाः हृदि विरहोत्कण्ठाया वर्तमानत्वाद् बलवन्त्यपि कारणान्तराणि पीनतां नोत्पादयन्तीति भावः। उत्कण्ठायाः पीनत्वपरि-पन्थिता च यथोक्तोत्कण्ठाजनित-स्वशीर्णतया ग्राहिता, तथा च उत्कण्ठा

पीनताप्रतिबन्धिकेत्यत्र अहम् एव दृष्टान्तभूता इति भावः। जलानामित्यत्र "जनाना"मिति पाठे तु उत्कण्ठायामित्यस्य यथाश्रुत एवार्थः, एवञ्चात्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥३१॥

অনুবাদ। যদি সামগ্রী (একটী কার্যসম্পন্ন করিতে যতগুলি কারণের প্রয়োজন, ঠিক ততগুলি কারণ) থাকে [তাহা হইলে], ফলের (কার্যোৎপত্তির) অভাব না ঘটাই নিয়ম, ইহা বস্তুগতি। গোপীদিগের কেবল (অন্য কারণ-নিরপেক্ষ) নেত্রজলে সেই সামগ্রী আছে ইহা [মনে করা ঠিক] নহে। কারণ, [যমুনার] হৃদয়ে [বিরহজন্য] উৎকণ্ঠা থাকায় সহস্র অথবা লক্ষ [নেত্রজলাদিরূপ] কারণও ক্ষণকালও [তাহার] জলের বৃদ্ধি জন্মাইতে পারিতেছে না ॥৩১॥

तस्मात्तस्या विरतिरथवा हेतुरन्यादृशोऽस्या
न स्यादेव क्वचिदपि फलं कारणासन्निधाने।
नष्टे हेतौ प्रभवति कुतः कार्यमित्यप्ययुक्तं
यागेऽपूर्वादिव जनकता द्वारतस्तस्य सिद्धा ॥३२॥

[अन्वयः। तस्मात् तस्याः विरतिः अथवा अन्यादृशः अस्याः हेतुः [वक्तव्यः], कारणासन्निधाने [सति] क्वचित् अपि फलं न स्यात् एव। [ननु] हेतौ नष्टे कुतः कार्यं प्रभवति ? इत्यपि अयुक्तम्, यागे अपूर्वात् इव द्वारतः तस्य जनकता सिद्धा ॥३२॥]

टीका। कविवचनस्य अयुक्तताप्रतिपादकप्रबन्धम् उपसंहरति—तस्मादिति। तस्मात् उत्कण्ठायां सत्यां सहस्रादिभिः कारणान्तरैः पीनताया असम्भवस्य प्रतिपादनादित्यर्थः। तस्या उत्कण्ठाया विरतिर्विरहः, अस्या हेतुरित्यध्याहारेण सम्बन्धः। अथवा अन्यादृशः गोपीनयनसलिलाद् भिन्नः, यद्वा उत्कण्ठा-विरोधी कश्चिदित्यर्थः, अस्याः पीनताया हेतुः वक्तव्य इति शेषः। न तु यथोक्त-कविवचनोक्तदिशेत्याशयः। तत्र प्रथमस्य हेतुत्वे कविना

"सर्वे त्वद्विरहानलेन गुरुणा गोविन्द दैन्यं गता"

इत्यनेन यद् यमुनाया अपि विरहदैन्याभिप्रायकं 'सर्वे' पदम् उपात्तं तद्वा अयुक्तम्, द्वितीयस्य हेतुत्वे पुनः

"किन्त्वेका यमुना कुरङ्गनयनानेत्राम्बुभिर्वर्धते"

इति यत् नयनजलजनितपीनत्वमुक्तं तद्वा असाम्प्रतम्। एवञ्च सोत्कण्ठाया अपि यमुनाया नयनजलवर्धमानत्वाभिप्रायकं सर्वमपि वाक्यमयुक्तमिति यत् पूर्वम् उक्तं तदेव युक्तम् इत्याशयः।

ननु किमनेनान्यादृशहेतुकल्पनेन ? यमुनाया उत्कण्ठाविरतिः श्रीकृष्णस्य वृन्दावननिवासदशायामासीदेवेति अस्तु चिरातीतया तयैव पीनतारूप-फलोत्पत्तिरित्याशङ्कायाम् आह—न स्यादेवेति। कारणासन्निधाने कार्या-व्यवहितप्राक्क्षणे सामग्रया असत्त्वे क्वचिदपि फलं कार्यं न स्यादेव। केचिदेवं व्याचक्षते—ननु तस्य हेतुत्वेऽपि तं विनापि पीनता स्यात् इत्याह—कारणासन्निधाने कारणासत्त्वे फलं क्वचिदपि न स्यादेव। अत्र बाधमाशङ्क्य निराकरोति—नष्टे हेतौ इतीति।

नन्वेवं कथं स्मरणम् उपपद्यतां तत्कारणस्य अनुभवादेरपि अव्यवहित-प्राक्क्षणवर्तित्वाभावादित्याशङ्क्य निराचष्टे—नष्ट इति। हेतौ नष्टे कुतः कस्मात् कार्यं प्रभवति उत्पद्यते इत्यपि एतादृशः प्रश्नोऽपि अयुक्तं युक्ति-हीनम्। तथा च अनुभवनाशात् स्मरणानुत्पत्त्याशङ्का अन्याय्येति भावः। अत्र दृष्टान्तम् आह—यागे इति। यागे अश्वमेधादौ नष्टे इति पूर्वेणान्वयः, अपूर्वात् यागजन्यादृष्टापराख्य-पुण्यादिरूपात् द्वारतः व्यापारात् जनकता यागस्य स्वर्गादिहेतुता इव, तस्य अनुभवस्य नष्टस्यापीत्याशयः, जनकता स्मरणहेतुता सिद्धा निष्पन्ना। तथा च यथा चिरविनष्टस्य अश्वमेधादे-

रपूर्वद्वारा स्वर्गं हेतुता भवति तथा अनुभवस्यापि संस्कारद्वारा स्मरणजनकतेति न कश्चिद् विरोधः। एवञ्च साक्षात्सम्बन्धेन वा व्यापारसम्बन्धेन वा कारणसत्त्वस्य कार्योत्पत्तिनियामकत्वमिति "न स्यादेव क्वचिदपी"त्यादि यदुक्तं तदेव युक्तमिति भावः।

द्वारतः इति द्वारादित्यर्थः, एतच्चापूर्वादित्यस्य विशेषणम् अपि उपमेयपक्षे विशेष्यविधया विवक्षितम्, तथा च द्वारत इति संस्काररूपादित्यर्थः। यागजन्ये अपूर्वे प्रबलायाः श्रुतेः पक्षपातात् तस्य उपमानत्वम्, न्यायानुगृहीतस्य अनुभवहेतुकसंस्कारस्य तु न्यूनबलत्वादुपमेयत्वं द्रष्टव्यम्, अत एव च न पक्षसमत्वम् अपीति।

अत्रेयं बालबोधिनी। इन्द्रियानुभूतविषयस्यैव स्मरणं भवतीति अनुभवः स्मरणहेतुः। शैशवादिषु अनुभूतं (प्रत्यक्षीकृतं) यौवनादौ स्मरतीत्यतिरोहितम्। तच्च कारणस्य कार्याव्यवहितपूर्ववर्तितास्वीकारे कथं सम्भवति? यतः प्रत्यक्षीकरणानन्तरम् एव प्रत्यक्षस्य नाशो भवति, एवञ्च यौवनादौ प्रत्यक्षस्याभावात् प्रत्यक्षजन्यं स्मरणं नैव भवितुमर्हति। अत्र नैयायिकैरेवं समाहितम्। हेतुकार्ययोर्मध्ये व्यापाररूपं किञ्चन वस्तु वर्तते, आफलोदयगामि तदेव हेतोर्नाशेऽपि स्वसत्तया कार्यहेत्वोर्योगं विधत्ते इति। ईदृशसिद्धान्तस्वीकारे वीजञ्च इदम्—स्वर्गार्थं यागः क्रियते, यागश्च दक्षिणान्तः, सत्यां दक्षिणायां यागो नश्यति। स्वर्गश्च तदात्व एव भविष्यतीति न नियमः, दीर्घकालात् परतोऽपि भवितुमर्हति, तदानीं यागस्याभावात् कस्तं साधयेत्? अथ च यागजन्यः स्वर्गः श्रुतिबोधित इति न तस्यान्यथाकरणं ब्रह्मादिभिरपि सुशकमिति अत्रापि व्यापारः स्वीकर्तव्यः, स चात्र अपूर्वनामा, यत् पुण्यम् इति व्यपदिश्यते। तथा च नश्यता यागेन पुण्यं

जन्यते पुण्येन च स्वर्ग इति। यथा सुपुत्रः कश्चिज्जीवतस्तातस्य सङ्कल्पितं व्रतादिकार्यम् उपरतेऽपि तस्मिन् साधयति तद्वत् सुपुत्रपदाधिकारो व्यापारः पितृभूतस्य हेतोरुपरमेऽपि तेन निष्पाद्यं कार्यं जनयतीति रूपकेणाप्ययमर्थः सुलभः। एतदेव भक्तेनापि भङ्ग्यन्तरेणोक्तम्—

"कर्ता सुप्ते जाग्रत् त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते" इति ॥३२॥

অনুবাদ। অতএব [হয়] উৎকণ্ঠার অভাব, অথবা [নয়নজল ভিন্ন] অন্য কিছু [যমুনাজল] বৃদ্ধির হেতু বলিতে হইবে। [যদি বল শ্রীকৃষ্ণ যখন বৃন্দাবনে ছিলেন তখন ত যমুনার উৎকণ্ঠার অভাব ছিল, সেই জন্যও ত বৃদ্ধি হইতে পারে? ইহাও ঠিক নহে, যেহেতু] কারণ [কার্যের] অব্যবহিত পূর্বক্ষণে না থাকিলে কার্য হইতে পারে না। [তবে, স্মরণাদির স্থলে অনুভবাদিরূপ] হেতু বিনষ্ট হইলে কি প্রকারে কার্য উৎপন্ন হয়? ইহাও [বলা] অন্যায্য, [অশ্বমেধাদি] যজ্ঞ বিনষ্ট হইলেও যেমন অপূর্বকে (পুণ্যকে) মধ্যস্থ করিয়া তাহার [স্বর্গের প্রতি] হেতুতা (অর্থাৎ স্বর্গজনকতা) সিদ্ধ আছে, সেইরূপ [অন্যান্য স্থলেও কারণ নষ্ট হইলেও] মধ্যস্থদ্বারা হেতুতা সিদ্ধ হইবে। [অন্যান্য স্থলের মধ্যে স্মরণ একটি স্থল, টীকায় ইহাকেই দৃষ্টান্ত করা হইয়াছে। ভাবার্থ এইরূপ, অনুভূতি স্মরণের কারণ, শৈশবে প্রত্যক্ষীকৃত (প্রত্যক্ষও অনুভূতি) বস্তু যৌবনে লোকের স্মৃতিপথে উদিত হয়; কার্যের অব্যবহিত পূর্বক্ষণে কারণ না থাকিলে যদি কার্য উৎপন্ন হইতে না পারে তবে, আমি যে এখন কাশীধামের স্মরণ করিতেছি তাহা কিরূপে সম্ভব হয়? কারণ শৈশবে আমি কাশী দেখিয়াছি এবং দেখা শেষ হওয়ার সঙ্গে সঙ্গে অনুভূতিরূপ প্রত্যক্ষও বিনষ্ট হইয়াছে, তথাপি এই বিশ বছর পরে আমার কাশীর স্মরণ হইতেছে। ইহার উত্তরে নৈয়ায়িক-গণ বলেন, যে অনুভবজন্য একটি সংস্কার হয় ও উহা আফলোদয়স্থায়ী।

এই সংস্কারদ্বারা অনুভূতি স্মরণের কারণ। অতএব দেখা যাইতেছে যে, হেতুটি কখন সাক্ষাৎ বা স্বয়ং কার্যের পূর্ববর্তী হয়; কখন বা পরম্পরায় পূর্ববর্তী হয়] ॥৩২॥

क्लेशोऽस्माकं मलयपवनैर्मूर्छया चोपकार-
स्तस्मात् सर्वं किल विधिकृतं कारणं कारणं न ।
अम्भोजानाममृतकिरणज्योतिषा म्लानिरुच्चै-
रुग्रज्योतिःकिरणमिलनाज्जायते च प्रकाशः ॥३३॥

[अन्वयः । अस्माकं मलयपवनैः क्लेशः, मूर्च्छया च उपकारः [भवति] । तस्मात् विधिकृतं सर्वं कारणं किल कारणं न [भवति] । अम्भोजानाम् अमृतकिरणज्योतिषा उच्चैः म्लानिः, उग्रज्योतिःकिरणमिलनात् च प्रकाशः जायते ॥३३॥]

टीका । ननु जलपीनत्वस्य जलान्तरहेतुकत्वं विधिना लिखितं न तूत्कण्ठाविरहहेतुकत्वम् अपीति—

विधात्रा लिखिता या तु ललाटेऽक्षरमालिका ।
न हरिः शङ्करो ब्रह्मा चान्यथा कर्तुमर्हति ॥

इति स्मृतेस्तस्यान्यथाकरणायोगात् कविना लिखितं यमुनाजलस्य नयनजलजन्यपीनत्वं कथम् अनुपपन्नम् इत्याह, क्लेश इति । अस्माकं मलयपवनैः मलयपर्वतसम्बन्धिभिर्वातैः क्लेशः, "इत्यादिबहुवचनान्ता गणस्य संसूचका" इति मलयपवनैरिति बहुवचनेन मलयजरसादेः परिग्रहः । मूर्छया च उपकारः, जायते इति चतुर्थचरणस्थेन उभयत्रापि सम्बन्धः । उभयत्रापि इदानीमिति पूरणीयम् । तथा च विधातृविधानात् स्वतः सुखकरोऽपि मलयानिलो विरहोद्दीपकत्वादिदानीम् अस्माकं क्लेशदायको जातः ; स्वभावात् प्राणघातादिभिरप-

कारिणी मूर्छा च विरहविस्मारकतया अस्माकम् इदानीमुपकारिणी जातेत्यर्थः। एतदभिप्रायेणैव द्वितीयश्लोके "मूर्छाप्राणप्रियतमसखी"त्युक्तम्।

प्रकृतेन योजयति—तस्मादिति। तस्मात् पूर्वसूचितवैपरीत्यदर्शनात् सर्वं विधिकृतं विधात्रा विहितं कारणं किल निश्चितं न कारणम्। अत्र विधिकृतं कारणम् इत्यस्य विधिकृतकारणताकम् इत्यर्थः; तेन गोपीक्लेशादि-जनकत्वेनाभिमतानां मलयपवनादीनां विधिकृतत्वेनापि न क्षतिः, विधात्रा तेषां सुखादिजनकत्वेनैवोक्तेः।

ननु विरहवतीयुष्मान् प्रत्ययं नियतेरनियमः साधारणो भवितुं नार्हती-त्याशङ्क्य साधारण्येनोदाहरणमाह—अम्भोजानामिति। कमलानाम् अमृत-किरणज्योतिषा चन्द्रस्य तेजसा किरणेनेत्यर्थः, उच्चैः म्लानिः नितरां मलिनत्वं जायते, उग्रज्योतिःकिरणमिलनात् तीक्ष्णतेजसः सूर्यस्य करसम्पर्कात् च प्रकाशः जायते; अत्रापि उच्चैरिति सम्बन्धनीयम् अत्यन्तं प्रफुल्लता समुत्पद्यते। अत्र सर्वाध्यक्षं विधिविधानवैपरीत्यमनपलपनीयमेवेति भावः।

अस्य श्लोकस्य केचिदेवं व्याख्यान्तरम् आरचयन्ति। तत्र उत्थितिबीजं त्वित्थम्—कारणकूटस्य फलोपधायकत्वम् उक्त्वा तदसमवधानदशायां तत्प्रत्येकेषां फलानुपधायकत्वं दर्शयति—क्लेश इत्यादिना इति। प्रथमचरणस्याशयस्तु एवम् उपवर्णितः—तथा च श्रीकृष्णसाहित्यसमभिव्याहृतानामेव मलयपवना-दीनामस्मदादीनां सुखादिरूपफलोपधायकत्वं तत्समभिव्याहृतमूर्छायाश्च क्रीडा-विच्छेदकत्वेन दुःखोपधायकत्वम् अधुना तदभावादेव वैपरीत्यमिति भाव इति। तस्मादित्यादि-द्वितीयचरणस्य व्याख्या त्वियम्—तस्मात् फलवैपरीत्यात् किल निश्चितं सर्वं विधिकृतं कारणं कारणसमूहः न कारणं न प्रत्येकं फलोपधायकम् इति। परार्धस्य भावस्त्वित्थं लिखितः—तथा च दिवाकरकिरणानां निशाकर-

किरणानाञ्च विकाशकत्वस्य दृष्टचरत्वात् सामान्यतो विकाशत्वावच्छिन्नं प्रति प्रति-किरणत्वेन हेतुत्वमिति नियमः। पद्मादिविकाशं प्रति तु दिवादिरूप-तत्तत्-काल-तत्सम्बन्धादिसमभिव्याहृतानामेव किरणानाम् उपधायकत्वात् न निशाकरकिरणेन कमलविकाशः दिवाकरकिरणेनैव स इति समुदितोऽभिप्रायः इति ॥३३॥

অনুবাদ। মলয়পবনে আমাদের ক্লেশ [হয়] এবং মূর্চ্ছায় উপকার হয়। অতএব বিধাতৃকৃত সমস্ত কারণ[ই] কারণ [বলিয়া গণ্য] নহে। [ইহার দৃষ্টান্ত দেখ] অমৃতকিরণ চন্দ্রের জ্যোতিতে কমলসমূহের অতিশয় মালিন্য [জন্মে] এবং তীব্রজ্যোতিঃ সূর্যের কিরণসম্পর্কে [অত্যন্ত] প্রফুল্লতা জন্মে ॥৩৩॥

स्त्रीभिः प्रेम प्रियतमगतं नैव शक्यं विहातुं
याचेऽतस्त्वां किल मधुपुरी-चङ्क्रमाय क्रमाङ्क।
दग्धेनापि व्यथितहृदया पञ्चबाणेन बाणैः
क्रूरैरुच्चैर्मदनरमणी तत्कृते रोदिति स्म ॥३४॥

[अन्वयः। स्त्रीभिः प्रियतमगतं प्रेम विहातुं न एव शक्यम्। [हे] क्रमाङ्क, अतः त्वां मधुपुरीचङ्क्रमाय याचे किल। दग्धेन पञ्चबाणेन क्रूरैः बाणैः व्यथितहृदया अपि मदनरमणी तत्कृते उच्चैः रोदिति स्म ॥३४॥]

टीका। ननु कृष्णो युष्मान् प्रति निःस्नेहो जातः युष्माभिरपि तं प्रति निःस्नेहाभिर्भूत्वा समुचितं प्रत्युत्तरं दीयताम्, यथोक्तम् अभियुक्तया—

कृतककृतकैर्मायाशाठ्यैस्त्वयाप्यतिवर्तितं
निभृतनिभृतैः कार्यालापैर्मयाप्युपलक्षितम्।
भवतु विदितं नेष्टा तेऽहं वृथा परिखिद्यते
ह्यहमसहना त्वं निःस्नेहः समेन समं गतम् ॥

इति । कृतं तदानयनार्थं मत्प्रस्थापनप्रयासेनेत्यत आह—स्त्रीभिरिति । प्रियतमगतं प्रियतमे आहितम्, अत्र णिजर्थता द्रष्टव्या, प्रेम स्त्रीभिः विहातुं त्यक्तुं नैव शक्यं कथमपि न शक्यत इत्यर्थः । हृदयगतं सर्वं स्नेहम् उपायनीकृत्य यः पुरा प्रियतमपदम् आरोपितः निःस्नेहादपि तस्मात् तत्प्रेमप्रत्याहारः स्त्रीभिर्दुष्कर इत्याशयः । अत एव प्रियतमगतम् इत्युक्तम् । स्त्रीभिरित्यनेन पुंभिस्तु कदाचित् शक्येतापीति सूचितम् । एवञ्च प्रियतमगतम् इत्यत्र प्रियतमपदे पुमेकशेषो द्रष्टव्यः । हे क्रमाङ्क, अतो हेतोः त्वां मधुपुरीचङ्क्रमाय मथुरागमनार्थं याचे प्रार्थये । किलेत्यनुनये । याचेर्दुहादिषु पाठाद् द्विकर्मकत्वेऽपि विवक्षाभावात् मधुपुरीचङ्क्रमायेत्यत्र न द्वितीया । यद्वा, याचे अनुनयामीत्यर्थः । अर्थान्तरवृत्तितया न द्विकर्मकता । केचित् याचे इत्यस्य आराधयामीत्यर्थम् आहुः ।

स्त्रिया प्रियतमाहितप्रेमप्रत्याहारस्य अशक्यतायां दृष्टान्तमाह—दग्धेनेति । दग्धेन भस्मीकृतेन, हरकोपानलेनेति कर्तृपदमूह्यम् , पञ्चबाणेन मदनेन क्रूरैः कठोरकर्मभिः निर्दयैरिति यावत्, बाणैः पञ्चसंख्यैरित्यर्थः, व्यथितहृदया पीडितचित्ता अपि मदनरमणी कामपत्नी रतिः तत्कृते मदननिमित्तं मदनस्य दाहेनेत्यर्थः , यद्वा, मदनप्राप्त्यर्थम्, उच्चैः अतिशयेन रोदिति स्म रुरोद । पत्या क्रूरकर्मभिर्बाणैर्भिन्नमर्मापि रतिस्तत्र निहितं प्रेम प्रत्यादातुं न शशाकेत्यर्थः । अत्र कामबाणैर्व्यथितहृदयत्वकथनात् मदनकदनेन रते रोदनं मदननिर्वर्त्यकामासम्पत्तिनिबन्धनम् इति सूचितम् । यस्तावद् दुष्कर्मा शमप्रधानं शिवम् अपि संक्षोभयन् तदीयेन नयनवह्निना भस्मीभूतो जातस्तदर्थमपि रती रुरोदेति दग्धपदस्याशयः । एतेन अस्मत्प्रियतमस्तु नैवंविध इति मदनात् कृष्णस्य व्यतिरेकप्रत्यायनात् अस्माभिः कृष्णः कथमपि न त्याज्य इति व्यज्यते । एवञ्च "कृतक-कृतकै"रित्यादि यदुक्तं तदीर्ष्याकषायितायाः

कस्याश्चिदात्मानानुसन्धाननिबन्धनं वाङ्मात्रं न तु तत्त्वम्, भूयोदर्शनविरोधादिति भावः ॥३४॥

অনুবাদ। রমণীগণ প্রিয়তমে স্থাপিত প্রেম কোনমতেই প্রত্যাহার করিতে পারে না; হে ক্রমাঙ্ক, এই জন্যই মথুরায় যাইবার জন্য তোমার কাছে সানুনয়ে প্রার্থনা করিতেছি। [দেখ] ভস্মীকৃত কামদেব কর্তৃক ক্রূর বাণ দ্বারা ব্যথিতচিত্তা হইয়াও মদনপত্নী রতি তাহার (মদনের) জন্য নিরতিশয় রোদন করিয়াছিল ॥৩৪॥

आस्ते चित्ते किल कलयितुं वासना शम्बरारे-
रेकैकेन व्रजकुलबधूप्राणमेकैकमङ्क ।
बाणेनातः सततमतनुर्जातकोपाहितुल्यैः
क्रूरैरस्मान् दहति कुसुमैः सायकैः पञ्चसंख्यैः ॥३५॥

[अन्वयः । [हे] अङ्क, शम्बरारेः चित्ते एकैकेन बाणेन एकैकं व्रजकुलबधूप्राणं कलयितुं वासना आस्ते किल । अतः अतनुः जातकोपाहितुल्यैः क्रूरैः पञ्चसंख्यैः कुसुमैः सायकैः अस्मान् सततं दहति ॥३५॥]

टीका । इदानीं दूतस्य कारुण्योत्पादनार्थं सन्देशकथनार्थञ्च स्वीयां कामबाधाम् आह—आस्ते इति । हे अङ्क पदचिह्न. शम्बरारेः कामस्य चित्ते एकैकेनेति पञ्चानामिति शेषः, बाणेन एकैकं व्रजकुलबधूप्राणं कलयितुं ग्रहीतुं, कलेः कामधेनुत्वात् व्रजकुलबधूभ्यो बहिर्निष्काशयितुं वा, वासना वाञ्छा आस्ते, किल निश्चये, सम्भावनायां वा । बाण-प्राणयोः संख्यासाम्यसम्भूतेयं सम्भावना । अत्र हेतुमाह—बाणेनात इति । बाणेनेति पूर्वान्वयि । अतः कारणात् अतनुः कामः जातकोपाहितुल्यैः सरोषसर्पसदृशैः क्रूरैः निर्दयैः पञ्चसंख्यैः कुसुमैः सायकैः पुष्परूपैः बाणैः अस्मान् सततं दहति पीडयतीत्यर्थः । पीडामात्रस्य प्रापणीयत्वे

एकेनापि तन्निर्वाहसम्भवात् यद् युगपत् पञ्चबाणसन्धानं कामेन कृतं तन्नूनम् एकैकेन बाणेन एकैकप्राणहरणेच्छाप्रयुक्तमिति भावः। पञ्चबाणसन्धान-सम्भावना च तेषां बाणानां सम्मोहनादिकार्यपञ्चकस्य युगपदात्मनि अनुभवाभि-मानजनितेति ज्ञेयम्। ते च बाणाः

अरविन्दमशोकञ्च चूतञ्च नवमल्लिका।
रक्तोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः॥

इति। एतेषां क्रियाभिधित्सया च

सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा।
स्तम्भनश्चेति कामस्य पञ्च बाणाः प्रकीर्तिताः॥

इति प्रकारान्तरेण बाणपञ्चकाख्यानम्। एषामेवात्रोपयोगः।

यद्वा, हरेर्निवासगुणेन वृन्दावने सर्वदा सर्वर्तुसमाहार इति युगपद्विक-शितानि कामबाणभूतानि अरविन्दादीनि नित्यमस्मान् दुन्वन्तीत्याशयः। एवञ्च कुसुमैरित्यपि सार्थकम् अन्यथा दार्हे उपयोगाभावादीषत्करं तद् भवेत्। तथा एतदभिप्रायेणैव जातकोपाहितुल्यैरिति जीववदुपमानसंग्रहः। कथम् अन्यथा अतनुबाणत्वेनाभिमतानाम् अतनूनाम् अरविन्दादीनां तथाविधम् उपमानं समञ्जसं स्यात्? जातकोपेति विशेषणेन उद्यत्फणामण्डलता व्यज्यते, तथा च मन्दान्दोलितान्यरविन्दादीनि समुन्नतफणामण्डलाः कुण्डलिन इव नित्यमस्मान् उद्वेजयन्तीति भावः॥३५॥

অনুবাদ। হে পদাঙ্ক, কামদেবের মনে [মনে] এক একটী বাণদ্বারা ব্রজ-কুলবধূদিগের এক একটী প্রাণ লইবার নিশ্চয় বাসনা আছে। এই কারণে অনঙ্গ ক্রুদ্ধ সর্পসদৃশ ক্রূর পাঁচটি পুষ্পবাণদ্বারা নিরন্তর আমাদিগকে দগ্ধ করিতেছে॥৩৫॥

यल्लोकानामपकृतिभयात् कालकूटोऽपि पीत-
स्तानेवायं दहति गरलैस्तादृशैराचितेन ।
बाणेनेति त्रिपुररिपुणा जातकोपेन दग्धो
नेत्रोत्थेन प्रबलशिखिना निर्दयं शम्बरारिः ॥३६॥

[अन्वयः । यत् लोकानाम् अपकृतिभयात् [मया] कालकूटः अपि पीतः, अयं तादृशैः गरलैः आचितेन बाणेन तान् एव दहति । इति जातकोपेन त्रिपुररिपुणा नेत्रोत्थेन प्रबलशिखिना शम्बरारिः निर्दयं दग्धः ॥३६॥]

टीका । ननु कामः कथम् अकारणवैरं कुर्यात् ? तन्नूनं भवतीनां केनचिदपराधेन भाव्यम् इत्याशङ्कायां पुराणप्रामाण्येन तस्य स्वभावदौर्जन्यं तेन च महत्तमतोऽप्यधिगतं निग्रहं स्मारयितुं कामबाणानां कालकूटतुल्यतामाह—यल्लोकानामिति । यदिति अव्ययं लुप्तषष्ठीकम्, येषां लोकानाम्, यद्वा ये लोका यल्लोकाः तेषामिति कर्मधारयः । किन्तु एतत्पक्षे यच्छब्दस्य समासैकदेशत्वात् तच्छब्देन संग्रहो दुरूहो भवेदिति भाव्यम् । अपकृतिभयात् दाहरूपानिष्टसम्भावनयेत्यर्थः, उत्तरवाक्ये दहतीति दर्शनात् । कालकूटः तदाख्यः समुद्रमन्थनोत्थो विषभेदः अपि पीतः मया पानेन स्वकण्ठस्थीकृत इति भावः । अपिर्लोकापकारस्यावश्यपरिहार्यत्वमाह । अयं शम्बरारिः तादृशैः कालकूटसदृशैः गरलैः विषैः आचितेन लिप्तेन बाणेन तान् एव जनान् दहति रुजति, इति अस्मात् कारणात् जातकोपेन क्रुद्धेन त्रिपुररिपुणा त्रिपुरासुरशत्रुणा महादेवेन, नेत्रोत्थेन नयनसम्भूतेन प्रबलशिखिना तीव्रवह्निना करणेन शम्बरारिः कामः दग्धः भस्मीकृतः । लोकोपकारिणः परमकारुणिकात् परमेश्वराल्लब्धदण्डोऽयं कामः स्वभावदुर्जनः, तद्बाणाश्च कालकूटवत् लोकानां तीव्रदाहोत्पादका इति भावः । अत्र तादृशैर्गरलैराचितेने-

त्युक्तेर्मयि बद्धवैरो मदनो मया येन रूपेण यत् कर्तुमिष्यते तेन रूपेण तदन्यथा कर्तुमिच्छतीति प्रतीत्या व्याघातोऽपि व्यज्यते ।

अत्र लोकशब्दो भुवनपर्यायः लक्षणया तद्वासिपरः, तथा च भूरादिभुवनवासिनां नरसुरासुरब्रह्मादीनाम् अस्मदादीनां (महादेवप्रभृतीनां) चेत्यर्थः । इत्थमेव वाक्यार्थः प्रकृतोपयोगी स्यात्, महेशे व्याप्रियमाणस्यैव मदनस्य तेन दाहश्रवणात् । तथा मदनशरेण ब्रह्मादेरेव धैर्यच्युतेः प्रसिद्धतया साधारणानां तत्कथने वैचित्र्याभावात्, कालकूटोत्पत्त्या ब्रह्मादीनामेवापकृतिश्रवणाच्च । अत एवाग्रिमश्लोके कामबाणसदृशेन कालकूटेन ब्रह्मादीनां धैर्यच्युतिरुक्ता । न च कालकूटेन महादेवस्य धैर्यच्युतिरेव नासीत्, अत एवाग्रिमश्लोकेऽपि ब्रह्मादिभ्यस्तस्य व्यतिरेकः कृत इति वाच्यम्, जायमानाया अपि धैर्यच्युतेः कालकूटपानपौरुषेण परास्तत्वात् पुराणादौ अग्रिमश्लोके च ब्रह्मादिभ्यस्तस्य वैलक्षण्यमुक्तम् ॥३६॥

অনুবাদ। যে [ব্রহ্মাদি] লোকসমূহের অনিষ্ট [হইবার] আশঙ্কায় [আমি] কালকূট [বিষ]ও পান করিয়াছি, এই কাম তত্তুল্য (কালকূটতুল্য) গরল দ্বারা ব্যাপ্ত বাণসমূহদ্বারা তাহাদিগকেই দগ্ধ করিতেছে—এই জন্য ক্রুদ্ধ ত্রিপুরারি নেত্রোৎপন্ন প্রবল অগ্নি দ্বারা কামকে নির্দয় ভাবে ভস্মীভূত করিয়াছিলেন ॥৩৬॥

नैव न्यूनः सगरज-गरः शम्बरारेः शरस्य
ब्रह्मादीनामयमपि यतो धैर्यविध्वंसहेतुः ।
एतद्वाक्यं गिरिशचरणैः खण्डितं पण्डिताद्यै-
रस्यासङ्गाद् व्यथितहृदयैर्निर्दयं दग्धकामैः ॥३७॥

[अन्वयः । यतः अयम् अपि ब्रह्मादीनां धैर्यविध्वंसहेतुः [अतः] सगरजगरः

शम्बरारेः शरस्य न न्यून एव । अस्य आसङ्गात् व्यथितहृदयैः निर्दयं दग्धकामैः पण्डिताद्यैः गिरिशचरणैः एतत् वाक्यं खण्डितम् ॥३७॥]

टीका । पुनरपि भङ्ग्यन्तरेण कामशरस्य कालकूटतुल्यतामाह—नैव इति । यतः अयं सगरजगरः अपि ब्रह्मादीनां धैर्यविध्वंसहेतुः धीरत्वनिरासकारणम् वैक्लव्यसम्पादक इत्यर्थः । न केवलं कामबाण एवैवंभूतः सगरजगरोऽपीत्यपेरर्थः । यद्वा, ब्रह्मादीनाम् अपीत्यन्वयः ज्ञानिनामपीति तदर्थः । सागरमन्थनादुत्थिते कालकूटे विषज्वालावलीढानां ब्रह्मादीनां पुराणादौ पलायनश्रवणादिति भावः । अतः कारणात् कामबाणपुरुषकारपराकाष्ठाया ब्रह्मादिधैर्यच्युतेः कालकूटेनापि झटित्येवोपपादनादित्यर्थः, सगरजगरः सगरेभ्यः सगरापत्येभ्यो जातः सगरजः सागरः समुद्र इति यावत्, तस्य गरः कालकूटाख्यविषभेदः । लुप्तापत्यप्रत्यये सगरापत्यार्थक-सगरशब्द उपपदे जनेर्डप्रत्ययेन सगरजशब्दः सम्पन्नः, ततस्तस्य गर, इति षष्ठीतत्पुरुषेण सगरजगरशब्दो निष्पन्नः । शम्बरारेः शम्बराख्य-दैत्यभेदद्विषः कामस्य शरस्य बाणस्य न न्यून एव न हीन एव, एतावान् वाक्य-प्रकारः । अत्र तुल्यताकथनस्यैव प्रासङ्गिकत्वात् 'न न्यून' इत्यस्य तुल्य इत्यर्थः करणीयः । अत एव शरस्येति षष्ठ्यपि न विरुध्यते ।

एतद् वाक्यं गिरिशचरणैः खण्डितम् इत्यन्वयः । खण्डनप्रकारम् आह—अस्येति । अस्य कामशरस्य आसङ्गात् ईषत्सम्पर्कात् व्यथितहृदयैः पीडितचित्तैः लुप्तधैर्यैरिति भावः । अत एव निर्दयं निष्करुणं यथा स्यात्तथा दग्धकामैः भस्मीकृतमदनैः पण्डिताद्यैः ज्ञानिश्रेष्ठैः गिरिशचरणैः सर्वपूज्येन महादेवेनेत्यर्थः, एतद् वाक्यं कालकूटस्य कामबाणतुल्यताभिधायकं पूर्वोक्तवाक्यम् इत्यर्थः । खण्डितं निराकृतम् । अत्र खण्डितम् इत्यस्य दग्धकामत्वं हेतुस्तस्य च व्यथितहृदयत्वम् इति हेतुहेतुमद्भावो द्रष्टव्यः । ब्रह्मादिधैर्यच्युतिसाधन-

साधर्म्येण आपाततस्तुल्यतयाऽभिप्रेतोऽपि कामबाणेन कालकूटः कामेषोरीषत्-सम्पर्कपरास्तधैर्येणापि धूर्जटिना चुलुकित इति पर्यवसाने व्यतिरेकसूचनात् न स कामबाणतुल्य इति भावः।

दग्धुकामैरिति पाठे कामबाणान् इत्यध्याहृतकर्मपदेनान्वयः। दग्धुं काम एषामिति दग्धुकामाः तैः, कामबाणान् दग्धुकामैरपि तदक्षमैरित्यर्थः। तथा च परोपतापकतासहिष्णुतया भक्षितेऽपि कालकूटे परोपतापकान् कामबाणान् दग्धुम् अक्षमेण महेशेन बाणपाणिः कामो दग्ध इति कामबाणानां व्यतिरेकः सूचितः। तेन च—

मध्येन तनुमध्या मे मध्यं जितवतीत्ययम्।
इभकुम्भौ भिनत्त्यस्याः कुचकुम्भनिभौ हरिः॥

इतिवत् प्रत्यनीकालङ्कारोऽपि प्रतीयते इति भावः।

आसङ्गादिति। आसङ्ग ईषत्सम्पर्कः, तस्य च प्रकारान्तरेण निर्वक्तुम् अशक्यत्वात् स्व(शिव)शरव्यक-कामबाणस्य धनुरारोपितविधया दर्शनम् इति वक्तव्यम्, तत एव शिवस्य धैर्यच्युतेः। तथा च कुमारे

स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम्।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम्॥ इति
तपःपरामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य। इत्यादि च।

ननु च क्रियाश्रयदेहिसाहचर्यमन्तरेण निष्क्रियाणां बाणानां निष्फलतया कामदाहेनैव अर्थात् तेषामपि दाहः सिद्ध एवेति यथोक्तव्यतिरेको न सहृदय-हृदयग्राहीति? सत्यम्। तथापि कामबाणपीडितस्य देवदेवस्य एतावद् विवेकवैधुर्यम् उपनतं यत्तेनापकारिणां कौसुमशराणां दाहार्थं सन्धुक्षितेन वह्निना सपद्येव कश्चिद्देही दग्ध इति विवक्षया प्रकारान्तरेण कालकूटाद्

व्यतिरेकः स्थित एवेति न दोषः। एवञ्च, दण्डापूपिकान्यायेन कामदाहात् कामकरस्थः शरोऽपि दग्ध एवेति भगवतो वाणदाहासामर्थ्यमूलको यथोक्तो व्यतिरेकः पुनरपि निरास्पद एवेति पर्यनुयोगोऽपि परास्तप्राय एव, बाणानां वैक्लव्यविधानदाद्यस्य अत्राप्यनपनीतत्वेन प्रकारान्तरव्यतिरेकस्य यथापूर्वं स्थितत्वात्।

अस्येति। अस्य शरस्य। शम्बरारेरिति केचित्। एवञ्च कामदाहकत्व-वचनमपि आञ्जस्येन घटते। यत् पुनः पूर्ववाक्ये शरस्य प्राधान्येनोपन्यासस्तद् उपमेयस्य शरस्य साम्यप्रसिद्ध्यर्थमिति ज्ञेयम्। अन्यथा निष्प्राणे शरे प्राणिनः कामस्योपमानता नैव सुघटा भवेदिति। अत एव 'शम्बरारेः शरस्य' इत्यत्र 'चित्तभूसायकस्य' इत्यपि कविना न कृतम्, समासान्तर्गतस्य चित्तभूपदस्य इदमा परामर्शस्यासुकरत्वादिति भावः।

निर्दयमिति। दाहविशेषणमप्येतत् फलतः कर्तर्येवान्वेति। तथाच प्रकारान्तरेणापि घटयितुं सुशकया प्राणहान्या अपरितुष्यन् स्वभावसदयोऽपि देवदेवो यदेनं दाहेन हतवान् तदेव तस्य निर्दयत्वमित्यर्थः। यद्वा, दाहस्य निरवशेषता अनेन सूचिता। सा च रतिविलापेऽप्युक्ता—

इति चैनमुवाच दुःखिता सुहृदः पश्य वसन्त किं स्थितम्।
तदिदं कणशो विकीर्यते पवनैर्भस्म कपोतकर्बुरम्॥ इति

नाम्ना वा सम्बन्धपदेन वा पूज्यानाम् उल्लेखे कर्तव्ये आदराचरणादिशब्दस्य व्यवहारः शिष्टाचारप्राप्त इति गिरिशचरणैरित्युक्तम्। पण्डिताद्यैरिति। यद्यपि ब्रह्मादयोऽपि पण्डितास्तथापि कालकूटाद् विकारमापन्नाः। अयन्तु ततो न विकृतिमापन्न इति पण्डितश्रेष्ठैः इत्युक्तम्। एवञ्च पण्डितश्रेष्ठस्यापि काम-बाणेषत्सम्पर्कव्यथितहृदयताकथनादतिकालकूटत्वं कामबाणानामुक्तमिति भावः।

नैवम् इत्यपि पाठः। तत्र यतः अयं धैर्यविध्वंसहेतुः एवम् अनेन प्रकारेण, अतः इति यावत् इत्याद्यर्थः ॥३७॥

বঙ্গানুবাদ। "যে হেতু ইহাও (সাগরোৎপন্ন বিষও) ব্রহ্মাদির ধৈর্য নাশের কারণ, এই জন্য সাগরোৎপন্ন বিষ কামশরের তুল্যই"—এই কথা কামবাণের অল্পমাত্র সম্পর্কে ব্যথিতহৃদয় পণ্ডিতশ্রেষ্ঠ পূজ্যপাদ মহাদেব কামদেবকে নির্দয়ভাবে দগ্ধ করিয়া খণ্ডিত করিয়াছেন ॥৩৭॥

उत्तापोऽयं मदनजनितो वर्धते नित्यमुच्चै-
र्वृन्दारण्ये वसतिरधुना केवलं दुःखहेतुः।
किञ्चास्माकं नयनसलिलैर्वर्धते चेन्नदीयं
केन स्थेयं द्रुतगति जलैराचिते कुञ्जमध्ये ॥३८॥

[अन्वयः। अयं मदनजनितः उत्तापः नित्यम् उच्चैः वर्धते। अधुना वृन्दारण्ये वसतिः केवलं दुःखहेतुः। किञ्च, इयं नदी अस्माकं नयनसलिलैः चेत् वर्धते [तदा] जलैः द्रुतगति आचिते कुञ्जमध्ये केन स्थेयम् ॥३८॥]

टीका। प्रस्तुतं कामकदननिवेदनम् उपसंहरति—उत्तापोऽयम् इति। यद्वा, ननु, "कालक्रमेण जगतः परिवर्तमाना चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः।" इति, 'पर्यायपातीनि सुखदुःखानी'ति, 'सुखमापतितं सेव्यं दुःखमापतितं तथा' इत्यादिमहाजनसूक्तीरनुसृत्य स्वस्थया स्थीयतां, कालेन सर्वमपगमिष्यतीति अलं ते उत्तमतयेत्याह—उत्तापोऽयमिति।

अयं पञ्चत्रिंशश्लोकोक्तः मदनजनितः उत्तापः नित्यम् उच्चैः अतिशयेन वर्धते। एकदा उच्चैर्वृद्धोऽपि ज्वरादिः परेद्युरारभ्य सह्यवेदनो भवतीति नित्यमित्युक्तम्, नित्यप्रवृद्धस्य सह्यता तु दूरापेता इति भावः। अधुना कृष्णविरहदशापरिपाकावस्थायामित्यर्थः, वृन्दारण्ये वसतिः केवलम् सुखादिनिरपेक्ष-

मिति भावः, दुःखहेतुः क्लेशस्य कारणम्। दुःखहेतुता च विंशश्लोके "कर्पूरादेः सलिलमभवद् वैतरण्यम्बुतुल्यम्" इत्यादिना स्पष्टीकृता। यद्वा, मदनोत्तापवृद्धिरेव दुःखहेतुतयाऽभिप्रेता द्रष्टव्या। तथा चास्तां कथा अपगमस्य, ह्रासोऽप्यस्य नास्तीति कथं भवदुक्तसूक्तीरनुसृत्य स्वस्थया स्थातव्यमित्याशयः।

ननु दुःखेनापि कियत्कालं प्रतीक्षस्व, 'जीवन्नरो भद्रशतानि पश्येत्' इति महाजनवाक्यात् परतः सुखम् अनुभविष्यसीत्याह—किञ्चेति। न केवलम् एतावत् अन्यच्चेत्यर्थः। इयं नदी यमुना अस्माकं नयनसलिलैः चेद् यदि वर्धते वर्धितुमारभते तदेति शेषः। द्रुतगति शीघ्रगत्येत्यर्थः, जलैः आचिते व्याप्ते कुञ्जमध्ये केन प्रकारेण स्थातव्यं वस्तव्यम् अस्माभिरिति शेषः। यद्वा, केन जनेन स्थातव्यम् इत्यर्थः।

तदानीं राधायाः कुञ्जमध्ये अवस्थानात् विरहोन्मादतया कुञ्ज एव सर्ववृन्दावनभ्रमाद्वा 'कुञ्जमध्ये' इत्युक्तम्। अन्यथा, कुञ्जमध्ये अवश्य-वर्तितव्यतायाः कारणविरहेण गोवर्धनाद्युच्चस्थानसद्भावेन च "कुञ्जमध्ये केन स्थेयम्" इत्युक्तेरसंलग्नता स्यात्। मध्यपदेन शीघ्रगत्या जलस्फारे कुञ्जादस्मा-न्निष्क्रमोऽपि दुष्करः स्यादिति सूच्यते। द्रुतगतीति आचितक्रियाविशे-षणम्। यद्वा, द्रुतगतिजलैरित्येकपदम्।

इयञ्च नयनसलिलेन नदीवृद्धिः पूर्वं (२८-३२ श्लोक) महता प्रबन्धेन परास्तापि स्वार्थसिद्धिविधित्सया राधया दूतकारुण्योद्रेकार्थं कल्पितेति ज्ञेयम्। सत्यमुक्तं कविवृषेण "स्त्रीणामशिक्षितपटुत्वममानुषीषु सन्दृश्यते किमुत याः प्रतिबोधवत्यः" इति। यद्वा, एतदपि भ्रमकार्यमिति द्रष्टव्यम् ॥३८॥

অনুবাদ। এই মদনজনিত উত্তাপ নিত্যই অতিশয় বৃদ্ধি পাইতেছে। বৃন্দাবনে বাস এখন একমাত্র দুঃখের কারণ[ই] হইয়াছে। আরও [দেখ], এই

[যমুনা] নদী আমাদের নয়নজলে যদি বৃদ্ধি পাইতে থাকে তাহা হইলে জলদ্বারা দ্রুতগতি পরিব্যাপ্ত কুঞ্জমধ্যে কি প্রকারে বাস করিব ? ॥৩৮॥

यस्य ध्यानं जनयति सुखं यादृशं तादृशं न
स्वर्लोकादावपि किमपरं ब्रह्मसाक्षात्कृतौ च ।
ज्ञातञ्चैतन्मुनिवरमुखाम्भोजतः कीदृशी ते
बुद्धिस्तादृग्जनकविषये दर्शने नास्ति यत्नः ॥३९॥

[अन्वयः । यस्य ध्यानं यादृशं सुखं जनयति तादृशं [सुखं] स्वर्लोकादौ अपि, अपरं किं ब्रह्मसाक्षात्कृतौ च न [भवति]। एतत् मुनिवरमुखाम्भोजतः च ज्ञातम् । तादृग् जनकविषये दर्शने यत्नः न अस्ति [इति] ते कीदृशी बुद्धिः ॥३९॥]

टीका । एतावता करुणप्रबन्धेनापि गमनानुबन्धम् अनालोक्य 'तेजस्वी प्रायः संक्षोभात् प्रतिपद्यते तेजः' इति नीतिमाश्रित्य तिरस्कारेण क्षोभयितुम् आह—यस्येति । यस्य श्रीकृष्णस्य ध्यानम् एकान्तभावेन चिन्तनं कर्तृ यादृशं सुखं जनयति चेतसि उत्पादयति, तादृशं सुखं स्वर्लोकादौ स्वर्गादि-लोके अपि, किं पुनर्भूर्भुवर्लोकयोरित्यपिशब्दार्थः । आदिपदान्महर्जनादि-परिग्रहः, अपरम् अन्यत् किं वक्तव्यमिति वाक्यशेषः, ब्रह्मसाक्षात्कृतौ च चोऽप्यर्थे, ब्रह्मज्ञाने सत्यपि इत्यर्थः, तादृशं सुखं न भवति । आस्तां स्वर्गादि-सुखं ब्रह्मानन्दोऽपि श्रीकृष्णध्यानजसुखाद्धीन एवेति भावः ।

स्ववचोदार्ढ्यार्थम् अत्रार्थे पुराणसंवादमाह—ज्ञातम् इति । एतत् अस्मदुक्तं श्रीकृष्णध्यानज-सुखस्य स्वर्गादिलोकदुर्लभत्वं मुनिवरमुखाम्भोजतः मुनिवरो नारदः तस्य मुखाम्भोजं वदनकमलं तस्मात् च ज्ञातं त्वयाऽवगतमित्यर्थः । चकारोऽप्यर्थे । तथा च न तावदिदं प्रथमतया त्वयेदम् अस्मन्मुखादेव ज्ञातं, नारदमुखादपीत्यर्थः । एवं च नेयं मम स्वकार्यसाधनार्था कपोलकल्पना

न वा विरहोन्मादेन निरर्था जल्पना च, किन्तु भगवद्भक्तेन प्रमाणमूर्धन्येन देवर्षिणा नारदेनैतदुक्तमिति भावः। तथा च भागवते—

तद् ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम्॥ इति ७-७-३७

एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः।

तस्माददृष्टश्रुतदूषणं परं भक्तयोक्तयेशं भजतात्मलब्धये॥ ७-७-४

इत्यादि च। तादृक् 'यस्य ध्यानम्' इत्याद्युक्तरूपः श्रीकृष्णः जनकः पिता, स विषयो यस्य तथाभूते दर्शने श्रीकृष्णरूपजनकदर्शने इत्यर्थः, यत्नः चेष्टा नास्ति इति हेतोः ते कीदृशी अचिन्त्यरूपा अन्यविलक्षणा वा बुद्धिः इत्यहं न जानामीति भावः। साधारणोऽपि जनः साधारणस्य पितुः कृते उन्मनायते त्वं पुनः स्वयं महत्प्रभवोऽपि तादृशम् अन्यविलक्षणम् अपि जनकं न दिदृक्षस इत्यहो महत्ते मौढ्यम् इत्युपालम्भः॥३९॥

অনুবাদ। যাঁহার ধ্যান যাদৃশ সুখ জন্মায় স্বর্গলোক প্রভৃতিতেও, অধিক কি [বলিব] ব্রহ্ম সাক্ষাৎকারেও সেইরূপ সুখ হয় না। ইহা মুনিবর [নারদের] মুখ-কমল হইতেও জ্ঞাত আছ। ঈদৃশ পিতার দর্শন-বিষয়ে [কোন] চেষ্টা নাই—এ তোমার কিরূপ বুদ্ধি? ॥৩৯॥

वक्तव्यं यन्मदनजनितं दुःखमस्माकमेतद्
भूयो भूयः प्रियतमपदे गोपयित्वा स्वदेहम्।
दृष्टे तेन त्वयि नयनयोर्निस्तुलप्रीतिहेतौ
यास्यत्येव क्षणमपि मनस्त्वत्कथायां न तस्य॥४०॥

[अन्वयः। अस्माकं यत् मदनजनितं दुःखम् एतत् प्रियतमपदे स्वदेहं गोपयित्वा [त्वया] भूयः भूयः वक्तव्यम्। तेन नयनयोः निस्तुलप्रीतिहेतौ त्वयि दृष्टे [सति] तस्य मनः क्षणम् अपि त्वत्कथायां न यास्यति एव॥४०॥]

परं पश्यतः पितुस्तन्मयीभावेन युक्तम् एव व्यापारान्तरवैराग्यम् इति पदाङ्क-स्तुतिरियम्। कश्चिदाह—अत्र स्वदेहगोपनेन वचनगोपनमुपलक्ष्यते। एवञ्च 'गोपयित्वे'त्यस्य जनान्तरादिति शेषः नतु श्रीकृष्णादपीति। तथात्वे अशरीर-वाणीश्रवणचमत्कृतस्य तस्य श्रोतव्यविषयाभिनिवेशो दुष्करः स्यात्। तथा चायम् अर्थः अन्यालक्षितेन त्वया अन्यागोचरम् अस्मदीयं दुःखं प्रियतमपदे निवेदनीयम् इति। यत्तु "दृष्टे तेन त्वयी"त्यादिना देहगोपनस्य फलान्तरम् अप्युक्तम् तत् स्वाभिप्रायगोपनपूर्वकं दूतस्तुत्यभिप्रायकम् अवगन्तव्यम्। अत एव "गोपीदौत्यप्रकटनभिये"ति यत् पूर्वमुक्तं तेनाप्येकवाक्यता भवेत्। अत्र वचनस्य अप्रकाशतानुपदेशे तु विरोध आपतेदिति। "तत्कथायाम्" इति पाठे पूर्वोक्तायाम् अस्माकं मदनजनितदुःखकथायाम् इत्यर्थः ॥४०॥

অনুবাদ। আমাদের যে কামজনিত দুঃখ, ইহা তুমি [আমাদের] প্রিয়তমের পদে নিজদেহ গোপন করিয়া বার বার বলিবে। [কারণ] নয়নের অতুল আনন্দজনক তোমাকে তিনি দেখিলে ক্ষণকালের জন্যও তোমার কথায় তাঁহার মন যাইবে না ॥৪০॥

वक्तव्यञ्च स्फुटमिति यदा निर्जनस्थो मुकुन्दः
पद्माद्यङ्कैरतिसुललितैरङ्कितं त्वत्पदाब्जैः।
वृन्दारण्यं स्मरसि न कथं श्रीपते मञ्जु कुञ्जं
ज्ञातं ज्ञातं यदिह न परीरम्भणं कुब्जिकायाः ॥४१॥

[अन्वयः। यदा मुकुन्दः निर्जनस्थः [तदा] इति च स्फुटं वक्तव्यम्—[हे] श्रीपते, अतिसुललितैः पद्माद्यङ्कैः [उपलक्षितैः] त्वत्पदाब्जैः अङ्कितं मञ्जुकुञ्जं वृन्दारण्यं कथं न स्मरसि? ज्ञातं ज्ञातम्, यत् इह कुब्जिकायाः परीरम्भणं न [अस्ति] ॥४१॥]

स्फुटमिति यदुक्तं तदपि सङ्गच्छते। पदाब्जैरिति पूजायां बहुवचनम्, पदाङ्कानां बाहुल्यात् तदिति वा।

बोद्धव्याय उत्तरावकाशमदत्त्वैवाह—ज्ञातं ज्ञातमिति। ज्ञातं ज्ञातम् इति वीप्सा हर्षातिशयेन; हर्षातिशयश्च प्रकृततथ्योद्घाटननिबन्धन-मनःप्रसादेन। यद्वा, स्वज्ञानदार्ढ्यसूचनार्थं सेति मन्तव्यम्। यत् यस्मात्, इह वृन्दारण्ये कुब्जिकायाः कुब्जीभूतायाः त्रिवक्रानाम्नयाः सैरन्ध्र्याः परीरम्भणम् आलिङ्गनं कुब्जिकाकर्मक-श्रीकृष्णकर्तृकपरिष्वङ्ग इति यावत्, न वर्तते; एतदेव वृन्दारण्या-नागमनकारणमित्यर्थः। अयमभिसन्धिः, अंशतः सत्यभूतया अनया परिहासोक्त्या समुत्पन्नत्रपः श्रीकृष्णः स्वनिर्दुष्टत्वप्रतिपिपादयिषयापि यदि कदाचिदागच्छेत्ततोऽस्माकं मनोरथसिद्धिर्भवेदिति। अत एवायं द्वितीयार्धगतार्थोऽपि वक्तव्यरूपेणैवोपदिष्ट इति ज्ञेयम्।

অনুবাদ। যখন মুকুন্দ নির্জনে থাকিবেন [তখন] ইহাও [তাঁহাকে] পরিষ্কাররূপে বলিবে—হে শ্রীপতে, পদ্মাদি চিহ্নদ্বারা অতিমনোহর তোমার সুললিত পাদপঙ্কজ-চিহ্নিত, মনোরম কুঞ্জবিশিষ্ট বৃন্দাবন কেন স্মরণ করিতেছ না? বুঝিয়াছি বুঝিয়াছি,—যে হেতু এখানে কুব্জার আলিঙ্গন [লাভের সম্ভাবনা] নাই ॥৪১॥

आकाङ्क्षा या ग्लपयति मनो मादृशां वासना सा
शाब्दे धर्मे सति न भविता हानिरेव क्रमाङ्क।
साकाङ्क्षोक्त्या मुरहरपदे सर्वमेतन्निवेद्यं
नो चेत् तस्य प्रमितिजनने केन हेतुस्तवोक्तिः ॥४२॥

[अन्वयः। [हे] क्रमाङ्क, या आकाङ्क्षा मादृशां मनः ग्लपयति सा वासना; शाब्दे धर्मे सति हानिः न भविता एव। एतत् सर्वं [त्वया]

टीका। गोप्यं वक्तव्यान्तरम् आह—वक्तव्यम् इति। मुकुन्दो यदा निर्जनस्थः एकान्ते वर्तमानो भवेत् तदा स्फुटं सुस्पष्टम् उच्चकण्ठमिति यावत्। इति च वक्ष्यमाणम् अपि वक्तव्यम्, त्वयेति शेषः। चकारात् पूर्वश्लोकोक्त-वक्तव्यसंग्रहः। तदाह—पद्माद्यङ्कैरिति। अतिसुललितैः अतिमनोज्ञैः पद्माद्यङ्कैः पद्मकुलिशादिचिह्नैः उपलक्षितैः त्वत्पदाब्जैः तव पादपद्मैः अङ्कितं चिह्नितं मञ्जुकुञ्जं मनोरमकुञ्जविशिष्टं वृन्दारण्यं कथं केन हेतुना न स्मरसि। अत्र स्मरणेन आगमनं लक्ष्यते, वृन्दावनं कथं नागच्छसीत्यर्थः।

पद्माद्यङ्कैरिति विशेषणे तृतीया। यद्वा, पद्मादिः अङ्को यत्रेति बहुव्रीहिणा त्वत्पदाब्जैरित्यस्य समानाधिकरणविशेषणम्। एतत्पक्षे अति-सुललितैरिति पदाब्जविशेषणम्। विशेषणतृतीयापक्षे तु काकाक्षिगोलक-न्यायेन पद्माद्यङ्कैरित्यस्येव त्वत्पदाब्जैरित्यस्यापि तद् विशेषणम्। यद्वा, पद्माद्यङ्कैरिति अतिसुललितैरित्यस्य हेतुपदम्, पद्मादिचिह्निततया अतिसुललितै-रिति तदर्थः। मञ्जुकुञ्जविशेषणं च तत्रत्य-रत्यादिस्मारणेन कृष्णस्योत्-कण्ठोत्पादनाभिप्रायकम् इति द्रष्टव्यम्। प्रकाशोक्तौ मर्यादाभङ्गात् क्रुद्धः कृष्णः कदाचिदपि वृन्दावनं नागच्छेदिति निर्जनकथनोपदेशः। यद्यपि पूर्वश्लोकोक्त-वक्तव्यस्यापि प्रकाशेन मर्यादाभङ्गप्रसङ्गस्तदवस्थ एव तथापि कुब्जिका-परिरम्भादिस्मारकतया सोऽस्मिन् श्लोके प्रकट इत्यस्त्येवास्य वैशिष्ट्यम्। यद्वा, 'यदा निर्जनस्थो मुकुन्दः' इत्यस्योभयत्रापि सम्बन्ध एष्टव्यः, तथा च यदा मुकुन्दो निर्जनस्थः तदा इदं च वक्तव्यमित्युक्त्या पूर्वोक्तमपि निर्जनस्थायैव वक्तव्यमित्यायातीति न कश्चिद्दोषः। यद्यपि जनान्तिकादिविधयापि अन्या-विदितं वक्तुं शक्नुयात् एवञ्च न यथोक्तमर्यादाभङ्गोऽपि, तथापि तादृग् विधया कथने वक्तव्यार्थः प्रकटो भवति न वेति चिन्तया निर्जनस्थ इत्याद्युक्तम्, अत एव

साकाङ्क्षोक्तया मुरहरपदे निवेद्यम्, नो चेत् तव उक्तिः केन तस्य प्रमितिजनने हेतुः [भवेत्] ॥४२॥]

टीका। हे क्रमाङ्क, या आकाङ्क्षा मनोरथः मादृशां विरहिणीनां मनो ग्लपयति पीडयति सा वासना कृष्णदर्शनाभिलाषरूपो मनोधर्मः। शाब्दे शब्दनिष्ठे धर्मे सति, तस्याम् आकाङ्क्षायाम् इति पूरणीयम्, तथाच, सा आकाङ्क्षा यदि "यत्पदेन विना यस्याननुभावकता भवेत्" इत्युक्तरूपो वाक्यार्थबोधहेतुः शब्दधर्मः स्यात् तदेत्यर्थः। हानिः क्षतिः वाक्यार्थबोध-वैधुर्यरूपेति भावः, न भविता एव। तथा च अस्मन्मनोग्लपिका या श्रीकृष्ण-दर्शनवासनारूपा आकाङ्क्षा तद्युक्तं वाक्यं माऽस्तु वाक्यार्थबोधनिदानीभुतया आकाङ्क्षया संवलितं वाक्यं त्ववश्यं त्वया वक्तव्यमिति भावः। यद्वा, वासनारूपे धर्मे शाब्दे शब्दप्रतिपाद्ये अस्माकं श्रीकृष्णदर्शनवासनायां शब्देन कृष्णाय बोधितायाम् इति यावत् इत्यर्थः। नन्वियं वासना भवतीरिव कृष्णमपि पीडयेदिति चेन्न तयाऽस्मन्निष्ठया वासनया श्रीकृष्णस्य साक्षात्सम्बन्धा-भावात्। एतदेव मादृशामिति पदेन व्यक्तीकृतम्।

एतत् सर्वम् अस्माकं मदनजनितदुःखादिकं त्वया साकाङ्क्षोक्तया पूर्वोक्त-शब्दधर्मरूपाकाङ्क्षायुक्तेन मनोधर्मरूपाकाङ्क्षायुक्तेन च वचसेत्यर्थः, मुरहरपदे श्रीकृष्णचरणे, यद्वा, मुरहररूपे पदे स्थाने निवेद्यं विज्ञापयितव्यम्। पक्षान्तरे दोषमाह—नो चेदिति। नो चेत् यदि साकाङ्क्षोक्तया न निवेदयेः तदा, तव उक्तिः वाक्यं केन प्रकारेणेत्यर्थः, तस्य श्रीकृष्णस्य प्रमितिजनने वाक्यार्थबोध-जनने विश्वासजनने च हेतुः कारणं भवेत्, नैव भवेदित्यर्थः। तथा च यदि शब्दधर्मरूपाकाङ्क्षायुक्तेन वचसा न वदसि तदा शाब्दबोधाभावादर्थबोधो न भवेत्, यदि च अस्माकं कृष्णदर्शनलालसाज्ञापकेन वचसा न वदसि तदापि

अस्माकम् ईदृश्याम् अवस्थायां श्रीकृष्णस्य विश्वासो नैव भवेदित्युभयथापि तस्यात्रागमनं मनोरथमात्रमित्याशयः।

अयं भावः। आकाङ्क्षाशब्दस्य द्वावर्थौ, एको वासनारूपः द्वितीयो वाक्यार्थज्ञानकारणीभूतशब्दधर्मरूपः। तत्र, ननु किं साकाङ्क्षया निराकाङ्क्षया वा उक्त्या श्रीकृष्णो बोधनीयः? यदि साकाङ्क्षया, (वासनारूपाकाङ्क्षायुक्तया) तदा युष्मन्मनोग्लपिका सा वाक्यारूढा कृष्णे संक्रमिता सती तमपि पीडयेत्; पीडितस्य च वाक्यार्थबोधो दुष्कर इति व्यर्थं मे दौत्यं भवेत्। यदि वा निराकाङ्क्षया (अत्राकाङ्क्षापदं शाब्दधर्माकाङ्क्षापरम्) तदापि वाक्यार्थबोधहेतुभूतायास्तस्या अभावादेव तस्य वाक्यर्थबोधोत्पत्तिर्न भवतीति तथैव स्थितं दौत्यवैफल्यम् इत्युभयतःपाशां रज्जुम् आयुञ्जाने पदाङ्के गोप्या इदमुत्तरम्। एतच्च आकाङ्क्षापदस्य शाब्दधर्मपदस्य च श्लेषखेलनम् इति द्रष्टव्यम्।

"सति तु" इति क्वचित् पाठः। तत्र शाब्दे धर्मे असति इति च्छेदाद् भङ्ग्यन्तरेण यथोक्त एवार्थः ॥४२॥

অনুবাদ। যে আকাঙ্ক্ষা মনঃপীড়া জন্মাইতেছে তাহা আমাদের [শ্রীকৃষ্ণ-দর্শনেচ্ছারূপ] বাসনা, ঐ আকাঙ্ক্ষা শাব্দধর্ম হইলে [ত আর] কোন ক্ষতি হইবেই না। [অতএব] এই সকল কথা তুমি সাকাঙ্ক্ষ বাক্যদ্বারা শ্রীকৃষ্ণের নিকট বলিবে, অন্যথা তোমার বাক্য কিরূপে তাঁহার যথার্থ বাক্যার্থ-জ্ঞানের হেতু হইবে ?

[আকাঙ্ক্ষা শব্দের দ্বিবিধ অর্থ, এক বাসনা—এস্থলে যাহাকে গোপী-দিগের শ্রীকৃষ্ণদর্শনলালসা বলা যায়; ইহা মনের ধর্ম; দ্বিতীয় শব্দধর্ম, ন্যায়ে ইহাকে বাক্যার্থ-জ্ঞানের কারণবিশেষ বলা হইয়াছে। ইহার স্থূল অর্থ—যে পদ ব্যতীত যে পদ অন্বয়বোধ উৎপাদনে অক্ষম সেই পদের সহিত

সেই পদের যে সম্বন্ধ তাহাই আকাঙ্ক্ষা। এক কথায় ইহাকে জিজ্ঞাসা বলা চলে। যেমন 'রামঃ জলং' বলিলে শ্রোতার মনে প্রশ্ন উদিত হইবে যে রাম জল কি করিলেন ? তখন 'পশ্যতি' বা 'পিবতি' অথবা 'প্রবিশতি' পদদ্বারা তাহার জিজ্ঞাসা নিবৃত্তি করিতে হইবে। এইরূপ জিজ্ঞাসা না থাকিলে সে বাক্য অর্থবোধ জন্মাইতে পারে না বলিয়া আকাঙ্ক্ষাকে শব্দবোধের কারণ বলা হইয়াছে। এখানে পদাঙ্ক আকাঙ্ক্ষাশব্দের শ্লেষে বলিতেছেন যে, তিনি শ্রীকৃষ্ণের নিকট যাহা বলিবেন তাহা সাকাঙ্ক্ষ বাক্যে বলিলেও দোষ হইবে নিরাকাঙ্ক্ষ বাক্যে বলিলেও দোষ হইবে। কারণ, যে আকাঙ্ক্ষা (বাসনা) গোপীদিগের মনঃপীড়া দিতেছে তদ্‌যুক্ত বাক্যে বলিলে শ্রীকৃষ্ণেরও ঐরূপ মনঃপীড়া দিবে, সে অবস্থায় দূতের বাক্যে তাঁহার মনোযোগ আকৃষ্ট হইবে না। আর যদি আকাঙ্ক্ষা (জিজ্ঞাসারূপ শব্দধর্ম) শূন্য বাক্যে বলা যায় তাহা হইলে ত শ্রীকৃষ্ণের বাক্যার্থবোধই হইবে না—এই উভয় সঙ্কটের নিবারণ কিভাবে করা যায় ? ইহার উত্তরে গোপীরা বলিতেছেন যে, যে আকাঙ্ক্ষা আমাদের মনঃপীড়া দিতেছে তাহা একমাত্র আমাদেরই, উহা কৃষ্ণের এমন পীড়ার কারণ হইবে না যাহাতে তাঁহার বাক্যার্থবোধ বিঘ্নিত হইতে পারে। আরও দেখ, আমাদের আকাঙ্ক্ষা না বুঝিলেই বা তিনি কিরূপে তাহার প্রতিকার করিবেন ; পক্ষান্তরে আকাঙ্ক্ষা (জিজ্ঞাসারূপ শব্দধর্ম) শূন্য বাক্য বলিলে তাঁহার বাক্যার্থবোধই হইবে না। অতএব উভয়বিধ আকাঙ্ক্ষাযুক্ত বাক্যই তোমার বলিতে হইবে।] ॥৪২॥

আগন্তব্যং সরসিজদৃশা বোধিতেন ত্বদুক্ত্যা
নাপ্রত্যক্ষং প্রমিতিকরণং বাক্যমেতন্ন মানম্।
স্বীকর্তব্যং নয়নবিরহাপত্তিভীত্যেতি সর্বৈ-
র্মানাভাবাদ্ দৃশি ন হি ভবেন্মানমন্যদ্ দ্বিতীয়াৎ ॥৪৩॥

[अन्वयः। त्वदुक्त्या बोधितेन सरसिजदृशा आगन्तव्यम्। 'अप्रत्यक्षं न प्रमितिकरणम्' मानाभावात् नयनविरहापत्तिभीत्या एतत् वाक्यं न मानम् इति सर्वैः स्वीकर्तव्यम्। हि दृशि द्वितीयात् अन्यत् मानं न भवेत् ॥४३॥]

टीका। ननु "नाप्रत्यक्षं प्रमाणम्" इत्येके सङ्गिरन्ते, अथ यदि कृष्णोऽपि तन्मतावलम्बी स्यात् तदा त्वप्रत्यक्षे भवतीनां विरहदुःखे शब्दात्मकेन मद्वचसा कथङ्कारं तस्य प्रत्ययो भवेत्, अप्रतीतार्थश्च कथमत्रागच्छेदित्याशङ्कायाम् आह—आगन्तव्यम् इति। त्वदुक्त्या त्वद्वचसा बोधितेन अस्मन्मदनजनितदुःखं ज्ञापितेन सरसिजदृशा कमलनयनेन श्रीकृष्णेन आगन्तव्यम् वृन्दावने इति शेषः। सर्वं वाक्यं सावधारणं भवतीति न्यायाद् आगन्तव्यमेवेत्यर्थः।

नाप्रत्यक्षम् इति। अप्रत्यक्षं चक्षुरादीन्द्रियभिन्नम् अनुमानादय इत्यर्थः, न प्रमितिकरणं न यथार्थबोधसाधनम् एतद् वाक्यं चार्वाकाद्युक्तिः मानं प्रमाणं न भवति इति सर्वैः अस्माभिरिव विरुद्धवादिभिश्चार्वाकादिभिरपीत्यर्थः, स्वीकर्तव्यम् आत्मीयमतविधया ग्राह्यम्। अत्र हेतुमाह—मानाभावादिति। मानाभावात् प्रमाणाभावात् नयनविरहापत्तिभीत्या नयनासिद्धिप्रसञ्जनभयेन, अत्र मानाभावादित्यस्य नयनविरहापत्तौ अन्वयः, विरहश्चासिद्धत्वरूपः, तथा च मानाभावप्रयुक्तनयनासिद्धिप्रसङ्गभयेन 'नाप्रत्यक्षं प्रमितिकरणं' वाक्यमेतन्न मानम्' इति सर्वैः स्वीकर्तव्यमित्यन्वयः। दृशीति। हि यतः, दृशि चक्षुषि चक्षुःसिद्धिविषये इत्यर्थः, द्वितीयात् "प्रत्यक्षानुमानोपमानशब्दाश्चत्वारि प्रमाणानी"त्यादौ द्वैतीयीकतया पठितात् अनुमानादित्यर्थः, अन्यत् मानं प्रमाणं न भवेत् न सम्भवतीत्यर्थः। तथा च "चक्षुर्यदि निष्प्रमाणकं स्यात्तदा असिद्धं स्यात् इत्यापत्त्या असिद्धत्वाभावेन हेतुना चक्षुषो निष्प्र-

মাণকত্বাভাবরূপস্য সপ্রমাণকত্বস্য সিদ্ধিঃ। তত্র চ সপ্রমাণকত্ব-নিষ্পত্তয়ে অনুমানস্য সপ্রমাণকত্বম্ অবশ্যম্ অভ্যুপগন্তব্যম্, চক্ষুষশ্চাক্ষুষাদ্যসম্ভবেন তত্রান্যপ্রমাণস্যাপ্রবেশাৎ; তৎস্বীকারে চ "নাপ্রত্যক্ষং প্রমিতিকরণমি"তি চার্বাকবাক্যস্যৈব নিষ্প্রমাণকত্বমায়াতম্, তস্য চ নিষ্প্রমাণকত্বে বাদিনাং চতুর্ণামপি প্রমাণানাং প্রমাণত্বসিদ্ধ্যা তদন্তর্গততয়া শব্দোঽপি প্রমাণমিতি ত্বদ্বাক্যেনোৎপন্নবোধস্য শ্রীকৃষ্ণস্যাগমনমবশ্যং ভাবীত্যভিপ্রায়ঃ। সরসিজদৃশা ইত্যুক্তেরয়ম্ আশয়ঃ—অনুমানাস্বীকারে আপন্নায়াং নয়নাসিদ্ধৌ ইষ্টাপত্ত্যা বিকলেক্ষণাঃ কামম্ ওমিতি ব্রূয়ুঃ 'সরসিজোদরশ্রীমুষা দৃশা' শোভিতঃ শ্রীকৃষ্ণচন্দ্রস্তু কথমিব নয়নাসিদ্ধিং স্বীকুর্যাদিতি ॥৪৩॥

অনুবাদ। তোমার বাক্যে [আমাদের দুঃখ] পরিজ্ঞাত হইয়া কমল-নয়ন কৃষ্ণ [অবশ্যই বৃন্দাবনে] আগমন করিবেন। প্রত্যক্ষ ভিন্ন (চক্ষুরাদি ইন্দ্রিয় ভিন্ন) অনুমানাদি প্রমাণ (যথার্থ জ্ঞানের কারণ) নহে [চার্বাকাদির] এই বাক্য প্রমাণ নহে. ইহা—প্রমাণান্তরের অভাব বশত নয়নের অসিদ্ধি ঘটিবার ভয়ে সকলেরই স্বীকার করিতে হইবে। কারণ চক্ষুর সিদ্ধিবিষয়ে দ্বিতীয় (অর্থাৎ অনুমান) ভিন্ন অন্য প্রমাণ নাই।

[নৈয়ায়িকেরা প্রত্যক্ষ অনুমিতি উপমিতি ও শব্দ এই চতুর্বিধ জ্ঞান স্বীকার করেন। ইহার মধ্যে প্রত্যক্ষ জ্ঞানের করণ বা সাধন হইল ইন্দ্রিয়—চক্ষু, কর্ণ, নাসিকা, জিহ্বা, ত্বক্ ও মন—এই ছয়টি ইন্দ্রিয়; (প্রত্যক্ষ জ্ঞানের করণ এই ষড়িন্দ্রিয়কেও প্রত্যক্ষ বলা হয়)। অনুমিতির করণ অনুমান, উপমিতির করণ সাদৃশ্য ও শব্দজ্ঞানের করণ শব্দ।

নাস্তিকদের মতে প্রত্যক্ষ ভিন্ন অপর প্রমাণত্রয় স্বীকৃত হয় নাই। তাহারা বলেন "নাপ্রত্যক্ষং প্রমাণম্"—প্রত্যক্ষ অর্থাৎ পূর্বোক্ত ছয়টি ইন্দ্রিয় ভিন্ন অনুমান প্রভৃতি অন্য কিছু প্রমাণ নহে। পদাঙ্কের মনে সন্দেহ হইতে

পারে যে, একদল যখন প্রত্যক্ষভিন্ন প্রমাণ স্বীকার করেন না তখন তাঁহাদের মতে শব্দেরও প্রামাণ্য নাই। এখন কৃষ্ণ যদি ঐ দলভুক্ত হন তাহা হইলে আমার বাক্য (শব্দ) তাহার যথার্থ জ্ঞানের কারণ হইবে না, তবে ত আমার যাওয়া ব্যর্থই হইবে। ইহার উত্তরে গোপীরা বলিতেছেন যে, অনুমানাদি প্রমাণ নহে—চার্বাকদের এই বাক্য অশ্রদ্ধেয়, কারণ ইহা স্বীকার করিলে এই যে আমার চক্ষুঃ—যদ্দ্বারা আমি সকল বস্তু দেখিতেছি, ইহা যে আছে তাহার কোন প্রমাণ আমি দিতে পারি না। চক্ষুঃ ইন্দ্রিয়ের বিষয় নহে বলিয়া একমাত্র অনুমান দ্বারাই তাহার অস্তিত্ব সিদ্ধি করিতে হয়, [জন্য জ্ঞান মাত্রেরই কোন না কোন করণ থাকা আবশ্যক—আমার যখন ঘটবিষয়ক জ্ঞান হইতেছে তখন ইহারও একটি করণ থাকা আবশ্যক। সে করণ ঘ্রাণাদি অপর ইন্দ্রিয় পঞ্চক হইতে পারে না বলিয়া অবশিষ্ট চক্ষুকেই তাহার করণ বলিতে হয়—এই প্রকার অনুমান দ্বারাই চক্ষুর অস্তিত্ব সিদ্ধি হয়] এই অনুমান অপ্রমাণ হইলে চক্ষুর অস্তিত্বও অপ্রমাণ হইয়া পড়ে। ইহাই এই শ্লোকের তাৎপর্য।] ॥ ৪৩ ॥

बौद्धस्यैतन्मतविटपिनो मूलमाच्छादितं स्या-
न्मृद्भिस्तस्यानृतवचनतो यन्मया पूर्वमुक्तम् ।
यद्यस्माकं सततमतनोः सायकक्षुण्णदेहः
प्रामाण्ये स्यात् 'कुसुमविशिखोऽस्ती'तिवाक्ये न साक्षी ॥४४॥

[अन्वयः । अस्माकं सततम् अतनोः सायकक्षुण्णदेहः 'कुसुमविशिखः अस्ति' इति वाक्ये प्रामाण्ये यदि साक्षी न स्यात्, [तदा] तस्य अनृतवचनतः मया यत् पूर्वम् उक्तं [तेन] बौद्धस्य एतन्मतविटपिनः मूलं मृद्भिः आच्छादितं स्यात् ॥४४॥

टीका। स्थूणानिखननन्यायेन पुनरपि शब्दप्रामाण्यं साधयितुमाह—

बौद्धस्येति । यद्वा, नन्वेतावता अनुमानस्यैव प्रामाण्यं स्वीकर्तव्यम् इत्यायातं शब्दप्रामाण्यं तु किमर्थं स्वीकर्तव्यम् ? किञ्च, सप्तमश्लोके "वाक्यं तच्च श्रवणमभवत्" इत्यनेन त्वयापि शब्दस्य प्रामाण्यं प्रत्याख्यातप्रायमेवेत्यत आह—बौद्धस्येति । अस्माकं विरहिणीनां गोपीनां सततं निरन्तरम् अतनोः कामस्य सायकक्षुण्णदेहः बाणविपाटितं शरीरं कुसुमविशिखः कुसुमान्येव विशिखाः बाणा यस्य तादृशः कुसुमबाणविशिष्टः काम इत्यर्थः, अस्ति इति वाक्ये प्रामाण्ये इत्येतद्वाक्यस्य प्रामाण्ये यदि साक्षी नियामकः, "कुसुमविशिखविशिष्टः कामः अस्ति" इति वाक्यनिष्ठप्रामाण्यप्रतिपादक इति समुदायार्थः, न स्यात्, तदा तस्य श्रीकृष्णस्य अनृतवचनतः "आगन्तव्यं झटिति मथुरामण्डलाद् गोपकान्ते" (७) इत्यादि मिथ्यावाक्याद्धेतोः, यद्वा, अनृतवचनं विज्ञाय इति ल्यब्लोपे पञ्चमी, मया यत् पूर्वम् उक्तं "वाक्यं तच्च श्रवणमभवत्" इत्यादि शब्दाप्रामाण्यबोधकं वाक्यं कथितं, तेनेति अध्याहार्यम्, तेन वाक्येन बौद्धस्य चार्वाकादेः एतन्मतविटपिनः "नाप्रत्यक्षं प्रमितिकरणम्" इतिमतरूपस्य विटपिनो वृक्षस्य मूलं मृद्भिः मृत्तिकया आच्छादितम् आवृतं स्यात् । परन्तु कामबाण-भिन्नोऽस्मद्देहः कुसुमबाणविशिष्टः कामः अस्तीति वाक्यस्य प्रामाण्यं प्रतिपादयन् तादृश-बौद्धमतरूपस्य वृक्षस्य मूलमनावृतमकरोदिति पूर्वापरवाक्यसङ्गतिः । अत्र मृद्भिर्मूलाच्छादनेन पोषकता लक्ष्यते । मृदाच्छन्नमूलो हि महीरुहश्चिरं ध्रियते, अतथाभूतस्तु शिथिलमूलतया झटित्युत्पाटितो भवतीति भावः ।

अयमत्र श्लोकार्थः—अस्ति कुसुमविशिखोऽस्तीति पुराणादिप्रसिद्धं वाक्यम्, तच्च चार्वाकाः प्रमाणत्वेन नाभ्युपगच्छेयुः, तन्मते प्रत्यक्षातिरिक्तप्रमाणा-स्वीकारात् । परम् अस्माकमिदं कामबाणभिन्नं शरीरं तद्वाक्यस्य प्रामाण्ये सादरं दधत् बौद्धमतं शिथिलमूलमकरोत् । न चैवं स्ववचोव्याघातः, पूर्वं

त्वयापि शब्दप्रामाण्यास्वीकारादिति वाच्यम्, तत्र मया विशिष्य कृष्णवाक्यस्यैवाप्रामाण्योद्घाटनात्, न ह्येकस्य वचसि वितथे अपरस्यापि वचसा वितथेन भवितव्यमित्यस्ति नियम इति न कश्चिद्दोषः। कुसुमविशिखोऽस्तीति वाक्यस्य प्रामाण्ये देहस्य साक्षित्वकथनेन पूर्वोक्तवचनप्रामाण्ये साक्षी नास्तीति सूचनात् तद्वाक्यस्य दुर्बलता प्रतिपादिता। साक्ष्यभावसूचनम् अपि कृष्णस्येदानीमप्यागमनसम्भवेन तद्वाक्यस्याप्रामाण्यनिश्चयाभावात्, झटित्यर्थककालस्य लवमुहूर्तदण्डादिवत् इयत्तानवधारणादिति भावः। अत एव तत्र 'प्रायः सत्यं मतम्' इति प्रायःपदप्रयोगः कृतः।

अत्र अतनोः सायकक्षुण्णदेह इत्यत्र सापेक्षत्वेऽपि "प्रतियोगिपदादन्यत्" इत्याद्यपवादात् "चैत्रस्य दासभार्येयम्" इत्यादिवत् समासः। कुसुमविशिख इत्यत्र अवयवावयविनोरुभयोरेव शक्तिस्वीकारात् कुसुमवाणविशिष्टः काम इत्यर्थलाभः। केवलरूढ्यर्थस्वीकारे तु क्षोदकरणतया पूर्वं वाणानुमानम् अन्ततश्च वाणप्रेरकतया कायवत्कामानुमानमिति न कश्चिद्विरोधः ॥४४॥

অনুবাদ। কামের বাণদ্বারা নিরন্তর বিদীর্ণ আমাদের [এই] দেহ—'কুসুমবাণবিশিষ্ট কাম আছে' এই বাক্যের প্রামাণ্যে যদি সাক্ষী না হইত তাহা হইলে, কৃষ্ণের বাক্য ("আমি শীঘ্রই মথুরা হইতে চলিয়া আসিব" এইরূপ বাক্য) মিথ্যা দেখিয়া আমি যাহা পূর্বে বলিয়াছিলাম (অর্থাৎ বাক্য মিথ্যা বলিয়াছিলাম) তদ্দ্বারা চার্বাকদিগের [অপ্রত্যক্ষ প্রমাণ নহে] এই মতবাদরূপ বৃক্ষের মূল মৃত্তিকা দ্বারা আচ্ছাদিত করা হইত।

[বৃক্ষের মূলে মৃত্তিকা না থাকিলে মূল শিথিল হয় ও বৃক্ষ দাঁড়াইয়া থাকিতে পারে না। বৌদ্ধমতকে বৃক্ষরূপে বর্ণনা করা হইয়াছে বলিয়া এখানে মূলে মৃত্তিকা দেওয়ার অর্থ বৌদ্ধমতের পোষকতা করা। রাধিকা সপ্তম শ্লোকে কৃষ্ণের বাক্যকে মিথ্যা বলায় প্রকারান্তরে বৌদ্ধমতের—প্রত্যক্ষভিন্ন

অন্য কিছু প্রমাণ নহে—এই মতের পোষকতাই করা হইয়াছে। আবার অন্যদিকে তাহার শরীর কামবাণে পীড়িত হইতেছে বলিয়া 'কুসুমবাণধারী কাম নামক একটি জীব আছে', পুরাণাদি প্রসিদ্ধ এই বাক্য প্রমাণ বলিয়া প্রতিপন্ন হইতেছে। এই বিরুদ্ধ বাক্যদ্বয়ের সমাধান এখানে এইভাবে করিতেছেন যে, বাক্য প্রমাণই বটে, কারণ তদ্বিষয়ে আমাদের এই দেহই সাক্ষ্য দিতেছে। তবে, পূর্বে যে আমি বাক্যকে মিথ্যা বলিয়াছি, তাহা কেবল কৃষ্ণের বাক্য লক্ষ্য করিয়াই ; একজনের বাক্য মিথ্যা বলিয়া সকলের বাক্যই মিথ্যা হইতে পারে না] ॥ ৪৪ ॥

মূর্খা এব ক্ষণিকমনিশং বিশ্বমাহুর্ন ধীরাঃ
খেদোঽস্মাকং হরিবিরহজঃ সর্বদৈবাস্তি চিত্তে।
নান্ত্যঃ শব্দো বচনমপি তৎ তাদৃশং বস্তু কিন্তু
প্রেমৈবাস্মৎপ্রিয়তমকৃতং তচ্চ গোপাঙ্গনাসু ॥৪৫॥

[অন্বয়ঃ। মূর্খাঃ এব অনিশং বিশ্বং ক্ষণিকম্ আহুঃ, ধীরাঃ ন। [যতঃ] হরিবিরহজঃ খেদঃ অস্মাকং চিত্তে সর্বদা এব অস্তি। শব্দঃ [অপি] ন অন্ত্যঃ, [যতঃ] তৎ বচনং তাদৃশং বস্তু, [কিন্তু] অস্মৎ-প্রিয়তমকৃতং প্রেম এব [ক্ষণিকং], তৎ চ গোপাঙ্গনাসু ॥৪৫॥]

টীকা। মূর্খা এব বিশ্বং জগৎ ক্ষণিকং স্বোৎপত্তিদ্বিতীয়ক্ষণবৃত্তিধ্বংস-প্রতিযোগি, যদ্বা অল্পকালস্থায়ি, অনিশং নিরন্তরম্ আহুঃ, ধীরা ভ্রমপ্রমা-দাদিশূন্যাঃ পণ্ডিতাঃ ন আহুরিত্যন্বয়ঃ। যতঃ হরিবিরহজঃ খেদঃ অস্মাকং চিত্তে সর্বদা এব অস্তি। বিশ্বান্তর্গতস্য হরিবিরহজখেদস্য সর্বদা বর্তমান-ত্বাদ্ বিশ্বক্ষণিকত্ববচনং প্রলাপমাত্রম্ ইতি ভাবঃ। শব্দঃ ন অন্ত্যঃ, অত্রাপিরধ্যাহার্যঃ, শব্দোঽপি ন বিনাশীত্যর্থঃ। যতঃ তৎ বচনম্ "আগন্তব্যং

झटिति मथुरामण्डलाद्" इत्यादि कृष्णवाक्यं तादृशं वस्तु चित्ते सर्वदा वर्तनशीलः पदार्थः। अत्रापि शब्दविशेषस्य 'आगन्तव्यम्' इत्यादिवाक्यस्य अस्मच्चित्ते सर्वदा जागरूकत्वात् शब्दानित्यत्ववादः केषाञ्चिदयुक्त एवेत्यर्थः। एतेन शब्दनित्यत्ववादिनो मीमांसका एव पुरस्कार्या इत्याशयो व्यज्यते।

यद्वा अन्त्यः चरमः शब्दो न क्षणिक इत्यध्याहारेण अन्वयः। अयं भावः, प्रथमतः कण्ठताल्वाद्यभिघातेन शब्द उत्पद्यते, स च शब्दान्तरमुत्पाद्य स्वयं नश्यति, एवं क्रमेण शब्दपरम्परया श्रोत्रदेशे चरमः शब्दो जायते, स न शब्दान्तरमुत्पादयति। अयं चरमः शब्दः कैश्चित् क्षणिक उच्यते, तस्य स्वोत्पन्नशब्दान्तराभावेन स्वस्यैव स्वनाशकत्वात् इति। यद्वा शब्दो न अन्त्यः प्रलयपर्यन्तस्थायी नित्य इति यावत्। शब्दस्य अनित्यत्वे कारणं दर्शयति—वचनमपि तदिति। तद् वचनं पूर्वोक्तम् 'आगन्तव्यम्' इत्यादि वचनम् अपि तादृशं वस्तु तदीयक्षणवृत्तिध्वंसप्रतियोगि क्षणिकम् इति यावत्। अत्र तादृशपदेन अनन्तरपूर्वोक्त-'सर्वदावर्तमानत्व'रूपार्थपरित्यागात् तत्पूर्वोक्त-क्षणिकार्थपरामर्शः कथं मर्षणीयः। किञ्च, अन्तिमवाक्ये प्रेम्ण एव क्षणिकत्वकथनात् तदितरेषां खेदादीनाम् अक्षणिकत्वं कवेः प्रतिपिपादयिषितम् इति नेयं व्याख्या युक्ततया प्रतिभाति।

नन्वेवं रीत्या सर्वेषां स्थिरत्वे युष्मदाहितं कृष्णप्रेमापि स्थिरमिति स्थिरेण तेन प्रेम्णा समाकृष्टः स स्वयमेवात्रागमिष्यतीत्याह—किन्त्विति। किन्त्वित्यनेन पूर्वस्मात् वाक्याद् व्यतिरेकः सूच्यते। अस्मत्प्रियतमकृतम् अस्माकं प्रियतमेन कृष्णेन कृतं प्रेमैव क्षणिकम् इत्यनुकृष्यान्वयः कार्यः। एवेनान्यव्यवच्छेदः। नन्वेवं तत्कृतप्रेम्णः क्षणिकत्वे कुब्जादिगतप्रेम्णोऽपि क्षयेण न चिरादेव तस्यात्र प्रत्यागमनं भवेदित्याह तच्चेति। चकारस्त्वर्थे। तत् क्षणिकप्रेम

तु गोपाङ्गनासु अस्मासु गोपरमणोष्वेव न तु कुब्जादिष्विति शेषः। अत एव क्षणिक-कृष्णप्रेमदृष्टान्तेन विश्वक्षणिकत्वमपि न साधनीयं साक्षादेव तस्य द्वैरूप्यस्य दृष्टचरत्वादित्याशयः। अत्र गोपाङ्गनास्विति अधिकरणे सप्तमी, तस्याश्च कृतमित्यनेनान्वयः तथा च गोपाङ्गनासु कृतं तदीयप्रेमैव क्षणिकमित्यर्थः ॥४५॥

অনুবাদ। মূর্খ ব্যক্তিগণই জগৎকে নিরন্তর ক্ষণিক বলিয়া থাকে পণ্ডিতগণ নহেন। যেহেতু শ্রীকৃষ্ণ বিরহ জন্য দুঃখ আমাদের চিত্তে সর্বদাই [লাগিয়া] রহিয়াছে। শব্দও বিনাশী অথবা অনিত্য নহে ; কারণ [শ্রীকৃষ্ণের] সেই বাক্যও (আমি শীঘ্রই মথুরা হইতে চলিয়া আসিব—এই বাক্য) তাদৃশ বস্তু (অর্থাৎ সর্বদা আমাদের চিত্তে বর্তমান বস্তু)। কিন্তু আমাদের প্রিয়তমকৃত প্রেমই [একমাত্র] ক্ষণিক পদার্থ ; তাহাও আবার গোপরমণীদের সম্বন্ধে [কৃত প্রেম]। [কুব্জাদির সম্বন্ধে তৎকৃত প্রেম কিন্তু অচল, অটল] ॥ ৪৫ ॥

शाके सायकवेदषोडशमिते श्रीकृष्णशर्मार्पय-
न्नानन्दप्रदनन्दनन्दनपदद्वन्द्वारविन्दं हृदि।
चक्रे कृष्णपदाङ्कदूतमखिलं प्रीतिप्रदं शृण्वतां
धीरश्रीरघुरामरायनृपतेराज्ञां गृहीत्वादरात् ॥४६॥

[अन्वयः। श्रीकृष्णशर्मा आनन्दप्रदनन्दनन्दनपदद्वन्द्वारविन्दं हृदि अर्पयन् धीरश्रीरघुरामरायनृपतेः आज्ञाम् आदरात् गृहीत्वा सायकवेदषोडश-मिते शाके शृण्वतां प्रीतिप्रदं कृष्णपदाङ्कदूतम् अखिलं चक्रे ॥४६॥]

टीका। स्वस्य स्वोपजीव्यस्य स्वकृतेश्च नामादिकं कविरभिधत्ते—शाक इति। श्रीकृष्णशर्मा श्रीकृष्णनामा विप्रः, "शर्मा देवश्च विप्रस्ये"तिस्मृतेः, आनन्द-प्रदनन्दनन्दनपदद्वन्द्वारविन्दं पदयोर्द्वन्द्वं पदद्वन्द्वं तदेवारविन्दं कमलं, नन्द-

नन्दनस्य पदद्वन्द्वारविन्दम् आनन्दप्रदं च तत् नन्दनन्दनपदद्वन्द्वारविन्दञ्चेति तत् तथा ; यद्वा आनन्दप्रदो यो नन्दनन्दनस्तस्य पदद्वन्द्वारविन्दमिति समासः। हृदि स्वचित्ते अर्पयन् स्थापयन् हृदिस्थत्वेन चिन्तयन्नित्यर्थः। धीरश्रीरघुरामरायनृपतेः धीरस्य धैर्यवतः रघुरामरायनाम्नः स्वपोषकस्य कस्यचन राज्ञः। क्वचिद् वीरेति पाठः। आज्ञाम् आदेशम् आदरात् सम्मानसहकारेणेत्यर्थः, गृहीत्वा तदादेशमनुसृत्येति भावः। सायकवेदषोडशमिते सायकाः पञ्च वेदाः चत्वारः, षोड़श च, "अङ्कस्य वामा गति"रिति पञ्चचत्वारिंशदुत्तरषोड़शशतानीत्यर्थः, एभिर्मिते परिमिते शाके शकवर्षे पञ्चचत्वारिंशदुत्तरषोड़शशततमे (१६४५) शकाब्दे इत्यर्थः। श्रवणवतां श्रवणकर्तृजनानां प्रीतिप्रदं कृष्णपदाङ्कदूतं कृष्णस्य पदाङ्कश्चरणचिह्नं स एव दूतो यत्र तत् तथा, तन्नामकं दूतकाव्यम् अखिलं समग्रं साङ्गमिति यावत् चक्रे विहितवान्, समाप्तिम् अगमयत् इति पिण्डितार्थः।

स्वकृतेः परकृतिरूपेण प्रख्यापनस्य आचार्यशैलीतया चक्रे इति प्रथमपुरुषेण निर्देशः। यद्वा अहम् इत्यध्याहारात् चक्रे इत्युत्तमपुरुषैकवचनेन निर्देशः। न चोत्तमपुरुषे लिटः प्रयोगो नानुशासनिक इति वाच्यम्, चित्तविक्षेपादिस्थले तादृशप्रयोगस्य वैयाकरणैरनुमतत्वात्। एवञ्च नन्दनन्दनपदद्वन्द्वारविन्दस्य हृद्यर्पणजनितानन्देन विवशीभूतहृदयः श्रीकृष्णशर्मा अहं पदाङ्कदूतकाव्यं चक्रे किलेति कवेराशयः प्रकटीकृतः। अत एव पदारविन्दस्य आनन्दप्रदेति विशेषणम् अपि सार्थकम् इति द्रष्टव्यम्। अखिलं कृष्णपदाङ्कदूतम् इत्यन्वयो वा। तत्र अखिलम् इति अप्रहतम् ऊहापोहादिद्वारेण केनापि चोदयितुम् अशक्यमिति यावदित्यर्थः। अखिलं समग्रं यथा स्यात्तथा प्रीतिप्रदम् इत्यन्वयो वा। "अखिलप्रीतिप्रदम्" इति समस्तपाठेऽपि पूर्वोक्त एवार्थः। 'द्रुतरचन'मिति पाठे तूत्तान एवार्थः। इति शिवम् ॥४६॥

वियद्दतुदहनोर्वीसम्मिते वङ्गवर्षे
शर-शिखरि-मतङ्ग-क्षोणिमाने शकाब्दे ।
सरलमधुरभाषा भास्वती नाम टीका
व्यगमदिह समाप्तिं मन्दिरे प्राच्यवाण्याः ॥

इत्यशेषदूतकाव्येतिहासनिर्माणवासनावासितमानसेन घटकर्प-रादिटीकाविरचनचातुर्यचमत्कृत-कृतिनिचयचित्त-चकोरेण चतु-र्धुरीणोपाधिना यतीन्द्रविमलेन विरचिता भास्वती नाम पदाङ्क-दूतटीका समाप्ता ॥

অনুবাদ। শ্রীকৃষ্ণশর্মা আনন্দপ্রদ নন্দনন্দন [শ্রীকৃষ্ণের] পদকমলদ্বয় হৃদয়ে ধারণ পূর্বক ধীর [স্বভাব] রাজা রঘুরাম রায়ের আদেশ সসম্মানে গ্রহণ করিয়া ১৬৪৫ শকাব্দে শ্রোতৃবর্গের প্রীতিপ্রদ কৃষ্ণপদাঙ্কদূত [নামক গ্রন্থখানি] সমাপ্ত করিলেন ॥ ৪৬ ॥

पदाङ्कदूतस्य पाठान्तराणि

1. 3. G. अत्रैवास्ते ।

4. 2. H. स्यन्दनाज्ञाङ्कुशादि ; 4. G. याने ।

5. 2-3. G-H. कीलालोत्थैः सुरभिकुसुमैरर्चयन्तोऽपि भक्त्या ।
पश्यन्तस्त्वां नयनसुभगं साश्रुधाराङ्घ्रियुग्मं ।

7. 2. C. मधुपुरीं, B. प्रोच्य वेदम् ।

9. 1. C. पुरवधू, B. प्राणपण्यो० ।

11. 4. C. तत्रापि रागः ।

12. 2. C. ०रपि भयकरै० ।

14. 2. F. पन्थास्थलमपि ; 3. A-C-F. यास्यन्त्यचिर० ; 4. G. ०दुष्कं-रैतै० ।

16. 2. B. श्रीपतेः ।

17. 2. G. ०र्निर्भयत्वं ।

18. 2. C. ०स्तरणितनया ; 4. A-B. लाञ्छनाग्रश्च ।

19. 1. G. ह्यातव्येयं ; 3. A-C-F. त्यज्यं (?) ।

20 3. C. गिरति ।

21. 1. B-D-E. पण्डिताग्रे० ; 2. C. वाक्यम् ; 3. C-F. कथयति ।

23. 2. G. श्रुतश्च ।

26. 1. C. ज्वालयन्, G. ज्वालयेः ।

28. 1. C. मधुरिपु ; 3. B-C-D-E-F. ०जोत्तापितो० ।

29. 3. G. किञ्चित् ; 4. निर्विरोधि ।

31. 2. A-B. केवले चास्ति, C-F. सलिलेऽप्यस्ति नैवं कदापि ; 4. G. जनानाम् ।

32. 1. C. ०रन्यादृशः स्यात् ; 4. G. सिद्धया ।

34. 1. A-B-C. प्रियतमगतं

36. 4. A. निर्दयः ।

37. 3. B. तस्माद्वाक्यं, F. पण्डिताग्र्यै०, G. मण्डिताद्यै० ; 4. A-B- हृदये, दग्धुकामैः ।

39. 3. G. ज्ञेयश्चैत० ; 4. G. जनकविधये ।

40. 4. G. ०स्तत्कथायां ।

41. 2. G. तत्पदाब्जैः ।

42. 4. F. प्रमितिकरणे, C. करणं ।

43. 2. G. ०मेतन्न युक्तम्, A-B. ०मेतन्निरस्तम् ।

44. 3. A-B. देहे ; 4. B-C. प्रामाण्यं ।

45. 3, G. यत्तादृशं ।

46. 3. G. दूतरचनं विद्वन्मनोरञ्जनं ; 4. A-C-D-E-F-G. श्रीलश्रीयुत-रामजीवनमहाराजाधिराजादृतः ; B. अयं श्लोको नास्ति ।